पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीनराष्ट्रियसंस्कृतसंस्थानेन
सम्मानितम्

श्रीसोरटूर श्रीनिवासाचार्येण रचितं

द्वैतभूषणम्

सम्पादकः
विद्वान् अ. हरिदास भट्टः
प्रांशुपालः, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु

पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्
बेङ्गलूरु - २८

२००६

पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन-
राष्ट्रियसंस्कृतसंस्थानेन सम्मानितम्

श्रीसोरटूर श्रीनिवासाचार्येण रचितं

द्वैतभूषणम्

सम्पादकः
विद्वान् अ. हरिदास भट्टः
प्रांशुपालः, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु

पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्
बेङ्गलूरु - २८

२००५

पूर्णप्रज्ञसंशोधनमन्दिरग्रन्थमाला - २९

श्रीसोरटूर श्रीनिवासाचार्येण रचितं

द्वैतभूषणम्

सम्पादकः- **विद्वान् अ. हरिदासः भट्टः**

प्रकाशकः -

पूर्णप्रज्ञसंशोधनमन्दिरम्

पूर्णप्रज्ञविद्यापीठम्, कत्तरिगुप्पा मेन्रोड्,

बेङ्गलूरु - २८

प्रथममुद्रणम् - २००५

मुद्रितपुस्तकसङ्ख्या - १०००

मूल्यम् - १०० रूप्यकाणि

अक्षरसंयोजनम् - **पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु**

लावण्यमुद्रणद्वारा मुद्रितम् ।

POORNAPRAJNA SAMSHODHANA MAṆDIRAM

Recognised by Rashtriya Sanskrit Samsthan, Deemed University, Ministry of H.R.D., Govt. of India, New Delhi

DVAITABHŪṢAṆAM

of

Śri Soratūru Śrinivāsācārya

Editor

Vidwan A. Haridasa Bhat

Principal, Poornaprajna Vidyapeetha, Bangalore

Publisher-:

Poornaprajna Samshodhana Mandiram

Poornaprajna Vidyapeetha,

Bangalore - 560 028

2005

Poornaprajna Samshodhana Mandiram Series No. 29

Dvaitabhūṣaṇam
of Śri Soratūru Śrinivāsaācārya

Editor : **Vidwan A. Haridasa Bhat**

Published by :.
Poornaprajna Samshodhana Mandiram
Poornaprajna Vidyapeetha, Bangalore - 560 028.

First Edition : 2005

Copies : 1000

Price : Rs. 100/-

Type setting :
Poornaprajna Samshodhana Mandiram, Bangalore

Printed by :
Lavanya Mudrana, Bangalore.

अनुग्रहाशंसनम्

श्रीमद्व्यासतीर्थाः वैष्णवसिद्धान्तपरिरक्षणायाभेद्यं वर्मत्रयं निर्ममिरे। तदेतत् व्यासत्रयनाम्ना सुप्रथितम्। त्रिष्वेतेषु विद्वदौषधेषु ग्रन्थेषु 'तात्पर्यचन्द्रिका' अन्यतमा। श्रीमध्वाचार्यप्रणीतब्रह्मसूत्रभाष्यस्य श्रीजयतीर्थभिक्षुविरचितायाः तत्त्वप्रकाशिकाख्यटीकायाः व्याख्याव्याजेन ब्रह्मसूत्राणां सविमर्शम् अध्ययनमत्र व्यधायि ग्रन्थकारेण। माध्वभाष्यकुवलयोल्लासिनी चन्द्रिकैषा परभाष्यपुण्डरीकषण्डं मुकुलीकरोति। निबन्धेऽस्मिन् शाङ्करभाष्योपरि समुद्घाटिताः दोषाः श्रीरघुनाथसूरिविरचिते शाङ्करपादभूषणे आक्षिप्ताः। तस्यास्य भूषणस्य दूषणम् श्रीश्रीनिवासाचार्येण द्वैतभूषणाख्येऽस्मिन् ग्रन्थेऽभ्यधायि। तदनेन ग्रन्थेनोपरक्तचन्द्रचन्द्रिका पुनः प्राकाश्यमनीयत।

ग्रन्थोऽयं पूर्णप्रज्ञशोधनमन्दिरेण इदंप्रथमतया मुद्राप्य प्रकाश्यते। ममान्तेवासी हरिदासभट्टाभिधः ग्रन्थस्यास्य संशोधनकार्यभारमुवाह सश्रद्धम्। नितरां श्लाघ्योऽस्य प्रयत्नः। तमेनं श्रीहरिगुरवः समनुगृह्णन्तु। मन्दिरेण चैतादृशाः नैके निबन्धाः प्रकाश्यन्ताम् इत्याशास्महे।

श्रीविश्वेशतीर्थश्रीपादाः

श्रीपेजावरमठाधीशाः

उडुपि

FOREWORD

Philosophic thought in India was never an arid desert. It is a free flowing river, alive and ever inspiring life and thought. And every school of this philosophic thought has its own individual depth and extent and has won a place in the scholastic world by its own worth and value. Though all schools existed at all times, there were occasions when one school drew more attention than others and completely engrossed peoples' minds. And this is a historical fact. The present review concerns the gloss, 'Tatparya Chandrika' written by Sri Vyasa Tirtha on the appraisal, 'Tatwa Prakasika' written by Sri Jayatirtha on the 'Brahmasutra Bhashya' of Sri Madhvacharya, the founder of the Dvaita school of thought. The 'Tatparya Chandrika' strongly upholds the fact that the Acharya's commentary on the 'Brahmasutras' is fully reflective of the meaning that the author of the 'Brahmasutras' meant to convey. And Sri Vyasaraja also holds that the commentaries produced by the 'Advaita' and the 'Visishtadvaita' schools singularly fail in conveying the true purport of the Brahmasutras.

And Sri Raghunatha Suri has criticised this stand of Sri Vyasaraja in his 'Sankara Pada Bhushana.' Deeply examining the claims made in the 'Sankara Pada Bhushana' and rebutting the arguments presented there, Sri Soratur Srinivasa charya has upheld the theses presented in Sri Vysaraja's 'Tatparya Chandrika' in his magnum opus, 'Dvaita Bhushana'.

In order to bring out the very subtle processes of thought

and preserve the depth of philosophical reflection prevailing in the 'Tatparya Chandrika - Sankara Pada Bhushana - Dvaita Bhushana', it is found necessary to reprint and issue these books, and the Purna Pragna Samsodhana Mandira is proud to present the present volume, Sri Soratur Srinivasa charya's 'Dvaita Bhushana', to the literary world.

This work of bringing out this volume is faciltated by the ever gracious blessings of Sri Visvesatirtha Swamiji of Pejavara Matha, Udupi, who, quietly standing behind all our efforts, inspires all our acitivities.

I express my gratitude to Dr. Rajalakshmi Srinivasan, Chairperson of the Poornaprajna Samsodhana Mandira for her continuing support and encouragement.

I do not have enough word to express my sense of gratitude to Prof. V. Kutumba Sastry, Vice Chancellor, Rashtriya Samskrita Samsthana, New Delhi, for his unfailing support and active engagement in all our endeavours.

This volume has been edited by Sri. A. Haridasa Bhat, Principal of Poornaprajna Vidya Peetha and an eminent scholar of Nyaya and Vedanta. Only a person of his calibre could undertake this task and I am grateful to him for the tremendous work he has undertaken and offer him my thanks.

I also offer my thanks to the Lavanya Press for the neat job of printing they have done.

Dr. A.V. NAGASAMPIGE

INTRODUCTION

The Upanishads are the sacred source from which the several streams of Indian thought flows. They are the manifestations of the esoteric experiences of the fulfilled minds. And as they chronicle the experiences of the several seers, they contain statements which seem to be mutually contradictory. So much so, the overall message that they convey is oftentimes not clear and is obscure. To get over this difficulty and to facilitate an understanding of the Upanishads with a degree of certainity, Sri Veda Vyasa compiled the Brahma Sutras. Its four chapters contain 564 aphorisms (Sutras), and the correct meaning of the Upanishads has to be determined in the light of these aphorisms, and all our efforts at determining the meaning of the Upanishads should follow the path indicated by them.

However, all the three Acharyas, Shankara, Ramanuja and Madhva have written commentaries on the Brahma Sutras. And their interpretations of the Brahma Sutras differ widely. And they have erected their philosophical systems in the light of their interpretaitons of the Brahma Sutras.

This being so, the enquiring scholar is left with the unenviable task of first determining which of the three interpretations is correct. Each one of the commentators has cited authorities upholding his own interpretation and rejecting other interpretations. Each one claims his own interpretation as the most appropriate and other interpretations as faulty and not relevant.

In this context 'Tatparya Chandrika', a critical analysis of the problem arising out of the three differing interpretations

of the three Acharyas authored by Sri Vyasa Tirtha, providing an indepth examination of the three versions, is of invaluable help. In the introductory verse itself, Sri Vyasa Tirtha has made his intention very clear.

"Prati sutram prakashyete ghatana' aghatane maya |
sveeyanyapakshayoh samyak vidam kurvantu surayah ||

('प्रतिसूत्रं प्रकाश्येते घटनाघटने मया ।
स्वीयान्यपक्षयोः सम्यक् विदाङ्कुर्वन्तु सूरयः ॥)

As in the case of his 'Nyayamrita', Sri Vyasa Tirtha's 'Tatparya Chandrika' also has attracted wide adulation as well as criticism. While "Nyayamrita' has attracted adverse attention only from the Advaita camp, 'Tatparya Chandrika' has attracted adverse attention from both Advaita nad Visishta'dvaita camps. In his treatise Sri Vyasa tirtha has pinpointed the Visista'dvaita stand by the phrase (Kechit) 'Some persons' and has proceeded to point out the lacunae in it.; and in some places he has jointly referred to the Advaita and the Visishta'dvaita stand as 'they both' (Ubhahyam).

A detailed reply to the criticism of the Advaita stand made in Sri Vyasa Tirtha's 'Tatparya Chandrika' is found in Ranganatha Suri's 'Sankara Pada Bhushana'. And the reply to the criticism of the Visishta'dvaita stand is found in 'Tatwa Martanda' written by Sri Nigamantadeshika Srinivasacharya.

The current treatise 'Dvaita Bhushana' is also a critical evaluation of Ranganatha Suri's 'Sankara pada Bhushana', and it was written about 150 years ago by Sri Soratur Srinivasacharya. And at the very start of the exposition the author has made the submission:

"Sriman Madhva matasakta purvacharya prasadatah|
Karomyaham sankariya pada bhushana khandanam||"

('श्रीमन्मध्वमतासक्तपूर्वाचार्योपदेशतः ।
करोम्यहं शङ्करीयपादभूषणखण्डनम् ॥)

That is, "By the blessings of my forerunners in devotion to Sri Madhva, I am undertaking this task of refuting the claims made in 'Sankara Pada Bhushana' ".

And at the end of the treatise the author pleads, that his work should not be disregarded as one written by one of little talent, as it was written on the basis of the path laid by his predecessors in devotion to Madhva,

"Na upekshayantu idam pragnah mandadhi kritamityatah|
Purvacharyokta yuktischa sangrihya rachitam yatah||"

('नोपेक्षयन्त्विदं प्राज्ञाः मन्दधीकृतमित्यतः ।
पूर्वाचार्योक्तयुक्तीश्च सङ्गृह्य रचितं यतः ॥)

This treatise would seem to have been written with the intention of censuring and condemning 'Sankara Pada Bhushana' in its totality and the author takes this work as a mission and starts this task without further ceremony, from the first word itself. And the first word is "Yattu", (As what is said is wrong), indicating that the author is not giving any quarter but going at his task hammer and tongs without any further ado. And his attack begins:- The five introductory slokas of the "Sankara Pada Bhushana" are not in keeping with the tenets of the Advaitha system. The phrase 'Sarva Mangala Rupaya' as applying to the Lord, (To One of the All Auspicious Form) is faulted on the ground that while

the Lord is eternal, the ascription of knowledge (mangala) is not eternal, and hence the adjectival phrase 'Sarva Mangala Rupa" is faulted as being inappropriate. (Mangala means Knowledge, which is not eternal, and its ascription to God, the Eternal is faulted.) And again, if the phrase 'Sarva Mangala Rupa' is interpreted as meaning the 'Auspicious to all', choices of meanings arise, and these go against the Advaita doctrine, and on this score alone, the whole sloka is shown as faulty.

The inaugural Sloka of the 'Sankara Pada Bhushana' reads, "Ananda tirthadibhiradarena Yad dushitam bhashyam analpabodhaih", meaning, "What all deficiencies have been pointed out in the works of Shankara by Madhva and his followers who are all great scholars", I (Ranganatha Suri) undertake to disprove and, moreover undertake to point out the shortcomings in their commentaries". And on this Srinivasacharya's first objection is "while accepting Madhva and his followers like Jayateertha, Vyasa and others as great and profound scholars, not accepting what they say but vowing to demolish their arguments is contradictory".

Thus the author makes his intention of subjecting every word of the 'Sankara Pada Bhushana' to the most merciless criticism, from the very first word of his treatise. But as the book progresses his resolution weakens and there are large portions of the 'Sankara Pada Bhushana' that he has ignored. After subjecting the first Pada of the first chaper to intense criticism, he goes direct to the second chapter ignoring the other three Padas there. And even there the intensity of the criticism slackens. Whereas the criticism of the first pada of the first chapter covers 250 pages the criticism on the

remaining book covers a bare 100 pages. From this it would appear that the zeal of the author towards criticising the contents of Ranganatha Suri's 'Sankara Pada Bhushana' diminished as his own book progressed.

ADAPTATION OF THE PRINCIPLES OF NYAYA TO VEDANTA

The author has widely used the language of Nyaya in his book, and the book is replete with phrases from the principles of 'new logic' (Navya Nyaya). The final findings of logic and their 'Anugama' are fully used here, and this removes this book from the ken and understanding of all except the accomplished scholars. For example, the argument of the Advaita vada is, that the difference between 'Jiva' and 'Isa' advocated by the Sruthi, "Dva Suparna" is not a real difference and that it does not contradict the unity, aikya, at the highest level, the 'Paramarthika' level; and the difference advocated is only at the temporal level (vyavaharika). If the difference is to be treated as real, then the objection arises on the basis of the saying in the Taittereya Upanishad, "annyontara atma Pranamaya' and this is advocative of the difference between 'Annamaya' and 'Pranamaya', and on this basis a difference is indicated in these two forms of Brahma. But in the thinking of the Dvaita School, there is no difference between these two forms. Likewise, just beause 'Jiva' and 'Eesa' are said to be distinct, it should not be understood that there is no real 'non-difference' between them. This is the objection raised by the author of 'Sankara Pada Bhushana'. On this, the author of the 'Dvaita Bhushana' replies,

स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन ब्रह्मत्वविशिष्टो योऽन्यत्वव्यपदेशः स अभेदविरोधीत्युच्यते। अवच्छेदकताघटकसम्बन्धः स्वविशिष्टान्यत्वव्यपदेशत्वम्। अन्यत्वे स्ववैशिष्टयं च स्वाश्रयप्रतियोगिकत्वस्वाश्रयानुयोगिकत्वोभयसम्बन्धेन। तथाच स्वाश्रयप्रतियोगिकत्वस्वाश्रयानुयोगिकत्वोभयसम्बन्धेन स्वविशिष्टान्यत्वव्यपदेशत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन ब्रह्मत्वविशिष्टान्यत्वव्यपदेश अभेदविरोधीति पर्यवसितम्।

This is fully in keeping with the esoteric language of logical intricacy. Still, though the language is involved, the idea it conveys is not. However if the difference of the Lord from the Lord is referred, it is not contrary to unity. But in other places if this difference is proposed it is contrary to unity, aikya.

But in some contexts this usage is meaningful. For example, if God is said to be Anandamaya, would it connote the presence of a tinge of the opposite of Ananda (Bliss) and should one take it that God is affected by a tinge of the opposite quality ie; Duhkkha. If one says this village is full of Brahmins, it would also imply that there are some who are not Brahmins in the village. On this analogy, if one says, God is full of Bliss, would it not imply that there is some part of Him which is not Bliss. And this is the ground for holding this view.

Chandrika makes this matter very clear. We say 'Prachura Prakaso Ravih', ie, 'the Sun is full of Light'. And it is clear that there is no implication of any darkness being present in the Sun. And we say that the Sun is full of ligtht. Similarly,

a God who is full of Happiness does not admit of the presence of a tinge of 'sorrow.'

This clarification in Chandrika is a matter for contradiction in the 'Sankara Pada Bhushana'. The word 'Prachura' can be used both as the qualifying word and the qualified word. If one says 'Brahmana prachuro gramah', (The village is full of Brahmins,) it admits the presence of those who are not Brahmins. On the other hand, if one says, 'Prachura Brahmano gramah', (all who stay here are Brahmins) there is no implication of any others but Brahmins staying there. To make this clear, 'Prachura prakaso Ravih', the 'Sun is full of Light', does not admit of the presence of any darkness along with light. In the present context, the phrase 'Anandamaya', (maya = prachura) the 'prachurya', the 'permeation' is qualified. And the author of the 'Sankara Pada Bhushana' presses the point that this imples the presence of a tinge of something other than Bliss, that is of sorrow.

This conclusion of the author of the Sankara Pada Bhushana is met by the proponents of the Dvaita doctrine in the following manner.

यदर्थनिष्ठप्रकारतानिरूपितविशेष्यत्वावच्छिन्नप्राचुर्यनिष्ठप्रकारता-निरूपितविशेष्यताश्रयत्वं यस्य तस्मिन् तदर्थसमानाधिकरणविजातीय-स्याल्पस्य प्रतीतिरिति नियम इत्युक्तं भवत्यनेनेति प्रतीयते ।

And thus controverting it they reject the rule. The Sun can be said to be 'Full of Brightness', (Prakasa Prachura), or he can be said to be the 'Bright Sun' (Prachura Prakasa). And however he is described, the ascription of darkness

does not arise in him. And in the light of this exmple, to ascribe sorrow to God, is not apposite.

तादृशनियमोऽपि न सम्भवति 'प्रकाशप्रचुरः सविता' इत्युक्तेऽपि सवितर्यन्धकारलेशाप्रतीतेः। अस्तु वा तादृशनियमः। तथापि नियमशरीरे यदर्थनिष्ठप्रकारतानिरूपितविशेष्यतेत्यत्र विशेष्यतायां प्रचुरपदप्रयोज्यत्वं निवेशनीयम्।

And the idea of this is: Only when the word 'Prachura' is used, the presence of an opposite quality is indicated. But here, the word 'Mayat' is used in the place of 'Prachura'. And therefore, the need or the presence of even a tinge of 'sorrow'is obviated.

Here a greater primacy is attached to the word than to the meaning, and this is a device of the science of Logic. And even in the case of the Sun, the author is of the opinion that it would be more appropriate to use the term 'Prakasamaya' as applying to the Sun, instead of 'Prakasa Prachura'; that is, 'Pervaded with Light' in place of 'Full of Light'.

PADABHEDOPADHI NIRUPANA

Dvaita epistemology allows the application of all words to the Supreme. That is, all words ultimately are indicative of God. These qualifying words are of four kinds. These are, Anyatra Prasiddha, (applcable elsewhere) ; 'Ubhayatra Prasidha' (Applicable in both places); 'Anyatraiva Prasiddha' (Applicable elsewhere only). And 'Tatraiva Prasiddha' (Applicable there only). Amongst these four, the words which apply only to the Supreme, (Tatraiva Prasiddha), eg; Brahma, Narayana, etc; do not require further elucidation. And the

remaining three categories are further elucidated in the four padas of the Brahma Sutras. Amongst these three categories, the distinction between ‘ Anyatra Prasiddha’ (Applicable elsewhere) and ‘Anyatraiva Prasidha’ (Applicable elsewhere only) is not discernible.

Applicable elsewhere (Anyatra Prasiddha) would mean applicable elsewhere also, (Anyatraapi Prasiddha) and also applicable elsewhere only (Anyatraiva Prasiddha). In the first alternative, ‘applicable elsewhere also, (Anyatrapi Prasiddha) would bring the word in to the second category, Ubhayatra Prasiddha, (Applicable in both places). In the second alternative, ie; ‘applcable elsewhere only’, (Anyatraiva Prasiddha) the word would be in the third category. This process of usage has been subjected to examination in several ways in the Chandrika, and also subjected to intense and a many sided review in the Dvaita Bhushana.

स्वप्रयोज्यान्योपस्थिति-ब्रह्मानुपस्थिति-प्रतिबद्धब्रह्मसमन्वयक-शब्दसमन्वयपादत्वमन्यत्र प्रसिद्धपादत्वम् । स्वप्रयोज्यान्योपस्थिति-ब्रह्मानुपस्थिति-ब्रह्मपरत्वविशेष्यकात्यशक्यकल्पनत्वशङ्का, एतत्त्रितय-प्रतिबद्धब्रह्मानुयोगिकसमन्वयकशब्दसमन्वयपादत्वमन्त्रैव प्रसिद्ध-पादत्वमिति पादोपाधिवैजात्यसम्भवेन, ‘कथं पादोपाधिवैजात्यम्’ इत्याक्षेपासम्भव इति ।

If a word used in the Upanishad does not seem to be appicable to the Supreme at first sight and is found to be evocative of something other than the the Supreme, such a word is ‘Anyatra Prasiddha’, applicable elsewhere; eg; the word ‘Akasa’ (Sky). And if a word read in consonance

with the previous words, is found in that context to be utterly inapplicable to the Supreme, it is applicable elsewhere only, ie; Anyatraiva Prasiddha; for example, the word 'Duhkkhi', the 'Miserable one'.

SUTRAKSHARA ANUGUNYA

In 'Sankara Pada Bhushana', the interpretation of the Sutras, as done by the Dvaita School is criticised. For example, interpretation of the word, 'ASABDAM', occurring in the Fifth Sutra, ie; 'Eekshaterna sabdam' is criticised . In this Sutra, the view that all words are descriptive of God is conveyed. And this view that all words being descriptive of God is strengthened by Madhva in his Bhashya. But in the Advaita tradition, this Sutra is held as rejecting the Sankhya concept that 'Nature' is the root cause for the universe. In the 'Sankara Pada Bhushana', the Dvaita interpretation is rejected as not in keeping with what the Sutras indicate. They argue that if the intention of the Author of the Sutras was to convey the idea that words portray God, he could have said 'Eekshaterna Vachyam'. This contention is rebutted by the author of the 'Dvaita Bhushana' by saying:- One meaning of the Sutra would be, 'Brahman is amenable to portrayal by words'. A second interpretation would be, none of the qualities like sound, form and essence are present in God and will be able to evoke Him. And this would mean that Brahma is not subject to cognition either by the sense organs, Pratyaksha, or by inference. Because He is not cognisable by words, literature also fails to make Him known. This, that God is not knowable by any means, becomes the presumption of the Sutra, (Purvapaksha), and this the Sutrakaras reject.

SRUTYARTHA VIVARANA

Likewise a fresh interpretation is found for the Mantras "Udaramantaram Kurute", etc.

In the Taittareya Upanishad occurs the Mantra, "Yato va imani bhutani jayante yena jatani jivanti yat, prayanti abhisamvisanti." According to the 'Sankara Pada Bhushana', the import of this Mantra is, "God is the cause for the creation, sustenance and destruction of the world and nothing more.. According to the Dvaita interpretation, 'yat prayanti' indicates destruction, and 'abhisamvisanti' indicates 'Moksha', deliverance; and hence, God is the cause of not only Creation, Sustenance and the Destruction of the world, but for the Moksha, ie; the deliverance of the souls.

To counter this the 'Sankara Pada Bhushana' argues: The word 'yat' is used uniformly in other places. But 'abhisamvisanti' is not preceded by 'yat'. If Moksha was also meant to be covered, the words should have been 'yat abhisamvisanti'. The word 'abhisamvisanti' without 'yat', does not indicate 'moksha'. To this the Dvaita reply is, "The word 'yat' should be applied to 'abhisamvisanti, by the rule of 'adhyahara', (transferrence of words), and the interpretation would be 'yat abhisamvisanti'.

And in many places the interpretation of the Mantras is intuitively determined in this way by the application of one's intelligence and by grammatical rules.

However one aspect calls for consideration. Bheda-abheda relationship between yarn and cloth is a part of Dvaita thought. But in two places in the 'Dvaita Bhushana', this difference is spoken of as 'Saviseshabheda'. This is a matter for further consideration.

Overall this treatise, 'Dvaita Bhushana' demonstrates the mastery of the author over the processes of innovative logic and his proficiency over logical methods and logical thinking.

About the Author.

Sri Soratur Srinivasacharya was a student of Sri Bhima Bhalacharya; whose son is celebrated as Sri Sri Satya Parakrama Tirtha and became the head of the Uttaradhi Matha. At the end of his book, Sri Srinivasacharya speaks of himself in the folloing terms:-

"Vayi balarya sureenam syamadi guna sampadam|
Sishyena srinivasena rachitam dvaita bhushanam||"

(वायीबालार्यसूरीणां शमादिगुणसम्पदाम् ।
शिष्येण श्रीनिवासेन रचितं द्वैतभूषणम् ।।)

He has introduced himself as the student of Sri Vayi Balacharya, and says that his teacher was always engaged in study and teaching. He further informs that this treatise was completed on Phalguna Sukla Panchami of Pramoda Samvatsara.

14-04-2006

A. Haridasa Bhat
Principal,
Poornaprajna Vidyapeetha,
Bangalore28

Translation into English :

Sri K. Seetharam Rao, Hyderabad

॥ श्रीगुरुभ्यो नमः ॥

सोरटूर श्रीनिवासाचार्येण रचितम्

परकृतशङ्करपादभूषणदूषणपरम्

द्वैतभूषणम्

जगज्जन्मादिकर्तारं वन्दे श्रीशं सुरप्रियम् ।
आनन्ददं हि भजतां गुणपूर्णमनामयम् ॥ १ ॥

श्रीरामं हनुमत्सेव्यं श्रीकृष्णं भीमसेवितम् ।
श्रीव्यासं मध्वसंसेव्यं समस्ताभीष्टदं भजे ॥ २ ॥

श्रीमदानन्दतीर्थार्य चरणावश्रयेऽनिशम् ।
भभार भारती यत्र प्रेमभारमनारतम् ॥ ३ ॥

श्रीमन्मध्वमताम्भोधिविक्रीडनविशारदान् ।
शमादिगुणसम्पन्नान् वन्दे विद्यागुरून् मम ॥ ४ ॥

श्रीमन्मध्वमतासक्तपूर्वाचार्यप्रसादतः ।
करोम्यहं शङ्करीयपादभूषणखण्डनम् ॥ ५ ॥

(शङ्करपादभूषणमङ्गलपद्यविमर्शः)

यत्तु,

'सर्वमङ्गलरूपाय भक्ताभीष्टप्रदायिने ।
सच्चिदानन्दरूपाय श्रीपरब्रह्मणे नमः ॥'

इति मङ्गलाचरणं तत्तुच्छम् । मत्तस्त्वमुत्कृष्टस्त्वत्तोऽहमपकृष्ट इति वृत्ति-विशेषस्य मङ्गलतया तस्य जन्यत्वेन नित्यस्य ब्रह्मणः तथाविधमङ्गल-

स्वरूपत्वासम्भवात् । न च मङ्गलशब्दस्य शुभवाचकतया शुभरूपायेत्यर्थ-सम्भवान्नानुपपत्तिरिति वाच्यम् । 'सर्वमङ्गलरूपाय' इत्यत्र सर्वेषां मङ्गलरूपायेति वोत सर्वाणि यानि मङ्गलानि तावतां स्वरूपायेति वा सर्वे मङ्गलरूपाः यस्मादिति वा । नाद्यः । अनीश्वरवादिनां सर्वान्तर्गततया तान् प्रति ब्रह्मणः शुभरूपत्वासम्भवात् । न द्वितीयः । विवाहादिकर्मणां भगवद्भजनादिकर्मणां च सर्वशुभान्तर्गततया चिद्ब्रह्मण अचित्स्वरूपत्वा-सम्भवात् । न तृतीयः । 'अनभिभवं च दर्शयति' इति सूत्रेण सर्वेषां स्वभावानभिभवस्य बादरायणाचार्येण साधितत्वेन दैत्यस्वभावस्याशुभ-तया सर्वान्तर्गतदैत्यानां ब्रह्मणः शुभस्वभावासम्पादकत्वात् ।

सर्वाभीष्टप्रदायित्वमप्यनुपपन्नं ब्रह्मणः । स्वाभेदेनोपासितं ब्रह्म स्वस्यानर्थप्रदमेव स्यान्न त्विष्टप्रदम् । 'घातयन्ति हि राजानो राजाहमिति वदन्तम् । ददति च सर्वमभीष्टं गुणोत्कर्षं वदतः' इति प्रमाणेन स्वाभेदेनोपासितराजपुरुषं प्रति राज्ञः अनर्थप्रदत्वस्योक्तत्वेन तद्वद् ब्रह्मणोऽपि तथोपासनयाऽनर्थप्रदत्वस्यैव प्राप्तेः । लोके राजान एवात्मनां स्वाभेदेनोपासनाकर्तारं प्रति कुप्यन्ति यदा तदा किमु वक्तव्यं ब्रह्म कुप्यतीति ?

सच्चिदानन्दरूपायेत्यनुपपन्नम् । आनन्दवत्त्वे हि परिवृढत्वं न त्वानन्दरूपत्व इति आनन्दरूपत्वस्य नम्यत्वप्रयोजकत्वाभावात् ।

ऐश्वर्यादिशून्यस्य निराकारस्य श्रीमत्वम्, यस्मात् परत्वं तन्निरूपि-तावधिताश्रयस्यान्यस्य तस्याभावेन परत्वम्, 'बृहन्तो ह्यस्मिन् गुणाः' इति श्रुत्यर्थपर्यालोचनया प्राप्तं ब्रह्मशब्दप्रवृत्तिनिमित्तं ब्रह्मत्वं च ब्रह्मत्वेन त्वदभिमते वस्तुन्यसम्भावितमिति श्रीपरब्रह्मण इत्यप्यसङ्गतमेव ।

नम इत्यनुपपन्नमेव । नमस्कार्यस्य नमनं कुर्वता भेदाभावात् । न चौपाधिकभेदमादाय नमनोपपत्तिरिति वाच्यम् । तथासति हृदयावच्छिन्न-चैतन्यस्य पादावाच्छिन्नचैतन्यस्य चौपाधिकभेदसत्त्वेन स्वस्य स्व-चरणाभिवन्दनप्रसङ्गात् ।

(मङ्गलपद्यम् - २)

यत्तु,

'मेघश्याममुज्वलाम्बरधरं मन्दस्मितश्रीमुखं
लक्ष्मीलक्षितवक्षसं सुनयनं गण्डोल्लसत्कुण्डलम् ।
चक्राद्यायुधधारिणं हृदि गतं वन्दारुमन्दारकं
वृन्दारण्यविनोदिनं सकरुणं वन्दे मुकुन्दं मुदा ॥'

इत्यनेन नमनं तदपि व्यर्थं पर्वतस्य पाषाणोद्धरणमिव । त्वन्मते शुद्धब्रह्मणः निराकारत्वेनास्य पद्यस्य शुद्धपरत्वासम्भवात् । विशिष्टस्य साकारत्वेऽपि शबलस्य तस्य मिथ्यात्वेन तद्वन्दनस्याप्रयोजकत्वात् । नहि मिथ्याभूतस्य वन्दनं सप्रयोजनं दृष्टं लोके । तथासति वन्ध्यासुतोपासनया धनादि-लाभप्रसङ्गः । यदुक्तम्-

अद्वैतवस्तुप्रतिपादनाय द्वैतस्य मिथ्यात्वविनिश्चयाय ।
यः सूत्ररूपं निबबन्ध शास्त्रं तं व्यांसमाद्यं गुरुमानतोऽस्मि ॥

इति तदप्ययुक्तम् । पूर्वोक्तहेतोरेव । किञ्च बादरायणाचार्येऽद्वैतवस्तु-प्रतिपादकद्वैतमिथ्यात्वप्रतिपादकसूत्रकर्तृत्वं त्वदभिमतं नास्ति । तथासति 'भेदव्यपदेशाच्च', 'भेदव्यपदेशाच्चान्यः', 'पृथगुपदेशात्' इत्यादिभेदप्रति-

पादकसूत्रप्रणयनानुपपत्तेः । औपाधिकभेदप्रतिपादनमत्रेति त्वदीय-विक्रीनम्[१] अग्रे दर्शयिष्यामः ।

(मङ्गलपद्यम् - ४)

यत्तु,

मिथ्याज्ञानविजृम्भमाणजगतामभ्यन्तरे भुञ्जतः
स्वारब्धानि निरीक्ष्य जीवनिचयान् मूढानविद्यावशात् ।
देवः कारुणिकोऽवतीर्य समशासद्यस्तु शारीरके
भाष्यं तं प्रणमामि शङ्करगुरुं निःश्रेयसावाप्तये ॥

इति तदपि मन्दम् । जीवनिचयस्य स्वारब्धभोक्तृत्वम्, त्वदभिमतगुरौ तदभावस्य त्वयैवाङ्गीकृततया तयोर्भेदस्य प्राप्तत्वेनाद्वैतहान्याऽप-सिद्धान्तात् ।

यत्तु,

आनन्दतीर्थादिभिरादरेण यद्दूषितं भाष्यमनल्पबोधैः ।
तदुद्धृतौ तत्कृतिदूषणे च ह्युज्जृम्भतेऽसौ रघुनाथसूरिः ॥

इति तत्तुच्छम् । अनल्पबोधैर्दूषितमित्यनेनानुद्धार्यदूषणदूषितत्वं तत्कृतावनल्पबोधरचितत्वोक्त्या प्राप्तं परादूष्यत्वमङ्गीकृत्य पुनश्च तदुद्धारे प्रवृत्त्युक्तेः तत्कृतौ दूषणप्रवृत्त्युक्तेश्चोन्मत्तप्रलपितत्वापत्तेः । एवमनुपपन्न-भाषणस्य सूरित्वं सुधियो विचारयन्तु ।

सर्वज्ञभगवत्पादकृतं सूत्रार्थवर्णनम् ।
वाचस्पत्यादिविज्ञेयम् अव्युत्पन्नेन दूषितम् ॥

---

१. विक्रीनम्=

इत्यप्यसाधु । पूर्वं स्वभाष्यस्य 'अनल्पबोधदूषितम्' इत्यनेनानल्पबोधदूषितत्वमङ्गीकृतवता दूषणकर्तृष्वनल्पबोधत्वं स्वीकृतम् । तथा तल्लब्धं व्युत्पन्नत्वमपि । तथा चात्राव्युत्पन्नत्वाङ्गीकारे पूर्वोत्तरपद्ययोरसङ्गत्यापत्तेः ।

आनन्दतीर्थीयनये दूषणं च वदाम्यहम् ।
ह्रीपतिश्रीपतिप्रीत्यै रघुनाथो विदामपि ॥

इत्यप्यसङ्गतम् । आनन्दकरशास्त्रे दूषणाभिधाने स्वशास्त्रस्यानन्दकरत्वाभावापत्तेः ।

श्रीमच्छाङ्करसूत्रार्थः शरच्चन्द्र इवामलः ।

इति तु नास्मत्प्रतिकूलम् । तथाविधसूत्रार्थस्य चन्द्रदृष्टान्तोक्त्या कलङ्कस्यैव प्राप्तेः ।

'ह्रीपतिश्रीपतिप्रीत्यै रघुनाथो विदामपि' इप्यसङ्गतम् । सर्वेषामानन्दकरशास्त्रे दूषणाभिधाने ह्रीपतेः श्रीपतेः विदामपि वा कथं प्रीतिर्भवेत् ? शास्त्रस्यानन्दकरत्वमानन्दतीर्थीयेत्युक्त्या त्वयैवाङ्गीकृतम् । तीर्थशब्दस्य शास्त्रवाचकतया आनन्दकरं तीर्थं शास्त्रं यस्येति यस्मादिति वा व्युत्पत्त्या शास्त्रस्याऽनन्दकरत्वलाभात् ।

किञ्च लोकेऽदूषणमेवानन्दकरं दृष्टमित्यानन्दकरत्वस्यादूषणत्वव्याप्यतया शास्त्रस्यानन्दकरत्वाङ्गीकारे तद्व्याप्यस्यादूषणत्वस्याप्यङ्गीकर्तव्यतया प्राप्तत्वेन तत्रादूषणत्वमङ्गीकृत्य पुनस्तत्र दूषणाभिधानप्रवृत्त्युक्तिस्त्वां व्यस्तदेवप्रियत्वं[1] प्रापयति । एवमनुपपन्नभाषणत्वादेव शिष्टं जल्पितमप्यपास्तम् ।

---

१. व्यस्तदेवप्रियत्वम् = मूर्खत्वम्

यदुक्तं मङ्गलाचरणोपसंहारे-

'कृतिर्वितनुतां मोदं सतां भक्तिं च मे हरौ ।
भक्त्या प्रसन्नो भगवान् मुक्तिं मम प्रयच्छतु ॥'

इति । तदप्यसङ्गतम् । त्वदीयकृतेः मोदकत्वाभावस्य पूर्वमुक्तत्वात् । त्वन्मते ज्ञानस्यैव मुक्तिसाधनत्वेन प्रसादस्य मुक्तिसाधनत्वाभावाच्च । मुक्तिप्रार्थनमप्यसङ्गतम् । मुक्तिस्वरूपस्य तव दुर्वचत्वात् । यथा दुर्वचत्वं तथाऽग्रे वक्ष्यत इति दिक् ॥ छ ॥

(अध्यासभाष्यस्य साङ्गत्यचिन्ता)

''यत्तु चन्द्रिकायाम्'' इत्यारभ्य ''कर्तृत्वादिविशिष्टस्यैव सम्भावितदोषेणातत्वावेदकेन प्रत्यक्षानुमानादिना मिथ्याभेदे गृहीतेऽपि तात्त्विकाभेदे मानान्तरविरोधाभावेन तत्त्वंपदमुख्यार्थत्वाय, तल्लक्षितचिन्मात्रे भेदाप्रसक्त्या तत्त्वमसीति वाक्यावैयर्थ्याय च विशिष्टस्यैव निर्दोषया श्रुत्या तात्विकाभेदबोधनसम्भवेन विषयार्थमध्यासस्यावक्तव्यत्वात् । नापि प्रयोजनार्थं तदुक्तिः सेत्वज्ञानाकार्यस्य पापस्य सेतुज्ञानान्निवृत्तेः । तस्माद् विवरणमतं न युक्तम्' (चन्द्रिका) इति व्यासतीर्थेनोक्तम्'' त्यन्तेन चन्द्रिकामुपपाद्य तन्नेति प्रजल्प्य यदुक्तं परेण-

''तत्त्वमसीति महावाक्येन जीवत्वेश्वरत्वरूपविरुद्धधर्मविशिष्टयोस्तात्विकाभेदबोधने 'नेह नानास्ति किञ्चन' इत्यादेर्विशिष्टयोर्मिथ्यात्वबोधकश्रुत्यन्तरस्य विरोधो दुर्वार एव'' इत्यादिना?

तन्न । तथा हि- 'कर्तृत्वादिविशिष्टस्यैव' इत्यारभ्य 'विषयार्थमध्यासस्यावक्तव्यत्वात्' इत्यन्तेनेदमुक्तं भवति- तत्त्वमसीति महावाक्येन तत्त्वं-

पदमुख्यार्थयोः जीवत्वेशत्वविशिष्टयोस्तात्विकाभेदबोधने न किञ्चित् बाधकम्। अतः तत्त्वंपदयोः स्वरूपमात्रपरत्वाभावेऽपि तत्त्वंपदमुख्यार्थयोरुक्तविशिष्टयोर्मिथ्यात्वमन्तरोक्तविशिष्टयोरभेदस्य, तात्त्विकस्य, शास्त्रविषयस्य सम्भवेन विषयार्थमध्यासोपपादनस्योपयोगाभावः।

न च 'अहं कर्ता भोक्ता' इत्यादिप्रत्यक्षं कर्तृत्वादिविशिष्टविषयकं तदनवच्छिन्नतया वेदान्तप्रतिपाद्यात् भेदं गृह्णातीति श्रुत्या विशिष्टाभेदबोधने तथाविधप्रत्यक्षविरोधरूपं बाधकमस्तीति वाच्यम्। प्रत्यक्षस्य सम्भावितदोषत्वेनातत्वावेदकतया तेन मिथ्याभूतभेदग्रहणसम्भवेन मिथ्याभूतभेदग्रहणेऽपि तेन सत्यभेदग्रहणाभावान्न तात्विकाभेदबोधकश्रुतेः तैन विरोध इति। अत एवेदृशप्रत्यक्षस्य मिथ्याभेदग्राहकतयाऽविरोधित्वेन 'मानान्तरविरोधाभावेन' इत्युक्तम्। अनुमानस्याप्येवमेव।

एतेन, तत्वंपदयोर्मुख्यार्थत्वमप्यनुसृतं भवति। तत्वमसीति वाक्यावैय्यर्थ्यं च प्राप्नोति। स्वरूपमात्रपरत्वे चिन्मात्रे भेदाप्रसक्त्या अप्रसक्तस्य प्रतिषेध इत्यतः चिन्मात्रे भेदप्रसक्तेरभावेन तन्निषेधाय तत्वमसीति वाक्यस्य सार्थक्यानुपपत्तेरिति।

एवं च सम्भावितदोषतया दुर्बलस्य प्रत्यक्षस्य, अपौरुषेयतया पुरुषदोषनिबन्धनदोषसम्भावनाशून्यतया प्रबलश्रुतिबाधकत्वं न सम्भवत्येव।

'नेह नानास्ति किञ्चन' इति श्रुत्या 'तत्त्वमसि' इत्यादिश्रुतेर्विरोध इत्यपि वक्तुमशक्यम्। समबलतया विनिगमकाभावेन 'नेह नानास्ति किञ्चन' इति श्रुतेः 'तत्वमसि' इति श्रुतिविरोध इत्यपि वक्तुं शक्य-

त्वात् । नच निषेधवचनस्य प्राबल्येन नेहेत्यादिश्रुतेः प्राबल्यमिति वाच्यम् । 'न हिंस्यात् सर्वभूतानि' इति निषेधवचनस्यापि 'याज्ञीयाग्निषोमीयं पशुमालभेत' इति विधिवचनतः दौर्बल्यस्य दृष्टत्वात् । किञ्च 'तत्वमसि' इति श्रुतेरपि भेदनिषेधपरतया निषेधवचनत्वाच्च । नचास्य वाक्यस्य निषेधवचनत्वे त्वया विवदितव्यम् । 'तत्वमसीति वाक्येन जीवेशभेदनिषेधाय ''द्वा सुपर्णा'' इत्यादिश्रुतिभिर्जीवेशभेदस्त्वनूद्यते' इति त्वन्मतेऽभ्युपगमात् ।

किञ्च सामान्यवचनापेक्षया विशेषवचनस्य प्राबल्येन ब्रह्मणि धर्मसामान्यनिषेधप्रतिपादकात् ब्रह्मणि जीवभेदरूपधर्मनिषेधवचनस्यैव प्राबल्येन नेहेत्यादितः तत्वमसीत्यदेरेव प्राबल्याद् श्रुतीनामप्रामाण्यस्य वक्तुमशक्यतया तत्वमसीति श्रुत्यनुसारेणैव नेह नानेत्यादिश्रुतीनामर्थस्य स्वीकरणीयतापत्त्या तत्वमसीत्यादेः नेह नानेत्यादिश्रुतिविरोधासम्भवात् । नच सामान्यधर्मावच्छिन्ननिषेधवचनतः तद्व्याप्यधर्मावच्छिन्नविधिवचनस्यैव विशेषवचनत्वं प्राबल्यं च दृष्टम् । यथा भूतहिंसात्वरूपसामान्यधर्मावच्छिन्ननिषेधप्रतिपादकात् 'न हिंस्यात् सर्वभूतानि' इति वचनतः भूतहिंसात्वव्याप्य-यज्ञसम्बन्धिपशुहिंसात्वावच्छिन्न-विधायकस्य 'अग्नीषोमीयं पशुमालभेत' इति वचनस्य विशेषवचनत्वं प्राबल्यं च दृष्टमिति कथमत्र सामान्यविशेषभावेन दुर्बलप्रबलभाव इति वाच्यम् । सामान्यधर्मावच्छिन्ननिषेधवचनतः तद्धर्मव्याप्यधर्मावच्छिन्ननिषेधवचनस्यापि विशेषवचनत्वस्य प्राबल्यस्य च क्वचित् तान्त्रिकैरङ्गीकृतत्वात् ।

प्रथमे 'न हिंस्यात्' इत्यादौ विशेषवचनेन बाधो नाम 'न हिंस्यात्'

इति सामान्यवाक्यस्य पूर्वोक्तविशेषवाक्यमहिम्ना यज्ञसम्बन्धिपशु-हिंसातिरिक्तहिंसानिषेधपरतयोपवर्णनम् । सामान्यविशेषवचनस्य विशेषनिषेधवचनेन बाधो नाम सामान्यनिषेधपरतया प्राप्तस्य वचनस्य विशेषनिषेधवचनमहिम्ना विशेषनिषेधपर्यवसानमेवेति नेहेति धर्म-सामान्यनिषेधप्रतिपादकवचनस्य भेदरूपधर्मविशेषनिषेधप्रतिपादकस्य तत्वमसीति वाक्यस्य महिम्ना भेदनिषेधरूपविशेषनिषेधपर्यवसानस्य प्राप्त्या नेहेति वचनस्य धर्मसामान्यनिषेधप्रतिपादकत्वासिद्धेः ।

अथवैतादृशसामान्यविशेषभावापरितोषे 'तत्त्वमसि' इति श्रुतेः विशिष्टयोस्तात्विकाभेदे प्रमाणतयोदाहृतायाः ब्रह्मणि सार्वज्ञादिरूप-धर्मप्रतिपादकतया तस्याः सार्वज्ञादिरूपधर्मविधिपर्यवसानस्य प्राप्त्या ब्रह्मणि धर्मसामान्यनिषेधपरतया प्राप्तात् नेहेत्यादिवाक्यात् तत्वमसीति वाक्यस्य विशेषवाक्यत्वम्, तत्रोक्तप्राबल्यं च सूपपादमिति न तत्वमसीति वाक्यस्य नेहेति वाक्यविरोधो वक्तुं योग्य इति ॥

किञ्चोक्तविशिष्टयोस्तात्विकाभेदे तत्वमसीति वाक्यं प्रमाणयतामिदं तात्पर्यम्- तत्वमसीति महावाक्यानुसारेण सर्वेषां श्रुतिवाक्यानां प्रामाण्यानुरोधेन मुख्यतात्पर्यस्य कल्पनीयतया समस्तवेदस्यापि विशिष्टयोरभेदबोधे मुख्यतात्पर्यस्य प्राप्त्या समस्तो वेद एव तत्र प्रमाणम् इति एवमभिधास्यतः प्रतिश्रुतिविरोधोपन्यासानौचित्यात् । अत एव प्रत्यक्षानुमानापेक्षया मानान्तरविरोधाभावेनेत्युक्तम् । तदर्थस्तु स्ववृत्ति-प्रमाण विभाजकधर्मभिन्नप्रमाणविभाजकधर्मावच्छिन्नविरोधाभावेनेति । स्वं= तत्वमसीति वाक्यम्, तद्वृत्तिप्रमाणविभाजकधर्मः= आगमत्वम्,

तद्भिन्नप्रमाणविभाजकधर्मः= प्रत्यक्षत्वमनुमानत्वम्, तदवच्छिन्नविरोधाभावेऽनेति पर्यवसितम्। अन्यथा मानविरोधाभावेनेत्यवक्ष्यत्।

किञ्च नेह नानेत्यादिवाक्ये उक्तविशिष्टयोः मिथ्यात्वप्रतिपादकत्वमपि नोपलभ्यते। नचाहं कर्तेत्यादिप्रत्यक्षेण कर्तृत्वादिमत्तया प्रतिपन्ने प्रत्यगभिन्ने इह= ब्रह्मणि उपाधौ, किञ्चन= किञ्चिदपि नास्तीत्युक्त्या धर्मसामान्यनिषेधे प्रतिपादिते कर्तृत्वादौ प्रतिपन्नोपाधौ कालिकनिषेधप्रतियोगित्वस्य प्राप्त्या धर्माणां मिथ्यात्वे तद्विशिष्टमिथ्यात्वमपि लब्धमिति नेहेत्यादिवाक्येनोक्तविशिष्टयोर्मिथ्यात्वबोधः सम्भवतीति वाच्यम्। तथा श्रुत्यर्थोपवर्णनेन नानेत्यस्य वैयर्थ्यापत्तेः। किञ्च प्रत्यगभिन्ने ब्रह्मणि व्यवहार-काले व्यावहारिकस्य कर्तृत्वादेस्त्वयाङ्गीकृततया कर्तृत्वादेः प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वासम्भवाच्च।

नच व्यावहारिकस्य कर्तृत्वादेः ब्रह्मण्यङ्गीकारेऽपि पारमार्थिकस्य तस्य तस्मिन्ननङ्गीकारेण कर्तृत्वादेः पारमार्थिकत्वेन त्रैकालिकनिषेधप्रतियोगित्वप्राप्त्या न कर्तृत्वादेः मिथ्यात्वासम्भव इति वाच्यम्। प्रतिपन्नोपाधौ पारमार्थिकत्वेन त्रैकालिकनिषेधप्रतियोगित्वस्य मिथ्यात्वरूपत्वे मिथ्यात्वस्य स्वघटकपारमार्थिकत्वज्ञानाधीनज्ञानतया पारमार्थिकत्वस्योक्तरूपप्रतियोगित्वाभावरूपतया तस्य चोक्ततादृशप्रतियोगित्वरूपमिथ्यात्वज्ञानाधीनज्ञानतया पारमार्थिकत्वज्ञाने चोक्तरूपमिथ्यात्वज्ञानम्, मिथ्यात्वज्ञाने सति पारमार्थिकत्वज्ञानमिति प्राप्त्या अन्योन्याश्रयात्। **तस्मात्** मानान्तरविरोधाभावेनेति यदुक्तं चन्द्रिकाचार्यैस्तत् साधूक्तमेव।

(‘नेह नाना’ इति श्रुत्यर्थः)

ननु ‘नेह नानास्ति किञ्चन’ इति श्रुतेः कोऽसावर्थ इति चेत् श्रुणु। इह= ब्रह्मणि, नाना= नानात्वविशिष्टम्, भेदविशिष्टं गुणक्रियादिकं नास्तीति। अनेन ‘सविशेषणे हि विधिनिषेधौ सति विशेष्ये बाधे विशेषणमुपसङ्क्रामतः’ इति न्यायेन भेदविशिष्टगुणक्रियादौ प्रसक्तस्य निषेधस्य विशेषणे भेद पर्यवसाने ब्रह्मसम्बन्धिगुणक्रियादिजाते ब्रह्मभेदो नास्तीति पर्यवसितम्। नन्वेदमप्युपवर्णनं कथं युज्यते ? यस्मात् कस्माच्चित् भेदविशिष्टस्य गुणक्रियादेः ब्रह्मणि सत्त्वेन सामान्यतः भेदविशिष्टगुण-क्रियादिजातनिषेधस्य वक्तुमशक्यत्वादिति वाच्यम्। इहेत्यस्यावृत्तिः। इह किञ्चन, इह नाना नेत्युक्तं भवति। तत्र इहेत्यत्र सप्तम्यर्थः वृत्ति-त्वम्। तत्र प्रकृत्यर्थब्रह्मणः निरूपितत्वसम्बन्धेनान्वयः। वृत्तित्वस्य स्वरूपसम्बन्धेन किञ्चन पदार्थगुणक्रियादिजातेऽन्वयः। आवर्तितेह-शब्दघटकसप्तम्या अनुयोगित्वमर्थः। प्रकृत्यर्थः ब्रह्म। तस्य ब्रह्मण आधेयतया सप्तम्यर्थानुयोगित्वेऽन्वयः। अनुयोगित्वस्य निरूपकतया नानापदार्थैकदेशे भेदेऽन्वयः। नानात्वं भेदः। तद्विशिष्टस्य नञर्थभेदे प्रतियोगितया, भेदस्य च गुणक्रियादिजातेऽन्वयः। तथाच ‘ब्रह्मवृत्ति-गुणक्रियादिजातं ब्रह्मानुयोगिकभेदविशिष्टं न’ इति बोधसम्भवेनोक्त-दोषानवकाशेन विवक्षितार्थलाभसम्भवात्। न चैकदेशान्वयो दोष इति वाच्यम्। आधेयता ब्रह्मान्वितसप्तम्यर्थानुयोगित्वस्य स्वनिरूपकभेदा-भावसम्बन्धेन गुणक्रियादिजाते, तस्मिन् ब्रह्मणो वा स्वानुयोगिकभेदा-भावसम्बन्धेनान्वयाङ्गीकारे चोक्तदोषाभावात्।

(‘तत्त्वमसि’ इति वाक्यस्य विशिष्टयोरभेदबोधकत्वस्य समर्थनम्)

एतेन ‘जीवत्वेश्वरत्वविशिष्टयोर्भेदस्य व्यावहारिकत्वेनाभेदस्य व्यावहारिकतायाः समानसत्ताकयोः प्रतियोग्यभावयोरेकत्र विरोधेनासम्भवात् प्रातीतिकत्वापत्या तद्बोधने तादृशवाक्यस्याप्रामाण्यापत्तिः। जीवत्वोपलक्षिते ईशत्वोपहिताभेदोऽपि न तद्वाक्यजन्यबोधविषयः। तादृशबोधस्योक्तरीत्या व्यावहारिकेशत्वविषयकत्वासम्भवात् प्रातिभासिकेशत्वविषयकत्वेन तद्बोधकवाक्याप्रामाण्यापत्तेः’ इति तु निरस्तम्। तत्वमसीति वाक्यात् तत्वंपदमुख्यार्थयोः विशिष्टयोस्तात्विकाभेदबोधने मानान्तरविरोधं परिहृत्योक्तविशिष्टयोरभेदस्य तात्विकताया एवोक्ततया तस्य प्रातिभासिकत्वाभावेन विशिष्टयोरभेदबोधकस्य तत्वमसीति वाक्यस्य अप्रामाण्यापत्तेरनवकाशात्। जीवत्वविशिष्टे ईशत्वविशिष्टाभेदबोधनस्य निर्बाधकत्वे सुतरां जीवत्वोपलक्षिते ईशत्वविशिष्टाभेदबोधस्य निर्बाधकत्वमिति जीवत्वोपलक्षिते ईशत्वविशिष्टाभेदोऽपि न तद्वाक्यजन्यबोधविषय इत्यस्यासङ्गतत्वात्।

तादृशबोधस्योक्तरीत्या व्यावहारिकेशत्वविषयकत्वासम्भवादित्यपि न सत्। परमार्थतः निर्धर्मिके ब्रह्मण्येव जीवत्वेशत्वादीनां व्यावहारिकाणां त्वदङ्गीकृततया तादृशबोधस्य व्यावहारिकेशत्वविषयकत्वसम्भवात्। प्रातिभासिकेशत्वविषयकत्वेन तद्बोधकवाक्याप्रामाण्यापत्तेरित्यपि न। तादृशबोधस्य व्यावहारिकेशत्वविषयकत्वसम्भवस्यैवोक्तत्वात्। सर्वज्ञत्वकिञ्चिज्ज्ञत्वोपहितयोरभेदस्य बाधितत्वाद्योग्यतापाताच्च। तदुपलक्षितचिन्मात्रपरत्वं वाक्यस्योपेयमित्यपि न। उक्तविशिष्टयोरभेदस्य प्रत्यक्षानुमानागमरूपप्रमाणबाधितत्वाभावस्य पूर्वमुपपादितत्वात्।

किञ्च सर्वज्ञत्वकिञ्चिज्ज्ञत्वयोः पारमार्थिकधर्मविधुरे ब्रह्मण्येव व्यवहार-काले व्यावहारिकयोस्त्वयाङ्गीकृततया तद्विशिष्टाभेदस्याबाधितत्वाच्च ।

नच सर्वज्ञताल्पज्ञते एकस्मिन् ब्रह्मणि मया नाङ्गीकृते । समान-सत्ताकयोः प्रतियोग्यभावयोरिव समानसत्ताकयोस्तयोर्विरोधेनेकत्र समावेशासम्भवादिति वाच्यम् । स्वोक्तिविरोधात् । तथाहि- 'एवंलक्षणतः प्रत्यक्षानुमानश्रुतिप्रमाणेभ्यः भावरूपानिर्वचनीयानाद्यज्ञानसिद्धौ परेणा-श्रयासिद्ध्यादिदूषणेनाद्वैतमतसिद्धाज्ञानखण्डनं यत् स्वकीयग्रन्थेषु कृतं तत्तु न विचारसहम् । शुद्धचित एव कल्पिततादृशाज्ञानाश्रयत्वोपपत्तेः । तदुक्तम् 'आश्रयत्वविषयत्वभागिनी निर्विशेषचितिरेव केवला' इत्यादि-ग्रन्थेन । उत्तरत्र शुद्धब्रह्मण एवाज्ञतायाः सार्वज्ञस्य चाङ्गीकारात् ।

अथ 'सर्वज्ञत्वकिञ्चिज्ज्ञत्वोपहितयोरभेदस्य बाधितत्वादयोग्यता-पाताच्च' इत्येतद् इतोऽप्यनुपपन्नम् । तत्वमसीति महावाक्येनोक्तधर्म-विशिष्टयोस्तात्विकाभेदबोधे 'नेह नानास्ति किञ्चन' इत्यादिप्रमाण-विरोधस्य परिहततया तथाविधविशिष्टयोस्तात्विकाभेदस्य प्रमाण-बाधितत्वाभावात् । तत एव नायोग्यतापत्तिरपि । एवंच तत्वंपद-योर्मुख्यार्थत्वेऽपि बोधसम्भवेन चिन्मात्रपरत्वं तत्वमसीति वाक्य-स्योपेयमित्यत्र बीजाभावः ।

किञ्च समानसत्ताकयोः प्रतियोग्यभावयोरिव समानसत्ताकयोः विरुद्धधर्मयोरेककालावच्छिन्नसामानाधिकरण्याभावरूपविरोधेनैकत्रैकदा समावेशासम्भवेऽपि ब्रह्मणि पारमार्थिकस्य स्वस्वरूपस्येशत्वस्य, व्याव-हारिकस्य जीवत्वस्य चाङ्गीकारे बाधकाभावेन तदुपहितयोरभेदस्या-

प्यबाधिततया तत्वमसीति वाक्यस्य प्रामाण्यसम्भवात् चिन्मात्रपरत्वं तादृशवाक्यस्योपेयमित्यत्र बीजाभाव एव ।

किञ्च 'सोऽयं देवदत्तः' इति दृष्टान्तोऽपि विषम एव । तथाहि- तत्र देवदत्तधर्मयोस्तद्देशकालसम्बन्धैतद्देशकालसम्बन्धयोर्मध्ये एकस्य प्रातिभासिकत्वमपरस्य व्यावहारिकत्वम् । तथा एकस्य पारमार्थिकत्वम् अपरस्य व्यावहारिकत्वमित्यङ्गीकर्तुमशक्यतया द्वयोर्व्यावहारिकयोरेवाङ्गीकर्तव्यतयोक्तरीत्या विरोधेनैकत्रैकदा समावेशायोगेन तद्विशिष्टयोरभेदस्य बाधिततया तत्राभेदबोधासम्भवस्य युक्तत्वात् । समानसत्ताकविरुद्धधर्मविशिष्टयोरभेदस्यैव बाधितत्वात् । तथैवाङ्गीकृतं त्वया । 'रज्वां ज्ञातायां भुजङ्गतत्वं ज्ञातं भवति । सा हि तस्य तत्वम्' इति भामतीग्रन्थेनैकस्यां रज्वां व्यावहारिकस्य रज्जुत्वस्य प्रातिभासिकस्य भुजङ्गत्वस्य चोपपादितत्वात् । तेन ज्ञायते समानसत्ताकविरुद्धधर्मविशिष्टयोरेवाभेदासम्भव इति । तथाच प्रकृते तत्वमसीति वाक्यात् व्यावहारिकजीवत्वविशिष्टे ब्रह्मणि पारमार्थिकेशत्वविषयकबोधजननोपगमसम्भवेन तथाविधवाक्यस्य प्रातिभासिकेशत्वविषयकबोधजनकत्वप्रयुक्ताप्रामाण्यापत्तेरनवकाशात् ।

नच 'नेह नानास्ति किञ्चन' इति श्रुत्या ब्रह्मणि पारमार्थिकधर्मसामान्यनिषेधात् तद्बाधेन न तत्वमसीति श्रुतेः पारमार्थिकेशत्वविषयकत्वमङ्गीकर्तुं शक्यमिति वाच्यम् । भूतहिंसात्वावच्छेदेन कर्तव्यतानिषेधपरस्य 'न हिंस्यात् सर्वा भूतानि' इति सामान्यवचनस्य यज्ञसम्बन्धिपशुहिंसायां कर्तव्यताविधायकेन 'अग्नीषोमीयं पशुमालभेत' इति विशेषवचनेने बाध इव प्रकृतेऽपि ब्रह्मणि पारमार्थिकधर्मसामान्य-

निषेधपरतया प्राप्तस्य नेहेति सामान्यवचनस्य ब्रह्मणि पारमार्थिकेशत्वविधायकेन तत्वमसीति विशेषवाक्येन बाधसम्भवात् तत्वमसीति वाक्यस्य नेहेत्यादिवाक्यबाधाभावेन तत्वमसीति वाक्यस्य पारमार्थिकेशत्वविषयकत्वस्यैव प्राप्त्या 'तत्वमसीति वाक्यस्य प्रातिभासिकेशत्वविषयकत्वेनाप्रामाण्यापत्तेः' इति त्वदीयदोषस्यानवकाशात् ।

ननु नेह नानेत्यादिवाक्यस्य बाधो नाम न तावदप्रामाण्यम् । अस्य श्रुतिवाक्यतया तस्याङ्गीकर्तुमशक्यत्वादिति चेन्न । 'न हिंस्यात् सर्वा भूतानि' इति श्रुतिवाक्यस्य यज्ञसम्बन्धिपशुहिंसाविधायकोक्तविशेषवचनसामर्थ्यात् पूर्वोक्तसामान्यवाक्यस्य यज्ञसम्बन्धिपशुहिंसातिरिक्तभूतहिंसात्वावच्छेदेन कर्तव्यतानिषेधपरतयोपवर्णनेन प्रामाण्योपपादनमिवास्यापि नेहेति वाक्यस्य पारमार्थिकेशत्वविधायकोक्तविशेषवचनबलेन पूर्वोक्तसामान्यवाक्ये ईशत्वातिरिक्तपारमार्थिकधर्मनिषेधपरतयोपवर्णनेन प्रामाण्यसम्भवात् । सामान्यवचनस्य विशेषवचनबलेनापाततः प्रतीतार्थपरित्यागेन विशेषवचनानुसारेणार्थं परिकल्प्य प्रामाण्योपपादनमेव प्रकृते बाध इति भावः ॥

॥ ॐ अथातो ब्रह्मजिज्ञासा ॐ ॥

यदत्रोक्तं परेण 'अस्मिन् सूत्रे विवरणाद्यभिमतेत्थमधिकरणरचना-प्रत्यगभिन्नब्रह्मविचारात्मकवेदान्तशास्त्रमारम्भणीयमुतानारम्भणीयमिति वक्ष्यमाणरीत्या विषयासम्भवसम्भवरूपपूर्वपक्षसिद्धान्तयुक्तिभ्यां संशये, अनारम्भणीयं विषयप्रयोजनयोरभावात् । तथाहि, नास्य शास्त्रस्य प्रत्यग् ब्रह्मैक्यं विषयः । 'अहं करोमि' इत्यादिप्रत्ययसिद्धकर्तृत्वादिजीवधर्मस्य

तद्विरुद्धस्याकर्तृत्वादेः ब्रह्मधर्मस्य चैकत्र समावेशायोगात् । नापि कर्तृत्वादिरूपबन्धनिवृत्तिः प्रयोजनम् । ज्ञानस्याज्ञानमात्रनिवर्तकत्वेन सत्यस्य कर्तृत्वादिबन्धस्य ज्ञानान्निवृत्त्ययोगात् । न च 'अहं करोमि, भुञ्जे' इत्यादिप्रत्यक्षस्य 'स्थूलोऽहम्' इत्यादिसंवादिप्रत्यक्षसजातीय-स्यासङ्गत्वादिबोधक-प्रबलागमानुसारेणान्तःकरणधर्मावगाहितया भ्रमत्वोपपत्तौ स्वाभाविकासङ्गत्वबाधितकर्तृत्वादेर्न ब्रह्मात्मैक्यविरोधित्व-मिति सम्भवत्येव ब्रह्मात्मैक्यं विषय इति वाच्यम् । प्रत्यक्षागमयोर्विरोधे उपजीव्यतया प्रत्यक्षानुसारेणागमस्यान्यथा नेयत्वात् । तमःप्रकाश-वद्विरुद्धस्वभावयोरात्मदेहाद्योः मम मनः, मम देह इति भेदग्रहे तत्तादा-त्म्यग्रहाधीन-तद्धर्माध्यासायोगाच्चेति पूर्वपक्षे सिद्धान्तः- 'अथातो ब्रह्मजिज्ञासा' इति ।

अयमत्र सिद्धान्ताभिप्रायः- तमःप्रकाशवद्विरुद्धस्वभावयोरप्यात्मा-नात्मनोर्वक्ष्यमाणन्यायैरद्वितीयप्रत्यगभिन्नब्रह्मात्मनि निर्णीततात्पर्य-कत्वेन प्रबलवेदान्तवाक्यजन्याखण्डब्रह्मसाक्षात्कारात्मकमनोवृत्तेः पूर्वम् 'अहं कर्ता भोक्ता' इति प्रतीयमानतादात्म्यान्यथानुपपत्त्या तादृशमनो-वृत्तिसमुच्छेद्यसकलभ्रमनिदानत्वेन कल्प्यमानानाद्यज्ञानेन कर्तृत्वाद्य-ध्यासेन न काचिदनुपपत्तिरिति सम्भवत्येव प्रत्यग् ब्रह्मात्मैक्यं विषयः'' इत्यादिना ।

(प्रथमसूत्रस्य पराभिमतपूर्वपक्षसिद्धान्तविमर्शः)

तत्रोच्यते । तत्र पूर्वपक्षस्तावदनुपपन्नः । 'अहं करोमि' इत्यादि-प्रत्ययसिद्धकर्तृत्वादिजीवधर्मस्याकर्तृत्वादेः ब्रह्मधर्मस्य चैकस्मिन्नेव चैतन्येऽन्तःकरणाद्युपाध्यवच्छेदेन तदनवच्छेदेनेति व्यवस्थाया समावेशस्य

त्वयाङ्गीकृततया 'तयोरेकत्र समावेशायोगात्' इत्यस्यासङ्गतत्वात् । नच द्वैतवादवेदान्तरीत्याऽयं पूर्वपक्ष इति वाच्यम् । सत्यस्य विषस्य गरुड-ध्यानेन, निगडबन्धस्य सत्यस्य प्रभुदर्शनेन निवृत्तेस्तैरङ्गीकृततया सत्य-स्यापि ज्ञाननिवर्त्यत्वप्राप्त्या द्वैतवादपक्षे 'सत्यस्य कर्तृत्वादिबन्धस्य ज्ञानान्निवृत्त्ययोगात्' इत्यस्यासङ्गत्यापत्तेः । अत एव 'ज्ञानस्याज्ञान-मात्रनिवर्तकत्वेन' इत्यप्यसङ्गतम् ।

नापि तार्किकरीत्यायं पूर्वपक्ष इति वक्तुं शक्यते । तैरप्येवमेवाङ्गी-कारात् । किञ्च 'नाहं गौरः' इत्यादिनिश्चयस्य देहात्मनोर्भेदविषयकस्य सत्त्वेऽपि मिथ्याज्ञानजन्यवासनारूपदोषविशेषेण देहात्मनोस्तादात्म्य-ग्रहाधीनस्य 'अहं गौरः' इत्यादितद्धर्माध्यासस्य हेत्वाभाससामान्य-निरुक्तौ 'अत्र वदन्ति' कल्पे मानसपदस्य दोषविशेषजन्यपर-तयोपवर्णनावसरे गदाधरेणाङ्गीकृततया तार्किकपक्षे 'देहात्मनोर्भेदग्रहे तत्तादात्म्यग्रहाधीनतद्धर्माध्यासायोगाच्च' इत्यस्यासङ्गतत्वाच्च ।

(आत्मानात्मनोः विरुद्धस्वभावत्वनिरासः)

सिद्धान्तोऽप्यनुपपन्न एव । तथाहि- तत्र यदुक्तम्- तमःप्रकाशवद्विरुद्ध-स्वभावयोरप्यात्मनात्मनोरिति । तन्न, तमसः प्रकाशाभावरूपतामङ्गी-कृत्य तमःप्रकाशयोः विधिनिषेधस्वभावात्मकविरुद्धस्वभावस्य तान्त्रिक-परिगृहीततया तद्वदात्मानात्मनोः विधिनिषेधस्वभावात्मकविरुद्धस्वभावस्य कैरप्यनङ्गीकृतत्वात् । नच तमःप्रकाशयोरीदृशविरुद्धस्वभावस्य तार्किकमात्रपरिगृहीततया सर्वसम्मत्यभावेन सर्वसम्मतयोरसामानाधि-करण्यरूपविरुद्धत्वमादाय दृष्टान्तोपपत्तिरिति वाच्यम् । एवं वदद्भिः तमःप्रकाशयोः नाश्यनाशकस्वभावत्वमङ्गीक्रियते न वा । नेति पक्षेऽनुभव-

विरोधः। आद्ये सामानाधिकरण्यं विना तयोर्नाश्यनाशकभावानुपपत्त्या तदर्थं तयोः सामानाधिकण्यस्यावर्जनीयतया तयोरसामानाधिकरण्यरूपविरुद्धत्वासम्भवात्।

न च भिन्नकाले तयोः सामानाधिकरण्यसम्भवेऽप्येककालावच्छेदेन सामानाधिकरण्याभावेनेककालावच्छिन्नसामानाधिकरण्यरूपविरुद्धत्वस्य तमःप्रकाशयोः सत्त्वेन दृष्टान्तोपपत्तिरिति वाच्यम्। कारणत्वस्य कार्याव्यवहितपूर्वकालावच्छिन्नवृत्तित्वरूपतया प्रकाशस्य तमोनाशकारणत्वानुरोधेन तन्नाशपूर्वक्षणे तदधिकरणेऽङ्गीकर्तव्यतया तयोरेककालावच्छिन्नासामानाधिकरण्यस्याप्यसम्भवात्। नच तमः प्रकाशयोरेककालावच्छिन्नासामानाधिकरण्याङ्गीकारे तयोरेककालावच्छेदेन प्रतीतिः स्यादिति वाच्यम्। क्षणस्यातिसूक्ष्मकालतया क्षणमात्रं तयोः सामानाधिकरण्यस्य तदप्रयोजकत्वेन तादृशप्रतीत्यापत्तेरनवकाशात्।

न च क्षणविशिष्टसामानाधिकरण्याभावः विरुद्धत्वम्। प्रकते तमःप्रकाशयोः क्षणविशिष्टसामानाधिकरण्याभावः सुलभः। सामानाधिकरण्ये क्षणवैशिष्ट्यं च स्वावच्छिन्नत्व-स्वान्यक्षणावच्छिन्नत्वोभयसम्बन्धेन। तथाच तमःप्रकाशयोः क्षणमात्रं सामानाधिकरण्यसत्त्वेऽपि न तथाविधसामानाधिकरण्यम्। उक्तोभयसम्बन्धेन क्षणविशिष्टत्वाभावादिति वाच्यम्। योग्यविभुविशेषगुणानां स्वानन्तरोत्पन्नविशेषगुणनाश्यतया यत्र ज्ञानोत्पत्त्यनन्तरक्षणोत्पन्नेच्छया ज्ञाननाशः, तत्र ज्ञानेच्छयोः सामानाधिकरण्यस्य क्षणमात्रावच्छिन्नतया तयोरुक्तसम्बन्धेन क्षणविशिष्टसामानाधिकरण्याभावप्राप्त्या उक्तोभयसम्बन्धेन क्षणविशिष्ट-

सामानाधिकरण्याभावस्य विरुद्धत्वरूपत्वे ज्ञानेच्छयोरपि विरुद्धत्वापत्तेः। न चेष्टापत्तिः। लोके तथा व्यवहाराभावात्।

एतेन नाश्यनाशकभावलक्षणविरोधो विवक्षित इति निरस्तम्। न चोक्तसामानाधिकरण्याभावस्य नाश्यनाशकभावस्य वा विरोधस्य प्रकृते एव विवक्षणान्न स्थलान्तरे तादृशविरोधमादाय ज्ञानेच्छयोर्विरोधापत्तिरिति वाच्यम्। 'अन्तस्तद्धर्मोपदेशात्' इत्यत्रादित्यान्तःस्थितं ब्रह्मैवेति त्वया सिद्धान्तकरणात्, आदित्ये चानात्मभूतरूपादेश्च सत्त्वेन ब्रह्मण्यादित्यान्तर्भावेण, आदित्यवृत्त्यनात्मभूतरूपादिसामानाधिकरण्यस्योक्तरूपस्यैव प्राप्त्योक्तसामानाधिकरण्याभावरूपविरोधस्य, अनात्मनः प्रपञ्चस्य ब्रह्मज्ञाननाश्यत्वस्य त्वयाङ्गीकृततयाऽनात्मप्रपञ्चस्य ब्रह्मनाश्यत्वाभावेन नाश्यनाशकभावलक्षणस्य विरोधस्य चात्मानात्मनोरसम्भवात्।

न चार्थप्रकाशनस्वभावतद्भिन्नस्वभावावेव विरुद्धस्वभावौ प्रकृते विवक्षितौ। ताभ्यामात्मानात्मनोः तमःप्रकाशदृष्टान्तः सङ्गत इति वाच्यम्। अर्थप्रकाशजननशक्त्यतिरिक्तस्य अर्थप्रकाशनस्वभावस्याभावेन सकलसामर्थ्यविधुरे ब्रह्मणि तथाविधस्वभावस्याङ्गीकर्तुमशक्यत्वात्। नच प्रकाशाप्रकाशस्वरूपौ विरुद्धस्वभावौ प्रकृते विवक्षितौ। प्रकाशतमसोरेतादृशविरुद्धस्वभावयोरिव, .आत्मानात्मनोरप्येतादृशविरुद्धस्वभावौ सम्भवतः। आत्मनः चिद्रूपतया प्रकाशस्वभावस्यानात्मनस्तु जडतयाऽप्रकाशस्वभावस्य च सम्भवेन तमःप्रकाशवदिति दृष्टान्तः सङ्गच्छत इति वाच्यम्। सादृश्यघटकस्य प्रकाशत्वस्य ज्ञानत्वरूपत्वे दृष्टान्ते प्रभारूपे प्रकाशे तस्यासम्भवात्। ज्ञानजननशक्तिमत्वरूपज्ञानजनक-

त्वस्य प्रकाशत्वरूपत्वेऽर्थक्रियासामर्थ्यविधुरे ब्रह्मणि दार्ष्टान्तिके तस्याभावात् ।

न च जनकता-तादात्म्यान्यतरसम्बन्धेन ज्ञानविशिष्टत्वं प्रकाशत्वमिति विवक्षणात् तस्य चिद्रूपब्रह्मप्रभोभयसाधारण्यं सम्भवति । प्रभायाः जनकतासम्बन्धेन ज्ञानविशिष्टत्वात् । ब्रह्मणश्च ज्ञानात्मकतया तादात्म्य-सम्बन्धेन ज्ञानविशिष्टत्वादिति वाच्यम् । ज्ञानपदेन वृत्तिज्ञानस्वीकारे जनकतासम्बन्धेन तद्विशिष्टत्वस्य प्रभायां सत्त्वेऽप्युक्तरीत्या ब्रह्मण्य-सम्भवात् । ब्रह्मात्मकनित्यज्ञानस्वीकारे तादात्म्यसम्बन्धेन ब्रह्मणि तद्वैशिष्ट्यसम्भवेऽपि प्रभायाः ब्रह्मानात्मकतया तेन सम्बन्धेन तद्वैशिष्ट्या-सम्भवात् । तन्निष्ठजन्यज्ञाननिरूपितजनकतायाश्च नित्यज्ञानानिरूपित-तया उक्तान्यतरसम्बन्धेन ज्ञानविशिष्टत्वस्य प्रभायामसम्भवेनोक्तान्य-तरसम्बन्धेन ज्ञानविशिष्टत्वरूपप्रकाशत्वस्य ब्रह्मप्रभोभयसाधारण्या-सम्भवात् ।

नच ज्ञानानां परस्परं भेदेऽपि नित्यानित्यज्ञानसाधारणस्य ज्ञानत्व-सामान्यस्यानुगततया स्वाश्रयजनकत्वस्वाश्रयतादात्म्यान्यतरसम्बन्धेन ज्ञानत्वविशिष्टत्वरूपं प्रकाशत्वं चित् ब्रह्मप्रभोभयसाधारणं भविष्यतीति वाच्यम् । तव मते वृत्तिज्ञानस्य ब्रह्मातिरिक्तत्वेनापारमार्थिकतया ब्रह्मात्मकनित्यज्ञानस्य पारमार्थिकतया पारमार्थिकापारमार्थिकोभय-साधारणस्य ज्ञानत्वसामान्यस्यासम्भवात् । पारमार्थिकापारमार्थिक-साधारणसामान्याङ्गीकारे बाष्पारोपितधूम-सत्यधूमोभयसाधारणस्य धूमत्वस्य प्राप्त्याऽग्निमत्त्वे साध्ये धूमत्वावच्छिन्नं व्यभिचारीति प्रसज्येत ।

वृत्तिज्ञानस्य पारमार्थिकसत्यत्वाभावेऽपि व्यावहारिकं सत्यत्व-

मङ्गीक्रियते। अत उभयसाधारणं ज्ञानत्वं सम्भवतीत्यपि न सत्। पारमार्थिकव्यावहारिकसाधारणस्यापि सामान्यस्याङ्गीकर्तुमशक्यत्वात्। अन्यथा तुल्यन्यायेन व्यावहारिक-प्रातिभासिकधूमसाधारणस्यापि सामान्यस्याङ्गीकर्तव्यतया प्राप्तत्वेन बाष्पारोपितप्रातिभासिकधूम-व्यावहारिकधूमसाधारणस्य धूमत्वस्य प्राप्त्याऽग्निमत्त्वे साध्ये धूमत्वावच्छिन्नस्य व्यभिचारितापत्तेर्दुर्वारतापत्त्या तद्वारणाय सामान्यं समसत्ताकसाधारणमेवेत्यङ्गीकर्तव्यतया विभिन्नसत्ताकयोः वृत्तिज्ञान-ब्रह्मात्मकनित्यज्ञानयोः साधारणस्य ज्ञानत्वस्यासम्भवेन नोक्तोभय-सम्बन्धेन ज्ञानत्वविशिष्टत्वं प्रकाशत्वं चित्‌ब्रह्मप्रमोभयसाधारणं भविष्यतीत्यलं विस्तरेणेति॥

(ब्रह्मात्मैक्यस्य शास्त्रविषयत्वाभावसमर्थनम्)

यदुक्तम्- 'प्रत्यगभिन्नब्रह्मात्मनिर्णीततात्पर्यकत्वेन प्रबलवेदान्त' इत्यादि तदपि न। प्रत्यचः स्वप्रकाशतया तदभिन्नत्वेन ब्रह्मणोऽपि स्वप्रकाशतया निश्चितत्वापत्त्या तत्र वेदान्तानां तात्पर्येऽनधिगतार्थ-गन्तृत्वाभावेन तेषामप्रामाण्यापत्तेः। 'अनधिगतार्थगन्तृ प्रमाणम्' इति त्वन्मतेऽङ्गीकारात्।

यदुक्तम्- 'अहं गौरः' इत्यारभ्य 'न काचिदनुपपत्तिः' इत्यन्तेन तदप्यसङ्गतम्। यदधीना यस्य सत्ता तयोरभेदेन व्यवहारस्य तथाऽभि-मान्यभिमन्यमानयोरभेदेन व्यवहारस्य च दर्शनेन प्रकृते चाहंपदार्थस्य गौरदेहस्वामितया तदभिमानितया च तथा तस्य मनःस्वामितया तदभिमानितया च 'अहं गौरः' इति देहतादात्म्यव्यवहारस्य 'अहं कर्ता'

इति मनस्तादात्म्यव्यवहारस्य चोपपत्तौ तदर्थं 'कर्तृताध्यासेन' इत्यस्य तदर्थम् 'अज्ञानेन' इत्यस्य चायोगात् ।

'सम्भवत्येव प्रत्यक्ब्रह्मात्मैक्यं विषयः' इत्यपि न सत् । सन्दिग्धस्यैव विषयतया ब्रह्मात्मैक्यस्य ब्रह्मातिरिक्तत्वमङ्गीकृत्य पारमार्थिकत्वाङ्गीकारे पारमार्थिकवस्तुद्वयाङ्गीकारेणाद्वैतहान्यपसिद्धान्तापत्या, ऐक्यस्य मिथ्यात्वे तत्प्रतिपादकानां तत्वमसीत्यादिवाक्यानामतत्वावेदकत्वप्रसङ्गेन तस्य ब्रह्मस्वरूपताया एवाङ्गीकर्तव्यतया ब्रह्मणश्चाहंप्रत्यये भासमान-प्रत्यगभिन्नतया, ब्रह्मणः निश्चितत्वे तदभिन्नैक्यस्यापि निश्चितत्वप्राप्त्या तस्य सन्दिग्धत्वाभावेन विषयत्वासम्भवात् । ब्रह्मात्मैक्यस्य व्यावहारिक-सत्यत्वात् तत्वमसीत्यादिवाक्यानां प्रामाण्यमुपपद्यत इति तूत्तरत्र सत्त्रैविध्यनिराकरणप्रसङ्गे निरसिष्यते । निराकृतं च सत्त्रैविध्यम् 'सत्त्रैविध्यं च मानेन सिध्येत् केनेति पृच्छते' इत्यनुव्याख्यानव्याख्या-वसरे सुधायां विस्तरेणेति ॥

किञ्च, ब्रह्मात्मैक्यम् असम्भवदुक्तिकमपि । 'नान्योऽतोऽस्ति कर्ता' इत्यादिश्रुत्या ब्रह्मण्यपरायत्तकर्तृत्वस्य सिद्धत्वेन बादरायणाचार्येण 'कर्ता शास्त्रार्थवत्वात्' इति सूत्रेण जीवे परायत्तकर्तृत्वस्य साधितत्वेन च ब्रह्मण्य-परायत्तकर्तृत्वादेः, जीवे परायत्तकर्तृत्वादेः सत्यतया सत्यभूतविरुद्ध-धर्माधिकरणत्वेन जीवब्रह्मणोः भेदस्यैव प्राप्तेः । नच श्रुतिसूत्रयोरपि मिथ्याभूतं कर्तृत्वादि बोध्यत इति वाच्यम् । मिथ्याभूतार्थप्रतिपादकत्वे श्रुतिसूत्रयोरप्रामाण्यापातात् ।

न च व्यावहारिककर्तृत्वस्य श्रुत्यादौ प्रतिपादनान्नाप्रामाण्यमिति वाच्यम् । विकल्पासहत्वात् । तथाहि- तत् व्यावहारिकं कर्तृत्वं बाध्यम्

अबाध्यं वा । नाद्यः । श्रुतेः बाध्यकर्तृत्वबोधकत्वेन अप्रामाण्यप्रसङ्गस्य दुर्वारत्वात् । द्वितीये फलितं चास्मन्मनोरथद्रुमेण । ब्रह्मण्यपरायत्त-कर्तृत्वादेः जीवे परायत्तकर्तृत्वादेः पारमार्थिकस्यैव प्राप्तेः । तस्मात् 'सम्भवत्येव ब्रह्मात्मैक्यं विषयः' इत्यसङ्गतम् ।

(परमते 'तत्त्वमसि' इति वाक्यस्यामुख्यार्थत्वसमर्थनम्)

'न च तत्त्वमसीति वाक्यस्य मुख्यार्थत्वानुपपत्तिश्चन्द्रिकोक्ता सम्यक्' इत्युक्त्वा 'उपक्रमोपसंहारादितात्पर्यनिर्णायकलिङ्गैः जीवब्रह्मैक्य एव तात्पर्यनिर्णयेन तात्पर्यविषयीभूतार्थबोधकत्वरूपमुख्यार्थत्वाबाधात्' इति यदुक्तं तदपि न शोभां बिभर्ति । तात्पर्यविषयीभूतार्थप्रतिपादकत्वं मुख्यार्थत्वं यदि तर्हि लोक इदं पदममुख्यार्थम्, इदं मुख्यार्थमिति व्यव-हारो न स्यात् । 'गङ्गायां घोषः' इत्यादावपि वक्तृतात्पर्यविषयी-भूततीरादिरूपार्थबोधकत्वेन मुख्यार्थत्वस्यैव प्राप्तेः । अतः शक्त्या बोध्यार्थत्वं मुख्यार्थत्वम्, लक्षणया बोध्यार्थत्वममुख्यार्थत्वमिति विवेकः कर्तव्यः । तथाच प्रकृते तत्वंपदयोः लक्षणया बोध्यार्थत्वेनामुख्यार्थत्वापत्या मुख्यार्थत्वानुपपत्तिश्चन्द्रिकोक्ता सम्यगेवेति ।

एतेन 'नच तत्वंपदलक्षितचिन्मात्रे भेदाप्रसक्त्या तदभेदबोधकवाक्य-वैयर्थ्याद् विशिष्टाभेदसम्भवोक्तिरपि युक्ता' इत्यभिधाय, 'यथा सोऽयं देवदत्तः' इत्यारभ्य 'विवरणाद्युक्तं युक्तमेव' इत्यन्तेन यदुक्तं तदपि निरस्तम् । तत्वमसीति वाक्याद्विशिष्टयोरभेदबोधने बाधकानां परिहृत-त्वात् ।

किञ्च, 'सोऽयं देवदत्तः' इति दृष्टान्तोऽपि विषम एव । तथा हि- 'सोऽयं देवदत्तः' इत्यत्र विशिष्टयोरभेदबोधासम्भवो युक्तः । व्यावहारिकेन

निमित्तेन समानसत्ताकाभ्यामेककालावच्छिन्नसामानाधिकरण्या-भावरूपविरोधशालिभ्यां तद्देशकालसम्बन्धेतद्देशकालसम्बन्धाभ्यां विशिष्टयोरभेदासम्भवात् । न तथा प्रकृते । जीवत्वस्य व्यावहारिकत्वेनेशत्वस्य पारमार्थिकत्वेन भिन्नसत्ताकत्वेन विरोधाभावेन तद्विशिष्टयोरभेदासम्भवबीजाभावेन तयोरभेदबोधे बाधकाभावात् । व्यावहारिकरजतत्वविशिष्टस्य व्यावहारिकशुक्तित्वविशिष्टेन साकं भेदस्य, प्रातिभासिकरजतत्वविशिष्टस्य व्यावहारिकशुक्तित्वविशिष्टेन साकमभेदस्य च त्वन्मतेऽङ्गीकृतत्वात् । तेन ज्ञायते समानसत्ताकविरुद्धधर्मविशिष्टयोरेवाभेदासम्भव इति ।

('सोऽयं देवदत्तः' इति वाक्यार्थोपवर्णनम्)

अङ्गीकृत्य चेदमुक्तम् । वस्तुतः 'सोऽयं देवदत्तः' इति वाक्यात् विशिष्टाभेदोऽपि बोधयितुं शक्य एव । तत्र तद्देशकालविशिष्टे एतद्देशकालविशिष्टत्वं प्रतिपाद्यते वा, एतद्देशकालविशिष्टे वा तद्देशकालवैशिष्ट्यम्, तदेतद्देशकालयोरैक्यं वा तद्विशिष्टयोरैक्यं वेति चतुर्धा विकल्प्य यानि दूषणानि कथितानि तानि वाक्कोलाहलप्रयोजनान्येव । तथाहि । तत्राद्ये प्रत्यक्षादिनेत्यारभ्य सत्त्वापत्तिश्चेत्यन्तेन दूषणद्वयं यदुक्तं तदसङ्गतम् । तथाहि । ''नाद्यः, प्रत्यक्षादिना यज्ज्ञातं तदुद्देशेनाज्ञातं ज्ञापयितुं 'सोऽयम्' इत्यादिवाक्यमुच्यते । तद्देशकालविशिष्टं तु न प्रत्यक्षमिति तद्देशकालविशिष्टत्वेन नोद्देश्यतासम्भवः'' इति वक्तुरभिप्रायः कः ? प्रत्यक्षेण ज्ञातस्यैवोद्देश्यत्वमिति नियमात् प्रकृते तद्देशकालविशिष्टस्य प्रत्यक्षासम्भवेन नोद्देश्यतासम्भव इत्यभिप्रायश्चेत्

तत्र वक्तव्यम् । अयं नियमः सर्वत्र वा सोऽयमित्यत्रैव वा । नाद्यः । आदिपदवैय्यर्थ्यात् ।

किञ्च 'शब्दगुणकमाकाशम्' इति लक्षणवाक्येन ज्ञातमाकाशमुद्दिश्य 'तच्चैकं विभु नित्यं च' इत्यनेन नित्यत्वविधानस्य नैय्यायिकेन कृतत्वात् । वेदान्तिनां मतेऽपि 'ब्रह्मविदाप्नोति परम्' इत्यादि वाक्येन ज्ञातं ब्रह्मोद्दिश्य 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिना सत्यत्वादिविधानस्याङ्गीकृतत्वाच्च । न द्वितीयः । स्वोत्प्रेक्षामूलाऽदृष्टकल्पनाया अनादरणीयत्वात् ।

किञ्च तद्देशकालसम्बन्धदशायां तद्देशकालसम्बन्धविशिष्टस्य प्रत्यक्षविषयत्वेन च तद्देशकालविशिष्टं तु न प्रत्यक्षमित्यस्यासङ्गतेः । नच कालस्याप्रत्यक्षत्वेन तत्प्रकारेण देवदत्तप्रत्यक्षासम्भवात् विशिष्टं न प्रत्यक्षमिति सङ्गतमिति वाच्यम् । सौरभांशेऽलौकिकसन्निकर्षजन्यस्य चन्दनांशे लौकिकसन्निकर्षजन्यस्य सुरभिचन्दनमिति प्रत्यक्षस्येव अत्रापि कालांशे ज्ञानलक्षणासन्निकर्षजन्यस्य, देवदत्तांशे चक्षुः सन्निकर्षजन्यस्य तद्देशकालप्रकारेण देवदत्तप्रत्यक्षस्य सम्भवेन विशिष्टं न प्रत्यक्षमित्यस्यासङ्गतत्वात् । नचैकविशिष्टेऽपरवैशिष्ट्यावगाहिबुद्धौ विशेष्यतावच्छेदकप्रकारेण विशेष्यप्रत्यक्षस्य कारणतया प्रकृते कार्याव्यवहितपूर्वं तादृशप्रत्यक्षाभावोपपादनाय तद्देशकालविशिष्टं तु न प्रत्यक्षमिति दूषणं सङ्गतमिति वाच्यम् । एकविशिष्टेऽपरवैशिष्ट्यावगाहिबुद्धौ विशेष्यतावच्छेदकप्रकारेण विशेष्यनिर्णयहेतुत्वस्य सर्वतान्त्रिकैरङ्गीकृतत्वेन तत्र विशेष्यतावच्छेदकप्रकारेण विशेष्यप्रत्यक्षत्वेनाहेतुत्वात्

तद्देशकालविशिष्टं तु न प्रत्यक्षमिति दूषणानवकाशात्। स्मरणादिनापि निर्वाहात्।

किञ्च देवदत्तस्य तद्देशकालसम्बन्धदशायां तद्विशिष्टदेवदत्तप्रत्यक्षस्य सम्भवेन तादृशप्रत्यक्षस्य स्वजन्यसंस्कारसम्बन्धेन 'सोऽयं देवदत्तः' इति बोधात् पूर्वं सत्त्वेन च तद्देशकालविशिष्टं तु न प्रत्यक्षमित्यस्यासङ्गतत्वात्।

तद्देशकालवैशिष्ट्यस्येदानीं सत्त्वापत्तिश्चेति द्वितीयं दूषणमप्यसङ्गतम्। तद्धर्मविशिष्टेऽपरधर्मवैशिष्ट्यावगाहिबोधस्य तद्धर्मोपलक्षितेऽपरधर्मवैशिष्ट्यावगाहिबोधतः ज्ञानाकारसाम्येऽपि वैलक्षण्यनिर्वाहार्थं तद्धर्मविशिष्टेऽपरधर्मवैशिष्ट्यावगाहिबोधे विशेषणं स्वविशेष्ये भासमानं सत् विशेष्यतावच्छेदके धर्मिपारतन्त्र्येण सामानाधिकरण्यसम्बन्धेन भासत इत्यङ्गीकृतत्वेन विशेषणविशेष्यतावच्छेदकयोः सामानाधिकरण्यमात्रस्यापेक्षितत्वेन प्रकृते तस्य सम्भवात् तद्देशकालवैशिष्ट्यस्येदानीं सत्त्वापत्तेरनवकाशात्। भवेदेतद्दूषणं विशेषणं विशेष्यतावच्छेदके एककालावच्छिन्नसामानाधिकरण्यसम्बन्धेन भासत इत्यस्ति चेत्। नैतदस्ति। कैश्चिदपि तान्त्रिकैरेवमनङ्गीकृतत्वात्।

यदि च, गादाधर्यां पक्षताग्रन्थे सिसाधयिषाविरहविशिष्टस्वाधिकरणक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसिसाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षतेति सार्वभौमपक्षतालक्षणे क्षणपदप्रयोजनकथनावसरे सिसाधयिषाविरहवैशिष्ट्यविशिष्टक्षणे स्वाधिकरणत्वस्य विशेषणतयैव विशेषणविशेष्यभावमहिम्ना चोद्देश्यतावच्छेदके विशेषणस्य स्वावच्छेदकत्वसम्बन्धेन, विशेषणे वा उद्देश्यतावच्छेदकस्य स्वावच्छिन्नत्व-

सम्बन्धेन भानसत्त्वेन प्रकृते स्वाधिकरणत्वरूपविशेषणे सिसाधयिषा-विरहवैशिष्टरूपविशेष्यतावच्छेदकस्य स्वावच्छिन्नत्वसम्बन्धेन भाने सिसाधयिषाविरहवैशिष्ट्यावच्छिन्नस्वाधिकरणत्वलाभसम्भवात् तदवच्छेदककालावच्छिन्नस्य तदवच्छिन्नत्वनियमेन, अनेनैवाभिन्नकालीनं सिसाधयिषाविरहवैशिष्ट्यं स्वाधिकरणत्वं च स्थूलकाले आदायोक्त-दोषवारणसम्भवे क्षणपदं व्यर्थमिति विचार्य सिसाधयिषाविरह-वैशिष्ट्योपलक्षिते स्वाधिकरणत्वनिवेशाभिप्रायेण क्षणपदोपादान-मित्युक्तत्वेन तद्वत् प्रकृतेऽपि विशेषणविशेष्यभावमहिम्ना विशेषण-विशेष्यतावच्छेदकयोः समानकालावच्छिन्नत्वपर्यवसितस्यावच्छेद्या-वच्छेदकभावस्य भानेन तद्देशकालवैशिष्ट्यस्येदानीं सत्त्वापत्तिश्चेति दूषणं सङ्गतमेव, इति विभाव्यते । तर्हि तत्र प्रष्टव्यं किमिदं दूषणं भवता तार्किकरीत्योच्यते उत वेदान्तरीत्या । नाद्यः । सोऽयं देवदत्त इत्यत्र तद्देशकालोपलक्षिते एतद्देशकालवैशिष्ट्यबोधस्य तैरङ्गीकारेणोक्ता-पत्तेरनवकाशात् । नच तावतापि तत्पदस्य स्वरूपमात्रपरत्वेऽयं दृष्टान्तो जात इति जितमस्माभिरिति न सन्तोष्टव्यम् । एतद्वाक्यं पदद्वयस्य स्वरूपमात्रपरत्वे दृष्टान्तयतस्तव सन्तोषे बीजाभावात् । सन्तोषकारणस्य पदद्वयस्वरूपमात्रपरत्वस्याभावात् ।

किञ्च तद्देशकालसम्बन्धोपलक्षिते एतद्देशकालवैशिष्ट्यबोधं वदद्भिर्नैयायिकैः तादृशबोधे विशेष्यतावच्छेदकतया तद्देशकालसम्बन्धस्य भानमङ्गीक्रियत एव । न पुनस्तत्र विशेष्यतावच्छेदके विशेषणस्य भानम् एतावन्मात्रमेव । नच भवदभिलषितस्वरूपमात्रपरत्वमीदृशं भवति । शुद्धस्वरूपे शुद्धस्वरूपस्याभेदेनान्वयस्य भवदभिमतत्वात् । तथाच

दृष्टान्ततयोदाहृते सोऽयमित्यादौ तत्पदस्य तत्वोत्तोपलक्षितस्वरूप-परत्वेऽपि भवदभिमतस्वरूपमात्रपरत्वाभावेनैकस्य तत्पदस्य स्वरूपमात्रपरत्वेऽप्यस्य दृष्टान्तस्य वैषम्यात् ।

द्वितीयेऽपि किं द्वैतवादिरीत्योच्यते उताद्वैतवादिरीत्या वा । नाद्यः । तैरयावद्विशेष्यभाविविशिष्टस्य विशेष्योपादानकत्वाङ्गीकारेण तद्देश-कालवैशिष्ट्यस्येदानीं कारणात्मना सत्त्वादुपादानोपादेययोः भेदा-भेदाङ्गीकारात् । तथा चेदानीं तद्देशकालसम्बन्धवैशिष्ट्यस्य कारणात्मना सत्त्वेनैव 'इदानीं सत्त्वापत्तिश्च' इति दूषणानवकाशात् । न द्वितीयः । तन्मतेऽपि तद्देशकालवैशिष्ट्यस्य ब्रह्माज्ञानोपादानकत्वेन व्याव-हारिकत्वात् वेदान्तजन्याखण्डब्रह्मसाक्षात्कारनिवर्त्यत्वाङ्गीकारेणेदानीं कारणात्मना सत्त्वस्य सिद्धत्वेनापत्तेरनवकाशात् ।

वस्तुतस्तु, सोऽयं देवदत्त इत्यादौ तत्तोपलक्षितदेवदत्ते एतद्देश-कालवैशिष्टबोधनमेव द्वैतवादिवेदान्तिनामप्यभिमतम् । तावतापि 'तत्त्वमसि' इत्यादौ पदद्वयस्य भवदभिमतचिन्मात्रपरत्वेऽयं दृष्टान्तो विषम एव । तथाहि । तद्देशकालसम्बन्धावच्छिन्नो देवदत्त एतद्देशकालसम्बन्ध-विशिष्ट इति तद्देशकालविशेष्यतावच्छेदककम् एतद्देशसम्बन्धप्रकारकं विशेष्यतावच्छेदके धर्मिपारतन्त्र्येण विशेषणानवगाहिज्ञानमेव भविष्यति सोऽयं देवदत्त इति वाक्यात् । न तथा बोधः तत्वमसीत्यत्र त्वदभिमत इत्यलं विस्तरेण ।

एतेन द्वितीयकल्पोक्तदूषणमपि निरस्तप्रायम् । तृतीयविकल्पोऽप्य-सङ्गत एव । असम्भाव्यमानत्वात् । लोके तावत् सम्भाव्यमानं विकल्पार्हं भवति । नहि 'बहिःशैवालवान् ह्रदः जलवान्' इति प्रयुक्ते शैवालजलयोर-

भेदं कश्चित् प्रतिपद्यते। विशिष्टस्य विशेष्यस्वरूपत्वाङ्गीकारेणैव विशिष्टस्य विशेषणविशेष्यसम्बन्धात्मकत्वमङ्गीकृत्य तन्निमित्तकं चतुर्थकल्पीयं दूषणमप्यसङ्गतमेव जातम्। तथा च कर्तृत्वादिबन्धस्य मिथ्यात्वाभावेऽपि तत्वमस्यादिवाक्यतात्पर्यविषयप्रत्यगभिन्नब्रह्मरूपविषयस्य सम्भवात् 'विषयार्थमध्यासवर्णनमिति विवरणमतं न युक्तम्' इति यच्चन्द्रिकाचार्यैरुक्तं तद्युक्तमेव।

'ननु जीवब्रह्मैक्यविषय एव सूत्रित इत्यत्र किं मानम् इति चेदुच्यते' इत्यारभ्य 'प्रत्यगभिन्नब्रह्मैव विचार्यमिति सिद्ध्यति' (शां.पा.भू, पु. १३) इत्यन्तेन यदुक्तं तदप्ययुक्तम्। जीवे कर्तृताध्याससम्भवे भिन्नविषयीयोरध्यासतत्वज्ञानयोः निवर्त्यनिवर्तकभावासम्भवात् तदन्यथानुपपत्त्या प्रत्यगभिन्नब्रह्मैव विचार्यमिति सिद्ध्येत्। 'अहं गौरः, अहं कर्ता' इत्यात्मानात्मनोरभेदव्यपदेशः महत्तत्त्वभिन्ने चतुर्मुखे स्वामित्वाभिमानित्वादिसम्बन्धं निमित्तीकृत्य 'महतश्चतुर्मुखात्' इति महत्तत्वचतुर्मुखयोरभेदव्यपदेश इवात्राप्युपपत्तौ जीवे कर्तृताध्यास इत्यस्यैवाभावात्।

किञ्च जीवे कर्तृताध्यासे कारणमपि न पश्यामः। न चाज्ञानमस्ति कारणमिति वाच्यम्। तस्यैव त्वन्मतेऽसम्भवात्। तथाहि। तत्किं ब्रह्माश्रितम्? उत जीवाश्रितम्, जडाश्रितं वा? आद्ये ब्रह्माश्रिताज्ञानेन ब्रह्मस्वरूपमावृतम्, तद्विशेषो वा। नाद्यः। ब्रह्मस्वरूपस्य स्वप्रकाशत्वेन 'स्वप्रकाशमावृतं च' इत्यस्य व्याहतत्वात्। न द्वितीयः। निर्विशेषत्वाङ्गीकारात्। द्वितीयः जीवाश्रितत्वपक्षोऽपि न सम्भवति। तस्य विशिष्टचैतन्यत्वेन मिथ्यात्वात् अज्ञानकल्पिततयाऽज्ञानसिद्धौ तत्कल्पितजीव-

सिद्धिः । जीवसिद्धौ तदाश्रिततयाऽज्ञानसिद्धिरित्यन्योन्याश्रयात् । कारणस्य कार्यानाश्रितत्वाच्च ।

एतेन जडाश्रितत्वपक्षोऽपि निरस्तः । त्वयाऽज्ञानस्य जडाश्रितत्वानभ्युपगमाच्च । तस्माज्जीवे कर्तृताध्यास एव नास्ति । अतः तदधीनप्रत्यगभिन्नब्रह्मणः विचार्यत्वाशा तु दूरोत्सारितेति ॥

(प्रसादस्य मोक्षसाधनत्वविमर्शः)

यत्तु, नारायणप्रसादादेव बन्धनाशरूपो मोक्षो न ज्ञानमात्रात् ।

'यस्य प्रसादात् परमार्तिरूपादस्मात् संसारान्मुच्यते नापरेण' इत्यादिश्रुतेः । 'मत्प्रसादात् तरिष्यसि' इत्यादिस्मृतेश्च । नच ज्ञानं विनात्यर्थप्रसादः ।

'कर्मणा त्वधमः प्रोक्तः प्रसादः श्रवणादिभिः ।
मध्यमो ज्ञानसम्पत्त्या प्रसादस्तूत्तमो मतः ॥
प्रसादात्त्वधमाद्विष्णोः स्वर्गलोकः प्रकीर्तितः ।
मध्यमाज्जनलोकादिरुत्तमस्त्वेव मुक्तिदः ॥'

इति पुराणात् । ज्ञानं च श्रवणादिसाध्यम् ।

'श्रवणं मननं चैव ध्यानं भक्तिस्तथैव च ।
साधनं ज्ञानसम्पत्तौ प्रधानं नान्यदिष्यते ।
नचैतानि विना कश्चित् ज्ञानमाप कुतश्चन ॥'

इति पुराणात् श्रवणादिसाध्यज्ञानस्य प्रसादफलकत्वावगमात् । श्रवणादिसाध्यज्ञानं प्रसादद्वारैव मोक्षहेतुः । तदुक्तं पुराणे-

'यथा दृष्ट्या प्रसन्नः सन् राजा बन्धापनोदकृत् ।
एवं दृष्टः स भगवान् कुर्याद्बन्धविमोचनम् ॥' इति ।

नचैवं सति 'दृष्ट्वैव तं मुच्यते' इति श्रुतावविधारणविरोध इति वाच्यम् । तस्यायोगव्यवच्छेदार्थकत्वात् । मोक्षहेतुप्रसादान्ययोग-व्यवच्छेदार्थकत्वाद्वा ।

अत एव,

'एवंज्ञाते तु भगवाननादिः पुरुषोत्तमः ।
प्रसीदत्यच्युतस्तस्मिन् प्रसन्ने क्लेशसङ्क्षयः ।'

इति विष्णुपुराणमपि सङ्गच्छते । तथा च मोक्षसाधनप्रसादहेतुतयैव विचारफलब्रह्मज्ञानस्य काम्यतेति परेणोक्तम्' इत्यन्तेन द्वैतवादिनां मतम् अनूद्य तदसदित्यभिधाय ''तत्त्वज्ञानोत्तरं यावता कालेन भुज्यमानकर्म-समाप्तिः तदन्यकालविलम्बनिषेधं कथयन्त्याः 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये । अथ सम्पत्स्ये' इति श्रुतेर्विरोधेन मुक्तौ ज्ञानेन प्रसादापेक्षायाः वक्तुमशक्यत्वात् । अन्यथा भुज्यमानकर्मकाले प्रसादानुत्पत्तौ तदन्य-कालविलम्बावश्यम्भावेनोक्तश्रुत्यर्थबाधापत्तेः ।

नच 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्' इति श्रुतिरपि ज्ञानस्य प्रसादापेक्षां दर्शयति । तया भक्तिजन्यप्रसादस्य तत्साक्षात्कार एवोपयोगस्य बोधनात् । 'यं पुरुषमेषः= परमत्मा, वृणुते= प्रसादेनानुगृह्णाति, तेन लभ्यः= साक्षात्क्रियते, ततस्तस्य सम्बन्धेनैषः= परमात्मा, स्वां तनुं= स्वस्वरूपम्, विवृणुते= प्रकटयति, आवरणं विनाश्य तेनैकीभवति' इति तादृशश्रुत्यर्थात् । नापि प्रारब्धकर्मक्षये

प्रसादविनियोगोक्तिः साधीयसी । प्रसादनिरपेक्षभोगादेव तत्सिद्धेः । 'प्रारब्धकर्मणां भोगादेव क्षयः' इति वचनसिद्धत्वात् । अत एव,

'तच्चिन्ताविपुलाह्लादक्षीणपुण्यचयात् तथा ।
तदप्राप्तिमहादुःखविलीनाशेषपातका ।
निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका ॥'

इति पुराणोक्तो आह्लाददुःखभोगयोरेव कर्मनाशकत्वमुक्तं न प्रसाद-स्येति सङ्गच्छते ।

किञ्चाधिष्ठानप्रमात्वेन मिथ्यानिवर्तकत्वस्य क्लृप्तत्वमिव ज्ञानस्य प्रसादहेतुत्वं न क्लृप्तम् । किन्तु सेवाया एव प्रसादहेतुत्वं लोके क्लृप्तम् । तदनुरोधेन 'तरति शोकमात्मवित्' इति श्रुत्या 'विद्वान्नाम रूपाद् विमुक्तः', 'ज्ञात्वा देवं मुच्यते सर्वपाशैः' इत्यादिश्रुत्या च ज्ञानस्यैव बन्धनिवृत्तिरूपमोक्षसाधनत्वबोधाङ्गीकारावश्यकत्वात् 'यस्य प्रसादात्' इत्यादेः ईश्वरसेवाजन्यप्रसादो ज्ञानद्वारेण मोक्षजनक इत्येवार्थः ।

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥'

इति श्रुत्या तथैव बोधनाच्च । न चोक्तपुराणवचनविरोधः । 'ज्ञानसम्पत्त्या प्रसादस्तूत्तमो मतः' इत्यत्र 'एवं ज्ञाते तु' इत्यादिविष्णुपुराणवाक्ये च ज्ञानं न तत्त्वदर्शनम् । किन्तु सर्वत्र विष्णुरूपत्वदर्शनरूपं समत्वमेव विवक्षितम् ।

'यतितव्यं समत्वे च निर्वाणमपि चेच्छता ।
देवा मनुष्याः पशवः पक्षिवृक्षसरीसृपाः ।

रूपमेतदनन्तस्य विष्णोर्भिन्नमिव स्थितम् ।
एतद्विजानता सर्वं जगत् स्थावरजङ्गमम् ।
द्रष्टव्यमात्मवत् विष्णुर्यतो यं विश्वरूपधृक् ॥'

इति पूर्ववाक्यात् । अत एव रागद्वेषविषयत्वायोग्यत्वरूपात्मतुल्यत्वस्य ज्ञानं सर्वत्र विष्णुरूपत्वदर्शनसमत्वस्य फलमित्युक्तम् । अत एव,

'सर्वत्र दैत्याः समतामुपेतसमत्वमाराधनमच्युतस्य ।
तस्मिन् प्रसन्ने किमिहास्त्यलभ्यम् ॥'

इत्युक्त्वा,

'समाश्रितात् ब्रह्मतरोरनन्तात् निःसंशयं प्राप्स्यथ वै महत् फलम् ।'

इत्यनेन विष्णुपुराण एव समत्वरूपाराधनजन्यप्रसादस्य तर्वाश्रयण-दृष्टान्तेन परम्परया मोक्षफलप्रयोजकत्वमुक्तं सङ्गच्छते । नहि सफलतर्वाश्रयणस्याव्यवधानेन फलप्रापकत्वनियमः । किन्तु लोष्ठादि-व्यापारव्यवधानेनेति । दृष्ट्वेत्यादेस्तु प्रसन्नो राजा पश्चात् दृष्टो यथा मोचकस्तथेश इत्यर्थः । नहि राजा बद्धं प्रति दृष्टिमात्रेण प्रसन्नः । प्रत्युत सापराधं बद्धं प्रति भूयो निग्राहकः । तमेवेत्यादिश्रुत्या 'विद्वान्नाम-रूपाद्विमुक्तः' इति श्रुत्या च शुद्धात्मज्ञानस्य सर्वद्वैतनिवर्तकत्वोक्त्या प्रसादहेतुत्वासम्भवाच्च । दृष्ट्वैवेत्यादौ प्रसादान्ययोगव्यवच्छेदपरत्व-मवधारणस्येत्युक्तिरप्ययुक्तैव । अदृष्ट्वा न मुच्यत इत्यस्यैव ततः प्रतीतेः । प्रसादस्याश्रुतत्वाच्च । एवञ्च जीवगतकर्तृत्वादिरूपबन्धनिवर्तक-त्वेनैव विचार्यप्रत्यगभिन्नब्रह्मज्ञानस्य काम्यत्वात् बन्धस्य सत्यत्वे तस्य ज्ञानान्निवृत्त्ययोगाद् बन्धनिवृत्तिरूपप्रयोजनार्थमेव भाष्येऽध्यासोक्ति-रित्यपि विवरणाद्युक्तं सम्यगेव'' (शां.पा.भू. पु.१६) इत्यन्तेन यदुक्तं

तदपि न सम्यक् । 'यस्य प्रसादात् परमार्तिरूपादस्मात् संसारान्मच्यते नापरेण' इति एका श्रुतिः । 'दृष्ट्वैव तं मुच्यते नापरेण' इत्येका । 'यमेवैष वृणुते तेन लभ्यः' इति श्रुतिः ,

'यथा दृष्ट्या प्रसन्नः सन् राजा बन्धापनोदकृत् ।
एवं दृष्टः स भगवान् कुर्याद्बन्धविभेदनम् ॥'

इति स्मृतिः,

'मत्प्रसादात्तरिष्यससि' ।
'बन्धको भवपाशेन भवपाशाच्च मोचकः ।'

इत्यादिस्मृतयश्च । एवमाद्यनेकश्रुतिस्मृतीनामन्यनिषेधपूर्वकं प्रसादस्य मोक्षसाधनत्वं कथयन्तीनां बहुत्वेन निरवकाशत्वेन च प्राबल्यात् तदनुसारेणैकत्वेन सावकाशत्वेन च दुर्बलायाः 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये । अथ सम्पत्स्ये' इति श्रुतेरर्थस्य कल्पनीयत्वात् । तथाहि- यावत्कालं प्रारब्धकर्मभिः न विमोक्ष्ये= मोचितो नास्मि तावदेव तस्य= अपरोक्षज्ञानस्यात्यर्थप्रसादजनने व्यवधानम् । अथ= प्रारब्धकर्म- नाशानन्तरमत्यर्थप्रसादं सम्पत्स्ये, इत्यर्थः । प्रारब्धकर्मनाशानन्तरम् परोक्षज्ञानेनात्यर्थप्रसादद्वारा ब्रह्मसम्पत्स्य इति वा भवेत् । अनेन प्रारब्धनाशात् पूर्वमपरोक्षज्ञानं प्रारब्धकर्मप्रतिबद्धं सत् नात्यर्थ- प्रसादोत्पादकम् । प्रतिबन्धकनाशे सति प्रसादमुत्पाद्य तद्द्वारा भगवत्- प्राप्तिलक्षणमोक्षसाधनं भवतीत्युक्तं भवति ।

नच 'दृष्ट्वैव तं मुच्यते नापरेण' इति श्रुतिः, 'तमेवं विद्वान्' इति श्रुतिः, 'विद्वान्नामरूपाद्विमुक्तः' इति श्रुतिश्च दर्शनमोक्षयोरन्तरा किञ्चिन्न सहन्त इति वाच्यम् । तं दृष्ट्वैव प्रसादं सम्पाद्य मुच्यते, भगवदपरोक्षज्ञान-

सम्पादितप्रसादेनैव मुच्यते नान्येन कर्मजन्यप्रसादेनेत्यर्थः । तमेवं विद्वानित्यस्यापि विद्वान् प्रसादं सम्पाद्येत्यर्थः । विद्वान्नामरूपद्विमुक्त इति श्रुतेरप्ययमेवार्थः। एवञ्च जीवगतबन्धस्य भगवत्प्रसादनिवर्त्यत्वेन ज्ञाननिवर्त्यत्वाभावात् बन्धस्य सत्यत्वे तस्य ज्ञानान्निवृत्त्ययोगात् बन्धनिवृत्तिरूपप्रयोजनार्थमेव भाष्येऽध्यासोक्तिर्युक्तेति विवरणोक्तमसदेवेति ॥

(सेतुदर्शनात् पापनिवृत्तिः)

'सेत्वज्ञानाकार्यस्यापि पापस्य सेतुदर्शनान्निवृत्तेर्न प्रयोजनार्थं तदुक्तिरिति चन्द्रिकोक्तं दूषणं तु न सत्' इत्यभिधाय 'नान्यः पन्था अयनाय विद्यते' इति श्रुतेर्बन्धनिवृत्तिरूपमोक्षस्य ज्ञानैकसाध्यत्वानुरोधेनाधिष्ठानाज्ञानकार्यस्याधिष्ठानसाक्षात्कारत्वेनाधिष्ठानसाक्षात्कारमात्रनिवर्त्यत्वनियमाक्षतेः । सेतुदर्शनमात्रस्य न दुरितनाशकत्वम् । दैवात्तत्रागतस्य म्लेञ्छादेरपि सेतुदर्शनाद्दुरितनाशप्रसङ्गात् । ज्ञानविधेर्बहुश आकरेषु निरस्तत्वाच्च । परिषदुपस्थापनपूर्वकछत्रपादुकादिवर्जन-दोषख्यापन-भिक्षाभोजित्व-दूरगामित्वादिव्रतकलापविशिष्टत्वेनैव दर्शनविधिः । तथाच विशेषणस्य व्रतकलापस्य कृतिसाध्यत्वाद् विशिष्टदर्शनविधिः सुवच इति तादृशदर्शननिवर्त्यपापस्य त्वधिष्ठानज्ञानमात्रनिवर्त्यत्वाभावात् कारणात्मना निवृत्यभावाच्च नात्यन्तिकी निवृत्तिः । आत्मज्ञाने तु न किञ्चित् विशेषणं कृतिसाध्यम् । कर्मसमुच्चयस्य निरसनीयत्वात् । श्रवणादीनां तत्वसाक्षात्कार एवोपक्षीणतयाऽत्माज्ञानकृतबन्धस्यात्मज्ञानमात्रनिवर्त्यत्वाक्षतेर्न किञ्चिदेतत्'' (शां.पा.भू. पु.१७) इत्यन्तेन यदभिहितं तदपि न सम्यक् । तथाहि- अनेन सेत्वज्ञानाकार्यपापस्य

सेतुदर्शनात् निवृत्तेर्व्यभिचारेण यत्रयत्र तत्साक्षात्कारनिवर्त्यत्वं तत्रतत्र तदज्ञानकार्यत्वमिति व्याप्तेरभावेऽपि तत्साक्षात्कारत्वेन तत्साक्षात्कारमात्रनिवर्त्यत्वं यत्र तत्र तदज्ञानकार्यत्वमिति व्याप्तिः सम्भवति। पापस्य तु निवर्तकं न सेतुसाक्षात्कारमात्रम्। किन्तु व्रतकलापसहितमेवेति पापस्य साक्षात्कारमात्रनिवर्त्यत्वाभावेनाज्ञानकार्यत्वाभावेऽपि व्यभिचाराभावादित्युक्तं भवति।

अत्रोच्यते, किमिदं तत्साक्षात्कारमात्रनिवर्त्यत्वं तत्साक्षात्कारेतराकारणक-तत्साक्षात्कारकारणकनाशप्रतियोगित्वमुत तत्साक्षात्कारेतरसाक्षात्काराकारणक-तत्साक्षात्कारकाणकनाशप्रतियोगित्वम्। नाद्यः। नाशं प्रति प्रतियोगिनोऽपि कारणतया व्याप्यस्यैवासिद्धेः। न द्वितीयः। व्रतकलापसाहित्येन सेतुदर्शनजन्यत्वेन पापनाशस्य सेतुसाक्षात्कारभिन्नव्रतकलापकारणकत्वेऽपि सेतुसाक्षात्कारेतरसाक्षात्काराकारणकत्वस्याबाधेन तत्र हेतुसत्त्वेन तदज्ञानकार्यत्वाभावेन व्यभिचारस्य दुर्वारत्वात्।

यदुक्तमात्माज्ञानकृतबन्धस्यात्मज्ञानमात्रनिवर्त्यत्वाऽक्षतेरित्यनेन तदयुक्तम्। बन्धं प्रत्यपि प्रसादसहकारेणैव तत्वसाक्षात्कारस्य निवर्तकतया तन्मात्रस्य निवर्तकत्वाभावात्। यदि प्रसादस्य साक्षात्कार एवोपक्षीणत्वेन साक्षात्कारमात्रनिवर्त्यत्वं बन्धस्य युक्तमिति विभाव्यते। तर्हि व्रतकलापसाध्यसेतुसाक्षात्कारस्य पापनाशकतया व्रतकलापस्य सेतुसाक्षात्कारे उपक्षीणतां परिकल्प्य पापस्य सेतुसाक्षात्कारमात्रनिवर्त्यत्वं निराबाधमिति वक्तुं शक्यत इति साम्यमेव। एवं साम्येऽपि प्रसादादीनां

तत्वसाक्षात्कारे उपक्षीणत्वं कल्पनीयं सेतुस्थलेन न कल्पनीयमित्यत्र किं राज्ञामाज्ञास्तीत्यलं बहुना ॥

(शुद्धो न भातीति वाचस्पतिवाक्यविमर्शः)

'यदपि चन्द्रिकायां व्यासतीर्थेनोक्तम्। शुद्धो न भातीति कोऽर्थः ? किमात्मस्वरूपे किञ्चिद्भाति, किञ्चिन्न भाति ? किं वात्मस्वरूपमेव न भाति ? यद्वा नात्मापि भातीति ? आद्येऽभासमानोंऽशः शरीरादिभ्यो भेदो वा कर्तृत्वभोक्तृत्वाद्यभावो वा ब्रह्मात्माभेदो वा द्वितीयमात्राभावो वा। स सर्वोऽप्यात्मभिन्नः सत्यश्चेदपसिद्धान्तः। मिथ्या चेन्न तत्वावेदक-शास्त्रवेद्यः। आत्ममात्रत्वे द्वितीयपक्षान्तर्भावः। तथापि कल्पितेन भेदेनागृहीत इव भीतीति चेन्न। तत्वतो गृह्यमाणेऽधिष्ठाने भेदकल्पनाया अगृहीतत्वारोपस्य चायोगात्। नच मिथ्याभूतेनापि तेनोपलक्षितात्मा शास्त्रवेद्यः, स च सत्य इति वाच्यम्। स्वप्रकाशत्वेन नित्यसिद्धात्माव-बोधार्थमुपलक्षणत्वोक्त्ययोगात्। उपलक्षणत्व एव तात्पर्ये चाप्रामाण्या-पातात्। अत एव न द्वितीयः। तस्य स्वप्रकाशत्वेनाभानायोगात्। स्वप्रकाशस्याप्यविद्यावशेनाभानेऽविद्यादुःखादेः प्रकाशो न स्यात्, तस्य चैतन्यप्रकाशाधीनप्रकाशत्वोपगमात्। युक्तं चापौरुषेयस्याप्यागमस्य शङ्किततात्पर्यभ्रमरूपदोषस्य 'यजमानः प्रस्तरः' इत्यादेरिव प्रत्यक्षविरोधेन प्रतीतार्थच्यावनम्। उक्ता च त्वयापि तत्वमसीति वाक्ये प्रत्यक्षाविरोधाय तत्वं पदलक्षणा। तस्मात् परमते स्वरूपमात्रस्य स्वप्रकाशत्वेन नित्य-सिद्धत्वात्, अन्यस्य चाज्ञानकल्पितत्वेनाज्ञानविषयत्वायोगादज्ञाना-सम्भवादज्ञातो विषयः, अज्ञाननिवृत्तिः फलम्, अज्ञानी चाधिकारी न युक्त इति शास्त्रमनारम्भणीयमेवेति भामतिमतं तावदयुक्तमेवेति वाचस्पतिदूषणम्।

तत्र ब्रूमः- जिज्ञासासूत्रे उक्तरीत्या विचारफलत्वेन सूत्रितस्य ब्रह्मज्ञानस्य जीवगताविद्यादिबन्धनिवर्तकत्वेनैव काम्यत्वात् 'दृश्यते त्वग्रया बुद्ध्या' इति श्रुत्या 'तत्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनम्' 'ज्ञाने त्वनाहते तस्मिन् सर्वं ब्रह्ममयं भवेत्' इति बृहन्नारदीय-वचनेन ज्ञानशब्दोदितसाक्षात्कारत्वेनानाहतशब्दोदितदोषराहित्यादिना च युक्तं वेदान्तजन्यशुद्धब्रह्मात्मैक्यज्ञानस्यैव सकलभ्रमनिदानाविद्या-निवर्तकत्वम् । दोषाश्च 'इदं वाक्यं प्रत्यगभिन्नब्रह्मपरं न भवति' इति प्रकरणासम्भावनारूपः । 'विरुद्धतया भासमानस्य कथं ब्रह्माभेदः' इति प्रमेयासम्भावनारूपो द्वितीयः । कर्तृताध्यासस्य स्वरसवाहितारूपो विपरीतभावनात्मकस्तृतीयः। ते च श्रवणमनननिदिध्यासनैः प्रत्येकं क्रमेण निरसनीयाः । तथाच निदिध्यासनान्तसाधनैर्निरुक्तदोषापगमे वेदान्त-वाक्यजन्यनिर्विकल्पकब्रह्मात्मैक्यसाक्षात्कार एवाविद्यानिवर्तकः । अहंप्रत्ययस्तु न तादृशसाक्षात्कारात्मक इत्येव 'अहंप्रत्यये शुद्धो न भाति' इत्यस्य वाचस्पतिवाक्यस्यार्थः । वेदान्तवेद्य इति तद्वाक्येनायमेवार्थः सूचितः । अन्यथा शुद्धोऽहं प्रत्यये न भातीत्येव वक्तव्ये वेदान्तवेद्य इत्यनर्थकमेव स्यात् । तथा च तादृशात्मसाक्षात्काराय वेदान्तविचारा-त्मकशास्त्रमारम्भणीयमेवेति वाचस्पत्युक्तं सम्यगेव' (शां.पा.भू. पु. १९) इति यदुक्तं तदयुक्तम्। तथाहि। तत्र ब्रह्मज्ञानस्य जीवगताविद्यादि-बन्धनिवर्तकत्वमभिहितं तन्न सङ्गच्छते । अविद्याया आश्रयविषय-निराकरणेन कृतनिराकरणत्वात् ।

यदुक्तम्, तत्वमस्यादिवाक्योत्थं ज्ञानं मोक्षसाधनम् इति तदप्यसङ्ग-तम् । अभेदसम्बन्धावच्छिन्नतद्धर्मावच्छिन्नप्रकारतानिरूपितविशेष्यता-

वच्छेदकतासम्बन्धेन शाब्दं प्रति तद्धर्मभेदस्य कारणतायाः 'घटो घटः' इति वाक्यात् बोधापत्तिवारणायावश्यं कल्पनीयत्वेन प्रकृते तत्वमसीत्यत्र पदद्वयस्य लक्षणामङ्गीकृत्य स्वरूपमात्रपरत्वस्य त्वयाऽङ्गीकृतत्वेन चैतन्यत्वधर्मितावच्छेदककचैतन्यत्वविधेयतावच्छेदककशाब्दबोधस्यैव प्रसक्ताङ्गीकारत्वेनोद्देश्यतावच्छेदकविधेयतावच्छेदकभेदरूपकारण-बाधेन तत्वमसीति वाक्यात् भवन्मते शाब्दबोधजननोपायाभावात् । तस्यैवानिष्पत्तौ तदधीनब्रह्मात्मैक्यसाक्षात्कारकारणत्वोक्तिः सति कुड्ये चित्रं कर्मेति न्यायमनुसरति ।

यदपि मोक्षसाधनस्य तत्वमस्यादिवाक्योत्थज्ञानस्य दोषराहित्यादिना सहितत्वोपपादनाय 'ज्ञाने त्वनाहते तस्मिन् सर्वं ब्रह्ममयं भवेत्' इति बृहन्नारदीयवचनोदाहरणं तदपि न शोभते । तथाहि । अनाहते= निर्दुष्टे, तस्मिन् ज्ञाने= ब्रह्मात्मैक्यसाक्षात्कारे प्राप्ते सति, सर्वं ब्रह्ममयम्= समस्तं ब्रह्मात्मकं भवेदिति वा, उत सर्वं ब्रह्ममयं भवेदित्यनाहते तस्मिन् ज्ञाने= ब्रह्मात्मैक्यसाक्षात्कारे जाते सति बन्धनिवृत्तिर्भवतीति वा तदर्थः । नाद्यः । स्वस्य ब्रह्मैक्यसाक्षात्कारः स्वस्य ब्रह्मैक्यप्राप्तिहेतुः स्यात् न त्वन्यस्येति सर्वं ब्रह्ममयं भवेदित्यस्यासङ्गत्यापत्तेः । न द्वितीयः । स्वस्य ब्रह्माभेदज्ञानस्य स्वाध्यस्तबन्धनिवर्तकत्वेन समस्ते ब्रह्माभेदज्ञान-स्यानुपयुक्तत्वात् । समस्तजडादिप्रपञ्चे ब्रह्माभेदस्य बाधितत्वाच्च ।

यदप्यहंप्रत्ययस्तु न तादृशसाक्षात्कारात्मक इत्येवाहंप्रत्यये शुद्धो न भातीत्यस्य वाचस्पतिवाक्यस्यार्थ इति तदसत् । तथाहि । भातीत्यत्र धात्वर्थः भानं विषयता । आख्यातार्थ आश्रयत्वम् । सप्तम्यर्थः निरूपि-तत्वम् । तथाच सप्तम्यन्तार्थस्य अहंप्रत्ययनिरूपितत्वस्य भानेऽन्वयः ।

तस्याख्यातार्थाश्रयत्वेऽन्वयः। तस्य प्रतियोगितया नञर्थाभावे, तस्यानुयोगितया शुद्धेऽन्वयः। एवञ्च 'अहंप्रत्ययनिरूपितविषयत्वाभाववान् शुद्धः' इति शुद्धो न भातीति वाक्यात् बोधो भविष्यति। तुल्यवित्तिवेद्यत्वपक्षे 'शुद्धविषयकत्वाभाववानहं प्रत्ययः' इति। 'अहंप्रत्ययस्तु वेदान्तवाक्यजन्यनिर्विकल्पकब्रह्मात्मैक्यसाक्षात्कारात्मको न' इत्यस्य पूर्वोक्तवाक्यात् कथमप्यप्रतीतेः, तादृशसाक्षात्कारबोधकपदाभावात्। तथाविधबोधजनकसमभिव्याहाराभावाच्च। एवंस्थिते कथमप्यप्रतीतस्य तादृशवाक्यार्थत्वमुपपाद्य स्वरसतः शुद्धो न भातीति वाक्यात् प्रतीतानां चन्द्रिकाचार्योक्तानां विकल्पानां 'कथमप्यप्रतीतानाम्' इति कथमप्यप्रतीतत्वं वदन् कथमकुशलो न स्यादिति।

स्वरसतः प्रतीतत्वप्रकारस्तु- लोके तावत् 'अयं शुद्धो ब्राह्मणः न भाति' इति केनचित् वाक्ये प्रयुक्ते सति श्रोता तादृशवाक्यात् ब्राह्मणधर्मेषु मध्ये कांश्चित् प्रतीत्य कांश्चिदप्रतीत्य, ब्राह्मणधर्माः सर्वे न सन्त्यत्र। अतोऽयं ब्रह्मणो न वेति प्रतिवक्ता दृश्यते। तद्वदत्रापि आत्मस्वरूपमेव न भातीति विकल्पस्य प्रतीतत्वं स्फुटम्।

असति बाधके सर्वं वाक्यं सावधारणमिति सत्त्वात् शुद्धो न भातीत्युक्तौ शुद्ध एव भातीति न, किन्तु अनात्मापि भातीति सम्भवेनास्यापि विकल्पस्य शुद्धो न भातीति वाक्यात् प्रतीत्वमिति।

'तथाहि- आत्मस्वरूपे किञ्चित् बुद्ध्यादिसहितत्वांशो भाति तद्विनिर्मुक्तत्व-कर्तृत्वाभावाद्यंशो न भातीति तदर्थः साधुरेव। तस्याभासमानांशस्याधिकरणात्मकत्वेन तदात्मना सत्यत्वमेव। तदंशत्वेन मिथ्यात्वेऽपि मिथ्यात्वेन तद्बोधकशास्त्रस्य तत्वावेदकत्वाबाधाद्'

(शां.पा.भू. पु. १९) इत्यनेन 'अत्मस्वरूपे बुद्ध्यादिसहितत्वांशस्य भानमङ्गीकृत्य कर्तृत्वाद्यभावाद्यंशस्य भानमस्वीकृत्याभासमानांशस्याधिकरणात्मकत्वेन तदात्मना सत्यत्वात् तदंशत्वेन कर्तृत्वाभावादीनां मिथ्यात्वेऽपि तद्बोधकशास्त्रस्य तत्वावेदकत्वमबाधितम्' इति यदभिहितं तदसत् । कर्तृत्वाद्यभावस्य भासमानाधिकरणस्वरूपत्वमङ्गीकृत्याभासमानत्वोक्तेर्व्याहतत्वात् ।

किञ्च कर्तृत्वाद्यभावस्याधिकरणात्मकत्वे ब्रह्मण अभावरूपत्वेन तुच्छत्वापत्त्या तव शून्यवादिनः सकाशाद्वैलक्षण्यं न स्यादित्यापत्तिसम्भवेन कर्तृत्वाद्यभावेऽधिकरणात्मकत्वस्य वक्तुमशक्यत्वाच्च । नचेदं दूषणं भवन्मतेऽपि समानम् । दोषात्यन्ताभावस्य भगवल्लक्षणत्वेन भगवल्लक्षणस्य भगवताऽभेदाङ्गीकारादिति वाच्यम् । अस्माभिः भेदकार्यनिर्वाहकस्य विशेषस्याङ्गीकारात्, दोषात्यन्ताभावस्य भगवताऽत्यन्ताभेदेऽपि निर्विशेषात्यन्ताभेदाभावेन ब्रह्मणः तुच्छत्वाद्यापत्तिवारणसम्भवात् । नच मयापि तथा वक्तुं शक्यमिति वाच्यम् । त्वया विशेषानभ्युपगमात् ।

अथवा न दोषात्यन्ताभावः भगवतः स्वरूपलक्षणम् । किन्त्वतिरिक्तं तटस्थलक्षणम् । अतोऽपि नानुपपत्तिः । नचैवं सति भगवद्धर्माणां भगवता साकं भेददर्शनं निन्दयन्त्या एवंधर्मानिति श्रुतेर्विरोध इति वाच्यम् । धर्मानित्यस्य भावात्मकानिति पूरणात् ।

एतेन कर्तृत्वाद्यभावस्याधिकरणात्मना भासमानत्वं तद्धर्मत्वेनाभासमानत्वं च सङ्गच्छत इति निरस्तम् । उक्तरीत्याधिकरणस्वरूपत्वस्याङ्गीकर्तुमशक्यत्वात् ।

यदपि (शां.पा.भू. पु. १९) 'तस्य स्वप्रकाशात्मस्वरूपत्वेऽपि कल्पितेन भेदेनागृहीत इव भातीत्यपि सुवचम् । अधिष्ठानसाक्षात्कारात्मकग्रहविशेषस्यैव वक्ष्यमाणरीत्या सकलकल्पनानिदानाविद्यानिवर्तकत्वात्' इत्यन्तेनाभिहितं तदसत् । मायाऽविद्याभेदेनाज्ञाने द्वैविध्यमङ्गीकृत्य तत्राम्बरादिविश्वं मायोपादानकं व्यावहारिकम् । शुक्तिरजताद्याविद्यकं प्रातिभासिकमिति भवन्मतेऽङ्गीकारेणाम्बरादिविश्वस्य निर्विकल्पकात्मकब्रह्मसाक्षात्कारबाध्यत्वमन्यस्याविद्योपादानकस्य शुक्तिरजतादेः यथायथं तदितरज्ञानबाध्यत्वमङ्गीकृतमित्यविद्यायाः प्रातिभासिकशुक्तिरजताद्युपादानत्वेऽपि व्यावहारिकोपादानत्वाभावेनाविद्यायाः सकलकल्पनानिदानत्वाभावात् । अविद्याया एव सकलकल्पनानिदानत्वे प्रातिभासिकव्यावहारिकविवेको न स्यात् । अस्तु नाम तद्यथातथा । 'ग्रहविशेषस्यैव' इत्यत्र ग्रहविशेषत्वेन भवदभिमतवेदान्तवाक्यजन्याखण्डब्रह्मसाक्षात्कारनिवर्त्त्याविद्यायाः व्यावहारिककल्पनानिदानत्वेऽपि प्रातिभासिककल्पनानिदानत्वाभावात् सकलकल्पनानिदानत्वोक्तेरसङ्गतत्वात् । नच सकलपदं प्रातिभासिकातिरिक्तसकलपरम् । अतो न दोष इति वाच्यम् । तथासति ब्रह्मणि क्षणिकत्वकल्पनाया इवाग्रहीतत्वकल्पनाया अपि प्रातिभासिककल्पनात्वेन तत्कल्पनायां त्वदभिमतग्रहविशेषनिवर्त्यत्वाभावेन तत्वतः अधिष्ठानस्वरूपग्रहसामान्यस्यैवाग्रहीतत्वकल्पनानिवर्तकतया 'तत्वतो गृह्यमाणेऽग्रहीतत्वारोपायोगात्' इति चन्द्रिकोक्तं साध्वेव ।

यदपि, 'आत्मापि न भातीत्यर्थोऽपि सुवचः' इति प्रतिज्ञाय मध्ये 'यद्यप्यात्मा जन्तुमात्रस्य सन्देहविपर्ययापरोक्षपरोक्षप्रमास्थले, तदभाव-

दशायां सुषुप्ति-योगशास्त्रसिद्धनिरोधाख्यसमाधिकालयोश्च एकरूपेण तत्साक्षितया निर्णीतः प्रथते । आन्तराश्च ज्ञानादयः सहोत्पत्तिविनाशाभ्यामव्यभिचरितप्रकाशाः । तदेतत्सर्वं स्वप्रकाशसाक्षिणमन्तरोपपादयितुमशक्यम् । सुषुप्त्यादौ जन्यज्ञानासम्भवात् । तार्किकादिमतेऽनुव्यवसायगम्यं ज्ञानम् । न चोत्पन्नज्ञाने नियमेन तदनुव्यवसायोऽस्तीति सुवचम् । तथा सत्यनन्तरज्ञानधाराणामविच्छेदप्रसङ्गेन बाह्यव्यवहारविलोपप्रसङ्गात् । ज्ञानोत्पत्तिप्रत्यक्षं च दुर्वचम् । प्रत्यक्षे विषयस्य कारणत्वात् उत्पत्यनन्तरक्षणे तेन भवितव्यम् । तत्र चोत्पत्तेरभावः, तस्याः क्षणिकत्वात् । आत्मनोऽव्यभिचरितप्रकाशत्वं तन्मते न सम्भवति । स्वगतविशेषगुणानवगाह्यात्मप्रत्यक्षस्य तन्मतेऽनङ्गीकारात् । आत्मनोऽव्यभिचरितप्रकाशत्वायानन्तज्ञानधाराभ्युपगमे बाह्यपदार्थविज्ञाविलयप्रसङ्ग इति स्वप्रकाश आत्माऽवश्यमभ्युपगन्तव्यः । तथाच तस्याभानायोगः । तथापि 'अस्ति भाति' इत्येवंरूपाव्यभिचारप्रकाशत्वाय सद्रूपेण भानात्मनाऽभानासम्भवेऽपि साक्षिस्वरूपानन्दे भासमानेऽपि स्वरूपप्रकाशेन सहानुवर्तमानानाद्यविद्यया दुःखाद्यपुरुषार्थसम्बन्धोऽपि तत्रारोपितः । तथा तारतम्यापन्नतत्तद्विषयसम्पर्कजनितवृत्तितादात्म्याध्यासात् साक्षिण्यपि तारतम्यमध्यस्तम्' (शां.पा.भू. पु. २०)इति वाग्जालमुपपाद्य 'ततश्च स्वरूपभूतनिरतिशयानन्देऽनुभूयमानेऽपीतोऽप्यधिक आनन्दोऽस्ति । स मम न भाति । स मयाऽनवाप्त इत्येवं कल्पिताभानयोग एव न भातीत्यस्यार्थः' इति शुद्धो न भातीत्यस्यार्थवर्णनं मुखमस्तीति न्यायम् अनुसरति । नहि लोकेऽहंप्रत्यये घटो न भातीत्युक्त इतोऽप्यधिकघटोऽस्ति, स मम न भाति, स मयाऽनवाप्त इति प्रतिपद्यते कश्चित् ।

यदपि, ''एतेन 'स्वप्रकाशस्याप्यविद्यावशेनाभानेऽविद्यादेः प्रकाशो न स्यात् । तस्य चैतन्यप्रकाशधीनप्रकाशत्वात्' इति चन्द्रिकोक्तदूषणं निरस्तम् । सदाद्यात्मना साधारणाकारेणऽत्मप्रकाशस्याहमित्यसाधारणाकारेणात्मानमवगाह्य तत्र विशेषणावगाहि 'अहमज्ञः' इति प्रकाशं प्रत्यहेतुत्वात् । अन्यथा पुरुषस्य भूतलत्वेन भूतलज्ञानशून्यत्वेऽपि सदात्मना भूतलप्रकाशमादाय भूतलं घटवदिति प्रकाशापत्तेः ।''

''एतेन 'दुःखादेः श्रवणादिजनितसंस्कारसहकृतान्तःकरणवृत्तिनाश्यत्वे शुक्तिरूप्यादौ मिथ्याभूते तददर्शनात् सत्ये भ्रमरादिध्याननिवर्त्ये कीटादौ तद्दर्शनादज्ञानस्य सत्यत्वं च स्यात्' इति चन्द्रिकोक्तदूषणं निरस्तम्'' (शां.पा.भू.पु. २१) इत्यभिधाय 'प्रमाणबलेन शुक्त्यधिष्ठानापरोक्षस्यैव शुक्तिरूप्याज्ञाननिवतर्कत्वात् विजातीयाविषयकध्येयमात्रविषयकवृत्तिसन्तानरूपस्य ध्यानस्येच्छाधीनस्य तदनधीनज्ञानतो वैलक्षण्येन तत्वज्ञानत्वाभावच्च न प्रत्युदाहरणत्वसम्भवः' इति यदभिहितं तदप्यसत् । चन्द्रिकावाक्यस्यायमभिप्रायः । अन्तःकरणवृत्तिपदेन ध्यानं स्वीकर्तव्यम् इति ध्यानपरिचयार्थमेव सहकृतान्तम् । न तु तस्य हेतुकोटौ निवेशः । यत्र ध्याननिवर्त्यत्वं तत्र सत्यत्वमिति व्याप्तिसम्भवेन व्यभिचाराद्यवारकतया हेतुकोटौ तस्यानिवेशात् । अत एव कीटत्वमन्वयदृष्टान्तः सङ्गच्छते । अन्यथा कीटस्य श्रवणमननाद्यसम्भवेन तत्सहकृतान्तःकरणवृत्तिनाश्यत्वस्य कीटत्वे दुरुपपादतया तस्य दृष्टान्ततयोदाहरणमसङ्गतं स्यात् । तथाच यत् ध्याननिवर्त्यं तत्सत्यम्, यथा कीटत्वम् । यन्न सत्यं तन्न ध्याननिवर्त्यं यथा शुक्तिरूप्यमिति व्याप्तिसत्त्वेनाज्ञानस्य ध्याननिवर्त्त्यत्वे धर्मिसत्तासमसत्यत्वं स्यादिति ।

एवं स्थिते प्रमाणबलेनेत्यारभ्य न प्रत्युदाहरणत्वसम्भव इत्यन्तेन किं वक्तुमुद्यतो भवान् । शुक्तयधिष्ठानापरोक्षस्यैव शुक्तिरूप्याज्ञाननिवर्तकत्वात् ब्रह्माज्ञानस्यापि ब्रह्मसाक्षात्कारनिवर्त्यत्वमेवेति वा, उताधिष्ठानाज्ञानस्याधिष्ठानतत्वज्ञाननिवर्त्यत्वेन ध्यानस्य तत्वज्ञानत्वाभावादिति वा । कल्पद्वयस्यापि प्रकृतोपयोगं न पश्यामः । अबाधितव्याप्तिद्वयसहितपूर्वोक्तानुमानेन अज्ञानस्य सत्यत्वं स्यादित्यापादनकारणे बाधकानुपन्यासात् ।

किञ्च शुक्तयधिष्ठनापरोक्षज्ञानस्यैव शुक्तयज्ञाननिवर्तकत्वमित्यपि न सम्भवति । 'यदिदं रजतमिति ज्ञातं त्वया तद्रजतं न, किन्तु शुक्तिशकलम्' इति केनचिदाप्तेन वाक्ये प्रयुक्ते सति तदधीनशाब्दबोधतः शुक्तयज्ञाननिवृत्तिदर्शनात् ।

ध्यानस्य तत्वज्ञानत्वाभावोक्तिरपि न सङ्गच्छते ।

'श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ ।
संशयं च पराणुद्य लभते ब्रह्मदर्शनम् ॥'
'श्रुणुयाद्यावदज्ञानं मतिर्यावद्युक्तता ।
ध्यानं च यावदीक्षा स्यात् ………… ॥'

इत्याद्यनेकप्रमाणैः ब्रह्मसाक्षात्कारे प्रतिबन्धनिरासपूर्वकं ध्यानस्य हेतुत्वोत्कीर्तनमसङ्गतं स्यात् । नहि ध्यानस्य तत्वज्ञानत्वाभावे ब्रह्मसाक्षात्कारसाधनत्वं सम्भवति । अतत्वज्ञानस्य तदभावात् ।

एतेन ध्याननिवर्त्यत्वमज्ञानस्य नास्तीत्यपि निरस्तम् । पूर्वोक्तप्रमाणबलादेव तस्याङ्गीकार्यत्वात् । तस्मात् परमतेऽज्ञानासम्भवात् तत्सापेक्षा-

धिकार्याद्यसम्भवेन शास्त्रमनारम्भणीयमिति भामतिमतं तावदयुक्तमिति चन्द्रिकोक्तं युक्तमेव ।

(भावरूपाज्ञानलक्षणविमर्शः)

'अनादिभावत्वे सति ज्ञाननिवर्त्यत्वं तल्लक्षणं तावत्सुवचम् । ज्ञान-प्रागभावेऽतिव्याप्तिवारणाय भावत्वनिवेशः । उत्तरोत्तरमनोवृत्तेः पूर्व-पूर्वमनोवृत्तिध्वंसरूपत्वोपगमे तादृशमनोवृत्तिष्वतिव्याप्तिवारणा-यानादित्वानिवेशः । यद्वा प्रागभावध्वंसः प्रतियोगिजन्य इति मते ज्ञान-प्रागभावेऽतिव्याप्तिवारणाय भावत्वनिवेशः । अविद्याध्वंसः ज्ञानातिरिक्तो ज्ञानजन्य इति मतेऽविद्याध्वंसेऽतिव्याप्तिवारणायानादित्वनिवेशः । चिदविद्यासम्बन्धेऽतिव्याप्तिवारणाय ज्ञानजन्येति[1] साक्षाज्ज्ञानजन्ये-त्यर्थकम् । अविद्यासम्बन्धध्वंसस्य ज्ञानजन्याविद्याध्वंसजन्यत्वान्न तत्रातिव्याप्तिः । नचानादिभावस्य ज्ञाननिवर्त्यत्वानुपपत्तिः । अभावस्येव भावस्यापि नाशानाशयोर्विरोधिसन्निपाततदभावप्रयुक्तत्वेन विपक्षे बाधकशून्यतयाऽनादिभावत्वस्याविनाशित्वव्याप्यत्वे मानाभावात्' इति लक्षणघटकपदानां प्रयोजनमुक्त्वा तस्य निर्दुष्टत्वं यदुपपादितं तन्न साधु । तथाहि- ज्ञानप्रागभाववृत्तिप्रमेयत्वस्य ज्ञानप्रागभावस्वरूप-तया ज्ञानप्रागभावस्य भावरूपत्वप्राप्त्या भावत्वनिवेशोऽपि तत्राति-व्याप्तेरवारणात् ।

यत्तूत्तरोत्तरमनोवृत्तेः पूर्वपूर्वमनोवृत्तिध्वंसरूपतामुपगम्य तादृश-मनोवृत्तिष्वतिव्याप्तिवारणायानादित्वनिवेशनं तन्न साधु । उत्तरोत्तर-

---

१. ज्ञाननिवर्त्यत्वं ज्ञानजन्यध्वंसप्रतियोगित्वम् ।

मनोवृत्तिष्वतिव्याप्तिरिति वा, उत पूर्वपूर्वमनोवृत्तिषु । नाद्यः । तासां पूर्वमनोवृत्तिनिवर्त्यत्वाभावात् । न द्वितीयः । उत्तरोत्तरमनोवृत्तेः स्वोत्तरोत्पन्नविशेषगुणत्वेन पूर्वपूर्वमनोवृत्तिनाशकतामवलम्ब्य तत्रातिव्याप्तिर्वक्तव्या भविष्यति। एवंरीत्याऽतिव्याप्तिकथनविषये तादृशमनोवृत्तेः पूर्वपूर्वमनोवृत्तिध्वंसरूपतोपपादनमसङ्गतम् ।

नच नाशं प्रति प्रतियोगिनः कारणतया पूर्वमनोवृत्तिजन्यध्वंसप्रतियोगित्वं पूर्वमनोवृत्तिष्वागतमिति रीत्याऽतिव्याप्तिरभिप्रेतेति वाच्यम् । तथात्वेपि तदुपादानस्यासङ्गतत्वात् ।

किञ्च उत्तरोत्तरमनोवृत्तेः पूर्वपूर्वमनोवृत्तिध्वंसरूपतोपगमे तुल्यन्यायेन पूर्वपूर्वमनोवृत्तेरुत्तरोत्तरमनोवृत्तिप्राग्भावरूपत्वस्य कल्पयितुं शक्यतया पूर्वपूर्वमनोवृत्तिषु तादृशमनोवृत्तिप्राग्भावत्वेनानादित्वस्यापि प्राप्त्याऽनादित्वनिवेशेऽपि तत्रातिव्याप्तेर्वारयितुमशक्यत्वापातात्। नच 'पूर्वपूर्वमनोवृत्तेः ध्वंसः यस्याः सकाशात्' इति व्युत्पत्त्योत्तरोत्तरमनोवृत्तेः स्वोत्तरोत्पन्नविशेषगुणत्वेन पूर्वमनोवृत्तिनाशकतार्थकत्वमुपगम्य पूर्वपूर्वमनोवृत्तिष्वतिव्याप्त्युपपादने सर्वं सङ्गतं भविष्यतीति वाच्यम् । निवर्तकतायां ज्ञानत्वावच्छिन्नत्वनिवेशनेनैव तद्वारणसम्भवे स्वाधिकरणसमयध्वंसवद्[1] अन्यसमयध्वंसरूपोत्पत्तिशून्यत्वरूपानादित्वरूपस्वतन्त्रविशेषणदानेऽतिगौरवात् ।

१. स्वम्= घटः । तदधिकरणमयः द्वितीयादिक्षणः । तादृशस्य समयस्य ध्वंसः उत्पत्तिक्षणे न वर्तते । अतः प्रथमः क्षणः ध्वंसवदन्यसमयः । तादृशसमयस्य ध्वंसः उत्पत्तिः । उत्पत्तिशून्यस्य पदार्थस्य समयः कोऽपि तादृशपदार्थसमयध्वंसस्य अनधिकरणं न भवति । उत्तरोत्तरक्षणानां पूर्वपूर्वक्षणध्वंाधिकरणत्वात्।

किञ्च निवर्तकतायां ज्ञानत्वावच्छिन्नत्वनिवेशनमप्यावश्यकम्। अन्यथा चिदविद्यासम्बन्धेऽनादिभावत्वमात्रत्वस्यातिव्याप्तिमुद्भाव्य ज्ञानजन्य-ध्वंसप्रतियोगित्वरूपं ज्ञाननिवर्त्यत्वं प्रदाय, ज्ञानजन्येत्यस्य साक्षाज्ज्ञान-जन्येत्यर्थमुपवर्ण्य, चिदविद्यासम्बन्धध्वंसस्य ज्ञानजन्याविद्याध्वंस-जन्यत्वेऽपि साक्षाज्ज्ञानजन्त्यत्वाभावान्न तत्रातिव्याप्तिरित्युपपादन-मसङ्गतं स्यात् । अनादित्वप्रयोजनकथनावसरेऽनुपदमविद्याध्वंसः ज्ञानानतिरिक्त इति त्वयाभ्युपेतत्वेन चिदविद्यासम्बन्धध्वंसस्य ज्ञान-जन्याविद्याध्वंसजन्यत्वेऽप्यविद्याध्वंसस्य ज्ञानरूपतया साक्षाज्ज्ञान-जन्यत्वानपायेन तत्रातिव्याप्तेरवारणात् । अतः निवर्तकतायां ज्ञानत्वा-वच्छिन्नत्वं निवेश्यम्। निवेशे त्वविद्याध्वंसस्य ध्वंसत्वेन निवर्तकत्वेऽपि ज्ञानत्वेन साक्षान्निवर्तकत्वाभावान्न तत्रातिव्याप्तिरित्युक्तं युज्यत इति स्वोक्तिघटनार्थं कर्तव्यप्रयत्नेन 'एकं सन्धित्सत अन्यच्चवते' इति न्यायेन तादृशमनोवृत्तिष्वतिव्याप्तिवारणायानादित्वनिवेश इत्युत्कीर्तनमसङ्ग-तम् भविष्यति। उत्तरोत्तरमनोवृत्तेः स्वोत्तरोत्पन्नविशेषगुणत्वेन निवर्तक-त्वेऽपि ज्ञानत्वेनानिवर्तकत्वात् ।

यदपि, यद्वेत्यारभ्यानादित्वनिवेश इत्यन्तेन प्रागभावाविद्याध्वंस-योरतिव्याप्तिवारणाय भावत्वानादित्वनिवेश इति तत्प्रयोजनकथनं तदपि न शोभनम् । भावत्वनिवेशेऽपि प्रागभावेऽतिव्याप्तेः दुर्वारत्वस्योक्त-त्वात्। ज्ञाननिवर्त्यत्वं येन रूपेण तेन रूपेण भावत्वमिति निवेश्यते। ज्ञानप्रागभावस्य तु ज्ञानप्रागभावत्वेन ज्ञाननिवर्त्यत्वेन प्रमेयत्वरूपतया भावत्वेऽपि पूर्वोक्तरूपेण भावत्वाभावान्न तत्रातिव्याप्तिरिति यदि विभाव्यते तर्हि पुरो 'अविद्याध्वंसेऽतिव्याप्तिवारणायानादित्वनिवेशः'

इत्युक्तिरसङ्गता भविष्यति । तथाहि । अविद्याध्वंसस्य ज्ञानात्मकतया ज्ञानत्वेन भावत्वेऽपि तेन रूपेण ज्ञाननिवर्त्यत्वाभावात् । अविद्याध्वंसत्वेन ज्ञाननिवर्त्यत्वं त्वसम्भावितमेव । नच नाशं प्रति प्रयियोगिनः कारणतया ज्ञानजन्यनाशप्रतियोगित्वस्य ज्ञाने सत्त्वेनाविद्याध्वंसस्य ज्ञानात्मकतया ज्ञानत्वेन ज्ञाननिवृत्यत्वं तेन रूपेण भावत्वं चास्तीत्यविद्याध्वंसेऽतिव्याप्तिरित्यभिप्राय इति वाच्यम् । ज्ञान एवातिव्याप्तेर्वक्तुं शक्यत्वेऽविद्याध्वंसपर्यन्तानुधावनवैय्यर्थ्यात् । नच ज्ञान एवातिव्याप्तिवारणायानादित्वनिवेशनमस्त्विति वाच्यम् । ज्ञानजन्यनाशप्रतियोगित्वरूपज्ञाननिवृत्यत्वघटकज्ञाननिष्ठजनकतायां तादातत्म्यसम्बन्धानवच्छिन्नत्वनिवेशेनैव तत्रातिव्याप्तिवारणसम्भवे उक्तरूपोत्पत्तिशून्यत्वरूपानादित्वरूपस्वतन्त्रविशेषणदानानौचित्यात् ।

किञ्च ज्ञानप्रागभावेऽतिव्याप्तिवारणायासोऽपि व्यर्थ एव । अविद्याध्वंसे ज्ञानानतिरिक्तत्वस्य भवदङ्गीकारेण तुल्यन्यायेन ज्ञानप्रागभावस्याविद्यास्वरूपत्वस्य प्राप्त्या तस्य लक्ष्यत्वात् ।

किञ्च ज्ञानोत्पत्तेरेव ज्ञानप्रागभावनाशकतया ज्ञानस्य ज्ञानप्रागभावानिवर्तकत्वेन ज्ञाननिवर्त्यत्वविशेषणेनैव ज्ञानप्रागभावव्यावृत्तेः तद्वारणाय भावत्वविशेषणदानानावश्यकत्वाच्च । नच प्रतियोगिप्रागभावनाशं प्रति प्रतियोगिनः कारणत्वं सम्भवति न तूत्पत्तेः । उत्पत्तेः प्रतियोगिवृत्तितया प्रागभावनाशस्योपादाननिष्ठतया कार्यकारणयोः सामानाधिकरण्याभावात् । प्रतियोगिनः कारणत्वे तु प्रतियोगितत्प्रागभावनाशयोरुपादानवृत्तितया कार्यकारणयोः सामानाधिकरण्यं सुखेनैव लभ्यत इति वाच्यम् । यदा प्रतियोग्युत्पत्तिः तदा तत्प्रागभावनाश इति

कालिकप्रत्यासत्या काले ‘इहेदानीं घट उत्पन्नः’ इति प्रतीतिबलेनोपादानस्य देशविधया प्रतियोग्युत्पत्यवच्छेदकतयाऽवच्छेदकतासम्बन्धेन प्रतियोग्युत्पत्तेः स्वरूपसम्बन्धेन तत्प्राग्भावनाशं प्रति कारणत्वे उपादानदेश एव वा सामानाधिकरण्यसम्भवात्। प्रतियोगिनः प्रागभावनाशकत्वे प्रतियोग्युत्पत्तिक्षण एव प्राग्भावनाश इति नियमो न स्यात्। उत्पत्तिकालविशिष्टस्य प्रतियोगिनः नाशकत्वेऽप्युत्पत्तिद्वितीयक्षण एव नाशापत्त्या पूर्वोक्तनियमभङ्ग एव।

किञ्च प्रतियोगिन उत्पत्तिकालावच्छेदेन सकलसामर्थ्यविधुरत्वेनोत्पत्तिकालावच्छिन्नप्रतियोगिनः प्रागभावनाशजननसामर्थ्यस्यासम्भवाच्च। नचोत्पत्तिक्षणे घटस्य निर्गुणत्वमङ्गीकृत्य द्वितीयक्षणे तत्र गुणजन्माङ्गीकृतवद्भिः तान्त्रिकैरुत्पत्तिकालावच्छिन्नघटस्य गुणजननसामर्थ्यमङ्गीकृतम्। अन्यथा पूर्वं कारणस्यासम्भवेन द्वितीयक्षणे तत्र गुणोत्पादानुपपत्तेः। अतो नोक्तमुत्पत्तिकालावच्छिन्नस्य सकलसामर्थ्यविधुरत्वं सम्भवतीति वाच्यम्। प्रथमं द्रव्यं निर्गुणमेवोत्पद्यत इति नियमभङ्गभीरुभिस्तार्किकैरपि गुणातिरिक्तकार्यजननसामर्थ्यस्यानङ्गीकृतत्वात्। नचोत्पन्नमेव यन्नष्टं तत्रोत्पत्तिकालावच्छिन्नस्य गुणातिरिक्तस्वनाशकारणत्वं प्राप्तमिति तदपि न सम्भवतीति वाच्यम्। तस्यैवाप्रामाणिकत्वात्।

अथवा, द्वितीयक्षणावच्छिन्नघटस्यैव कार्यसहभावेन गुणकारणत्वाङ्गीकारेऽप्युक्तनियमसंरक्षणसम्भवेनोत्पत्तिकालावच्छिन्नस्योक्तं सकलसामर्थ्यविधुरत्वमव्याहतमेवेति न किञ्चिदेतत्।

यच्चोक्तं चिदविद्यासम्बन्धेऽतिव्याप्तिवारणाय ज्ञानजन्येति साक्षात् ज्ञानजन्येत्यर्थकम्। अविद्यासम्बन्धध्वंसस्य ज्ञानजन्याविद्याध्वंसजन्यत्वान्न तत्रातिव्याप्तिरिति तदप्ययुक्तम्। अविद्याध्वंसः ज्ञानानतिरिक्त इति भवदङ्गीकारेणाविद्यासम्बन्धध्वंसस्याविद्याध्वंसजन्यत्वेऽप्यविद्याध्वंसस्य ज्ञानात्मकतया साक्षाज्ज्ञानजन्यत्वाव्याहतेः।

भ्रमोपादानत्वं वा तल्लक्षणमित्यज्ञानलक्षणं प्रतिपाद्य 'यत्तु भ्रमपदेन रजतरूपार्थो विवक्षितः ज्ञानं वा। नाद्यः। पदार्थस्यासत्त्वेन तदुपादानताया असम्भवात्। न द्वितीयः। अन्तःकरणेऽतिव्याप्तेरिति परेणोक्तम्' इति वादावलीमुपपाद्य तदसदित्युक्त्वा 'भ्रमविषयस्यापारमार्थिकत्वेऽप्यनिर्वचनीयस्वरूपाभ्युपगमेन तदुपादानतायाः सम्भवात्। नाप्यन्तःकरणेऽतिव्याप्तिः। तस्य प्रमोपादानत्वेऽपि भ्रमं प्रत्यतथात्वात्' इति यदभिहितं तदप्यनुपपन्नम्। तथाहि- भ्रमविषयस्यापारमार्थिकत्वेऽप्यनिर्वचनीयस्वरूपाभ्युपगमेनेति तु वाङ्मात्रमेव। सर्वस्यापि निर्वचनार्हत्वात्। अतः भ्रमविषयस्यासत्त्वेन तदुपादानत्वमप्रसिद्धमिति भ्रमपदेन विषयस्वीकारासम्भवः। भ्रमज्ञानस्वीकारपक्षेऽन्तःकरणस्य प्रमोपादानत्वेऽपि भ्रमोपादानत्वाभावान्न तत्रातिव्याप्तिरित्यन्तःकरणातिव्याप्तिवारणमप्यसङ्गतमेव। अन्तःकरणस्य भ्रमजनकत्वं नास्तीति किंस्वसङ्केतमात्रादुच्यते, उत भ्रमजनकत्वे बाधकसद्भावात्। किं वा भ्रमजनकत्वाभावे प्रमाणसद्भावाद्वा। नाद्यः। तस्यानादरणीयत्वात्। न द्वितीयः। अन्तःकरणस्य भ्रमजनकत्वे बाधकाभावात्। नच प्रमोपादानस्यान्तःकरणस्य भ्रमोपादानत्वे कदाचित् भ्रमः कदाचित् प्रमेति न स्यात्। कारणवैचित्र्यमन्तरा कार्यवैचित्र्यासम्भवादिति वाच्यम्। प्रमाजनकस्य

चक्षुरादेः दोषसहकारेण भ्रमजनकत्वमिवात्रापि दोषसदसद्भावाभ्यां व्यवस्थोपपत्तेः । न तृतीयः । तथा प्रमाणानुपलम्भात् ।

(अविद्याप्रमाणविमर्शः)

तादृशाज्ञाने 'प्रत्यक्षानुमानश्रुतयश्चात्र प्रमाणानि' इत्युक्त्वा तथाहीत्यादिना 'अहमज्ञ इति प्रत्यक्षं तादृशानिर्वचनीयभावरूपानाद्यज्ञाने प्रमाणम्' इति यदुपन्यस्तं तदप्यसङ्गतम् । तथाहि । 'अहमज्ञः' इति प्रत्यक्षस्य ज्ञानाभावविषयकत्वात् । नच धर्मिप्रतियोगिज्ञानसत्त्वेऽपि जायमानस्य तस्य ज्ञानाभावविषयकत्वे व्याघात इति वाच्यम् । किञ्चिज्ज्ञानवत एव पुरुषस्याहमज्ञ इति प्रत्यक्षस्योत्पत्त्या तस्य प्रामाण्यानुरोधेन ज्ञानविशेषाभावविषयकत्वस्यैव युक्तत्वात् । अथवाऽल्पस्वे निस्व इतिवत् ज्ञानस्याल्पत्वविवक्षयापि तादृशप्रत्यक्षसम्भवेन तस्याल्पज्ञानविषयकत्वेनाप्युपपत्तेः भावरूपाज्ञानासाधकत्वात् ॥

यत्तु

'देवदत्तप्रमा तत्स्थप्रागभावातिरेकिणः ।
अनादेर्ध्वंसिका मात्वात् अविगीतप्रमा यथा ॥'

इति तत्वप्रदीपोक्तम् । देवदत्तप्रमा, देवदत्तनिष्ठप्रमाप्रागभावातिरिक्तस्यानादेर्ध्वंसिका, प्रमात्वात्, चैत्रीयप्रमावदित्यनुमानमपि तादृशाज्ञाने प्रमाणम्' इति परेणोक्तम् । तत्र ब्रूमः । तत्वप्रदीपोक्तप्रथमानुमाने तु साध्ये प्रमापदं नास्त्येव । द्वितीयानुमानेऽपि 'अत्र साध्ये प्रमापदं चोपरञ्जकं न तु तन्निवेशः' इत्यभिधाय 'अभावे प्रागित्यनुपादानेऽज्ञानस्यापि स्वाभावाभावत्वेनाभावरूपतया तत्राभावातिरिक्तानादिनिवर्तकत्वाभावात् बाध इत्यतः प्रागिति' इति प्रयोजनं यदभिहितं तदनुपपन्नम् ।

अभाव इत्यत्र न भाव अभाव इति व्युत्पत्त्याऽभावपदस्य भावभिन्नार्थकत्वेनाज्ञानस्य भावभिन्नत्वासम्भवेन बाधवारणसम्भवात् । अवश्यं चैतदेवम् । अन्यथाऽज्ञानध्वंस[१]प्रागभावस्याज्ञानस्वरूपत्वेनाज्ञानस्य तत्स्थप्रागभावातिरिक्तत्वासम्भवेन बाधो दुर्वार एव स्यात् । नचाज्ञानस्य स्वध्वंसप्रागभावरूपत्वेन प्रागभावातिरिक्तत्वासम्भवेऽप्यज्ञानस्य प्रमाप्रागभावानात्मकतया प्रमाप्रागभावातिरिक्तत्वं सुशकमिति न बाध इति वाच्यम्। 'प्रमापदं चोपरञ्जकं न तु तन्निवेशः' इत्युक्तत्वेन साध्यकोटौ प्रमापदस्यैवाभात् ।

किञ्चैवंरीत्या प्रमापदसार्थक्यस्यैव सम्भवे तत्पदवैय्यर्थ्यकीर्तनस्यासङ्गत्यापत्तेश्च । साध्ये प्रमापदाघटितपूर्वानुमानेऽप्युक्तरीत्या बाधवारणाय प्रमापदस्य दातव्यतया साध्ये प्रमापदाघटितानुमानोपन्यासस्याप्यसङ्गत्यापत्तेश्च ।

किञ्च प्रमापदस्य निवेशेऽप्यविद्याध्वंसः ज्ञानात्मक इति मतस्य त्वयाऽङ्गीकारेणाविद्याध्वंसप्रागभावस्य प्रमाप्रागभावरूपत्वस्य सम्भवेनाज्ञानस्य प्रमाप्रागभावातिरिक्तत्वस्याप्यसम्भवेन बाधस्य दुर्वारतापत्तेश्च । प्रागिति विशेषणोपादाने त्वेवमनर्थपरम्पराः स्युः, इत्यतः प्रागित्यनुपादायाभावपदस्यैव भावभिन्नार्थकत्वमुपवर्ण्य बाधवारणं कर्तव्यं भविष्यीति प्रागित्यस्य प्रयोजनाभिधानमसङ्गतम् । न केवलं प्रागित्यस्य प्रयोजनाभिधानमेवासङ्गतमिति । किन्त्वेवमनर्थपरम्पराप्रापकप्रागभावपदघटितसाध्यकत्वेन अज्ञानसाधकतयोपन्यस्तं पूर्वानुमानद्वयमप्यसङ्गतमेवेति ।

---

१. ध्वंसस्य यः प्रागभावः सः प्रतियोगिरूपः ।

एवं 'विमतं प्रमाणज्ञानं स्वप्रागभावातिरिक्त-स्वनिवर्त्य-स्वविषया-वरण-स्वदेशगत-वस्त्वन्तरपूर्वकम् । अप्रकाशितार्थप्रकाशकत्वात् । अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत्' इति विवरणोक्तमनुमानमपि तादृशा-ज्ञाने प्रमाणमित्यभिधाय 'यत्तु साध्ये स्वप्रागभावातिरिक्तेति विशेषणं व्यर्थम् । स्वनिवर्त्यत्वविशेषणेनैव तद्व्यावृत्तेः । नहि भावः प्रागभावस्य निवर्तकः । अपि तु भावोत्पत्तिरेव । भावाभावयोः सहावस्थानविरोधात् इति परेणोक्तं तदसत्' इत्युक्त्वा यदुक्तं 'प्रागभावध्वंसस्य प्रतियोग्यात्मनः तदजन्यत्वेऽपि प्रतियोगिध्वंसात्मनस्तस्य तज्जन्यतयोक्तविशेषणेन तद्व्यावृत्तेः । प्रतियोगिवत्[1] तद्ध्वंसस्यापि प्रागभावध्वंसत्वं वक्तव्यम् । अन्यथा प्रतियोगिध्वंसदशायामतीतः प्रागभाव इति व्यवहारानुपपत्तिः । अतीतत्वं हि वर्तमानध्वंसप्रतियोगित्वम् । उक्तश्चायमर्थः प्रमाण-तत्त्वविद्भिस्तार्किकैरपि । प्रतियोग्येव प्रागभावध्वंस इति मते तुल्यन्यायेन ज्ञानमेवाज्ञानध्वंस इति वक्तव्यतया तार्किकादीन् प्रत्येतदनुमान-प्रवृत्तेर्विवक्षितसाध्यसिद्धये स्वनिवर्त्यत्वमित्यनेन स्वोत्पत्त्यधिकरण-क्षणोत्पत्तिकध्वंसप्रतियोगित्वस्यैव विवक्षणीयतया तस्य प्रागभावेऽपि सत्त्वादव्यावृत्तेः प्रागभावातिरिक्तेत्यस्य सार्थकत्वात्' इति तदसत् । घटः मुद्गरनिवर्त्य इति व्यवहारवत् 'घटो घटनिवर्त्यः'[2] इति व्यवहाराभावेन

---

१. प्रतियोगी यथा प्रागभावध्वंसरूपः तथा प्रतियोगिध्वंसोऽपि तद्रूप इत्यर्थः ।

२. ध्वंसं प्रति प्रतियोगी कारणम् । अतः घटध्वंसे घटः कारणम् । तथा च घटजन्य-ध्वंसप्रतियोगित्वं घटेऽस्ति । अथापि 'घटः घटनिवर्त्यः' इति व्यवहारः न विद्यते । तादृशव्यवहारवारणार्थं तादात्म्यातिरिक्तेति विशेषणं देयम् । ध्वंसं प्रति प्रति-योगिनः तादात्म्येन कारणत्वात् न तादृशप्रयोगप्रसङ्गः ।

तादात्म्यसम्बन्धानवच्छिन्नजनकतानिरूपितजन्यताशालिध्वंसप्रतियोगित्वस्यैव निवर्त्यत्वशब्दार्थतायाः वक्तव्यतया प्रमाणज्ञानप्रागभावध्वंसस्य प्रमाणज्ञानध्वंसात्मकतया नाशं प्रति प्रतियोगिनः कारणतया प्रमाणज्ञानध्वंसे प्रमाणज्ञानजन्यत्वसत्त्वे तदभिन्नतया प्रमाणज्ञानप्रागभावध्वंसे प्रमाणज्ञानजन्यत्वसत्त्वेऽपि प्रागभावे तादृशस्वनिवर्त्यत्वाभावेन स्वनिवर्त्यत्वविशेषणेनैव प्रमाणज्ञानप्रागभावव्यावृत्तेः । अस्तु नाम तद्यथा तथा । स्वजन्यध्वंसप्रतियोगित्वरूपस्वनिवर्त्यत्वघटकजनकतायां तादात्म्यसम्बन्धानवच्छिन्नत्वनिवेशेनैव प्रमाणज्ञानप्राग्भाववाणसम्भवेन तद्वारणाय प्राग्भावातिरिक्तेति स्वतन्त्रविशेषणदानानौचित्यात् ।

किञ्च, अभावाधिकरणकाभावस्याधिकरणस्वरूपतया प्रमाणज्ञानध्वंसनिष्ठप्रमाणज्ञानप्रतिबन्धकदुरितात्यन्ताभावस्य प्रमाणज्ञानध्वंसात्मकतया प्रमाणज्ञानजन्यतद्ध्वंसं प्रति तादृशदुरितस्यापि प्रतियोगित्वेन स्वनिवर्त्यत्वविशेषणेन वारणीयस्य अवारणापत्त्या जनकतायां तादात्म्यसम्बन्धानवच्छिन्नत्वस्य, ध्वंसनिष्ठप्रमाणज्ञानजन्यत्वं यद्धर्मावच्छिन्नं तद्धर्मावच्छिन्ननिरूपितप्रतियोगित्वस्य, [1]स्वावच्छेदकावच्छिन्ननिरूपितत्वसम्बन्धेन ध्वंसवृत्तिस्वनिरूपितजन्यताविशिष्ट-

---

१. प्रमाणज्ञानजन्यतावच्छेदकं ध्वंसत्वम् । नतु दुरितात्यन्ताभावत्वम् । प्रकृतपरिष्कारे जन्यतावैशिष्ट्यं प्रतियोगितायामुच्यते । अतः स्वं= जन्यता । तदवच्छेदकं ध्वंसत्वम् । तदवच्छिन्नः ध्वंसः । तन्निरूपिता भवति भावरूपाज्ञाननिष्ठा प्रतियोगिता । तस्मात् तादृशनिरूपितत्वसम्बन्धेन ध्वंसवृत्तिजन्यताविशिष्टा भवति भावरूपाज्ञाननिष्ठा प्रतियोगिता । न तु दुरितनिष्ठा प्रतियोगिता ।

प्रतियोगित्वपर्यवसितस्य वा स्वनिवर्त्यत्वस्यावश्यं निवेशनीयता तेनैव प्रमाणज्ञानप्रागभाववारणसम्भवे तद्वारणाय प्रागभावातिरिक्तेत्यस्य वैय्यर्थ्यं दुर्वारमेवेति ।

यच्चोक्तम्, स्वनिवर्त्यत्वमित्यनेन स्वोत्पत्त्यधिकरणक्षणोत्पत्तिकध्वंस-प्रतियोगित्वस्यैवावश्यं विवक्षणीयत्वं प्रतिपाद्य तस्य प्रागभावसाधारण्यं तदपि मन्दम् । यत्र घटोत्पत्तिक्षण एव स्वसामग्रीवशात् पटस्य नाशः तत्र पटनाशस्य घटजन्यत्वाभावेऽपि पटस्य घटोत्पत्त्यधिकरणक्षणोत्प-त्तिकध्वंसप्रतियोगित्वस्येव, अविद्याध्वंसस्य प्रमाणज्ञानजन्यत्वाभावेऽ-प्युक्तरीत्या प्रमाणज्ञानोत्पत्त्यधिकरणक्षणोत्पत्तिकत्वसम्भवेनाविद्या-ध्वंसस्य प्रमाणज्ञानजन्यत्वरूपविवक्षितार्थस्यासिद्ध्याऽर्थान्तरतापत्तेः । नचाविद्यामात्रसिद्ध्यापि वयं कृतार्था इति न सन्तोष्टव्यम् । 'अविद्यास्त-मयो मोक्षः स संसार उदाहृतः' इति भवदीयप्रमाणसिद्धाविद्याध्वंसरूप-मोक्षं प्रति प्रसादापेक्षं विना साक्षाज्ज्ञानकारणत्वोक्तेरसङ्गत्यापत्तेः । अतस्त्वेवं वदतस्तवाविद्याध्वंसस्य ज्ञानजन्यत्वसिद्धिरपि विवक्षितैव, इत्यतो तदसिद्ध्याऽर्थान्तरत्वापत्तेः सुस्थतया नोक्तरूपं स्वनिवर्त्यत्वं सम्भवतीत्यस्मदुक्तस्वनिवर्त्यत्वस्यैव निवेशनीयतया तस्य प्रागभाववृत्ति-त्वासम्भवेन तेनैव प्रागभाववारणसम्भवात् प्रागभावातिरिक्तेत्यस्य वैय्यर्थ्योक्तिः सम्यगेवेति ।

'यत्तु ज्ञानप्रतिबन्धकस्य दुरितस्य सिद्धतया सिद्धसाधनमिति परोक्त-दूषणं तदसत्' (शां.पा.भू.पु. ३३) इत्यभिधाय यदुक्तम्- 'तस्य ज्ञाना-निवृर्त्यत्वात् । नहि कार्योत्पत्त्यव्यवहितक्षणे प्रतिबन्धकसत्ता युज्यते । न वा तदव्यवहितप्राक्क्षणे, तत्क्षणे चासतः तन्नाश्यत्वं तदुत्पत्त्यधि-

करणक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपं पूर्वोक्तं युज्यते' इति तन्न। तथाहि। प्रमाणज्ञानोत्पत्तिप्रतिबन्धकदुरितस्य कथं प्रमाणज्ञाना-निवर्त्यत्वम्? प्रतिबन्धकनिवृत्त्यनन्तरमेव तदुत्पादेन दुरितस्य प्रमाणज्ञाननिवर्त्यत्वानुपपत्तिरिति त्वया वक्तव्यम्। तत्रोच्यते। अन्यत्र तथा दर्शनेऽपि प्रकृते, यथा भूमावुप्तस्य बीजस्य मृगादिबाधशङ्कया मृन्मेदुरादिना पिहितस्योष्मादिसहकारिसामर्थ्येनाङ्कुरादिना परिणत-स्योर्ध्वगमनेन तन्निवृत्तिहेतुत्वं दृष्टं तथात्रापि सहकारिसामर्थ्येन जातस्यैव ज्ञानस्य प्रतिबन्धकनिवर्तकत्वं वक्तव्यमिति। अत एव प्रमाणज्ञानाव्यव-हितक्षणे प्रतिबन्धकदुरितसत्ता युज्यते। उक्तरूपं तन्नाश्यत्वमपि दुरितस्य युज्यत इति। विस्तृतं चैतद्वादावलीव्याख्याने श्रीनिवासतीर्थीये।

यच्चोक्तम्- 'प्रागभावसाधारण्याय स्वान्यूनविषयकग्रहत्वप्रमात्वा-न्यतररूपेण साजात्यमादाय स्वावच्छेदकावच्छिन्नत्वविशिष्ट-सामानाधिकरण्यसम्बन्धेन स्वसजातीयनिरूपिताधिकरणता[१] विशिष्टा-धिकरणतानिरूपकान्यत्वरूपं स्वविषयावरणत्वम्' इति। तत्र ब्रूमः। एतादृशं स्वविषयावरणत्वमाद्यघटज्ञानप्रागभावेऽपि नास्ति। तथाहि। स्वमयं घट इत्यादिप्रत्ययः। तत्सजातीयं तादृशप्रत्ययान्तरम्। तन्निरू-पिता या अधिकरणता तद्विशिष्टैवाद्यघटज्ञानप्रागभावाधिकरणता

१. अत्र स्वपदेन घटज्ञानं ग्राह्यम्। उक्तसम्बन्धेन तत्सजातीयं घटज्ञानान्तरम्। तदधिकरणताविशिष्टा प्रागभावाधिकरणता नैव भवति। यस्मिन्नात्मनि यदवच्छेदेन घटज्ञानं भवति तस्मिन् तदवच्छेदेन तत्प्रागभावायोगात्। अत उक्तोभयसम्बन्धेन ज्ञानाधिकरणताविशिष्टा तत्प्रागभावाधिकरणता नैव भवति। तन्निरूपकान्यत्वं प्रागभावे।

भविष्यति । तादृशप्रागभावाधिकरणतायां तादृशज्ञानाधिकरणतासामानाधिकरण्यस्य तादृशज्ञानाधिकरणतावच्छेदकात्मत्वावच्छिन्नत्वस्य च सत्त्वात् । नच स्वावच्छेदकावच्छिन्नत्वमित्यस्य स्वावच्छेदककालावच्छिन्नत्वमित्यर्थः । तथाचाद्यघटज्ञानप्रागभावाधिकरणतायां तथाविधप्रत्ययनिरूपिताधिकरणतावैशिष्ट्यमुक्तसम्बन्धेन नास्ति । तथाविधप्रत्ययतादृशज्ञानप्रागभावयोरसमानकालीनत्वादिति वाच्यम् । आद्यघटज्ञानोत्पत्तिपूर्वमारभ्य सजातीयप्रत्ययोत्पत्तिपर्यन्तस्थायिस्थूलकालस्वीकारे तस्य तादृशज्ञानतादृशप्रागभावयोरवच्छेदकत्वेनोक्तसम्बन्धेनापि प्रागभावाधिकरणतायां तादृशसजातीयप्रत्ययनिरूपिताधिकरणतावैशिष्ट्यसम्भवेनाधिकरणतानिरूपकत्वस्यैव प्रागभावे प्राप्त्या तादृशाधिकरणतानिरूपकान्यत्वस्य प्रगभावसाधारण्यासम्भवात् । नच सम्बन्धघटककालस्य क्षणत्वेन निवेशेनोक्तप्रागभावाधिकरणतायां तादृशाधिकरणतावैशिष्ट्यं न सम्भवति । तथाविधाधिकरणतयोरेकक्षणावच्छिन्नसामानाधिकरण्यासम्भवादिति वाच्यम् । प्रतियोग्युत्पत्तिसामग्र्याः प्रागभावनाशकत्वे प्रतियोग्युत्पत्तिपूर्वं प्रागभावनाशापत्त्या प्रतियोगिन एव नाशकतायाः प्रतियोग्युत्पत्तेः प्रागभावनाशकतामनङ्गीकर्त्रा त्वया वक्तव्यत्वात् । तथा च प्रतियोग्युत्पत्तिक्षणे प्रागभावनाशसमाग्रीसम्पत्त्या द्वितीयक्षणे प्रागभावनाशस्याङ्गीकरणतया प्रतियोग्युत्पत्तिक्षण एव तयोः सामानाधिकरण्यसम्भवात् । प्रतियोग्युत्पत्तिक्षण एव प्राग्भावनाशाभ्युपगमे सामग्रीं विना तन्नाशाभ्युपगमप्रसङ्गः । सामग्र्याः पूर्वमपेक्षितत्वात् । नच प्रतियोगिनः प्रतियोगिप्राग्भावध्वंसात्मकतया प्रतियोग्युत्पत्तिसामग्र्येव तन्नाशसामग्री । नान्या सामग्र्यस्तीति प्रतियोग्युत्पत्तिक्षण एव तत्प्रागभाव-

नाशसम्भवेन नोक्तरूपं सामानाधिकरण्यं सम्भवतीति वाच्यम् । तथात्वेऽपि प्रतियोगिध्वंसप्रागभावस्य प्रतियोगिप्रागभावात्मकतया प्रतियोगिनः प्रतियोगिध्वंसप्रागभावसामानाधिरण्यस्यैककालावच्छेदेन सत्त्वे प्रतियोगितत्प्रागभावयोरप्येककालावच्छिन्नसामानाधिकण्य-सम्भवेनोक्तरूपस्वविषयावरणत्वस्य प्रागभावसाधारण्यासम्भवात् । एवञ्चोक्तरूपस्वविषयावरणत्वस्य प्रागभावव्यावृत्तत्वेन तेनैव प्रागभावातिरिक्तेत्यस्य वैय्यर्थ्यं दुर्वारमेवेति । यदपि 'प्रागभावस्य स्वविषयावरणत्वाभावेनैव व्युदासात् तद्वारकविशेषणान्तरोपादानं व्यर्थम् इति परेण दूषणमुक्तं तदपि न सत्' इति यदुक्तं तदेवासत् ।

प्रमाजनकादृष्टस्य चरमफलसामग्रीनाश्यत्वमुपगम्य स्वोत्पत्त्यधिकरणक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपं चरमफलनिवर्त्यत्वं सम्भवतीति स्वीकृत्य प्रमाजनकादृष्टमादायार्थान्तरवारणाय स्वविषयावरणत्वनिवेशनं यत् तदपि न साधीयः । अत्र, किं प्रमाणज्ञानत्वावच्छेदेन तादृशवस्त्वन्तरपूर्वकत्वं साध्यते, उत तत्सामानाधिकरण्येन । किं वाऽऽद्यप्रमाणज्ञानत्वावच्छेदेनोत वेदान्तजन्याखण्डब्रह्मसाक्षात्कारधर्मिक-तथाविधसाध्यतदभावकोटिकविमतिं पक्षतावच्छेदकीकृत्य तदवच्छेदेन साध्यते । नाद्यः । आद्यघटविषयकप्रमाणज्ञानेनाज्ञाननाशेन द्वितीयतृतीयादिषु घटावगाहिप्रमाणज्ञानेषु तन्निवर्त्याज्ञानाभावेन स्वनिवर्त्य-तथाविधवस्त्वन्तरपूर्वकत्वरूपसाध्याभावेन सामानाधिकरण्येन बाधापत्तेः । द्वितीये स्वसमानविषयकज्ञानान्तराजनकस्वजनकादृष्टमादाय सामानाधिरण्येन सिद्धसाधनात् । तृतीये पक्षभूतस्याद्यप्रमाणज्ञानस्यैव स्वपदेनोपादेयतया तन्निवर्त्यत्वमनुपपाद्य तादृशादृष्टस्य चरमफल-

निवर्त्यत्वोपपादनस्यासङ्गत्यापत्तेः । असम्भवाच्च । तादृशादृष्टस्य चरमफलनिवर्त्यत्वस्योक्तत्वात् । चतुर्थे तु घटाज्ञानादिसिद्ध्यर्थमनुमानान्तरस्य वक्तव्यतापातात् ।

नच घटाज्ञानं नाम घटावच्छिन्नचैतन्याज्ञानमेव । न ततोऽतिरिक्तं घटाद्यज्ञानं नामास्ति । अतस्त्वनेनानुमानेन ब्रह्माज्ञानसिद्धौ घटाद्यज्ञानस्यापि सिद्धत्वेन तदर्थमनुमानान्तरस्य कर्तव्यतापत्तिर्नास्तीति वाच्यम् । तथा सति भवन्मते घटज्ञानस्य घटावच्छिन्नचैतन्यविषयकत्वेन वेदान्तजन्याखण्डब्रह्मसाक्षात्कारस्य तादृशसाक्षात्कारपूर्वं विद्यमानघटादिज्ञानप्रकाशितार्थप्रकाशकत्वस्यैव प्राप्त्या पक्षे उक्तहेतोरभावेन स्वरूपासिद्ध्यापत्तेः । नच विशिष्टचैतन्यस्य प्रकाशेऽपि शुद्धस्याप्रकाशने न दोष इति वाच्यम् । विशिष्टप्रकाशे विशेष्यस्याप्रकाश इत्यस्यानुपपन्नत्वात् । अन्यथा 'दण्डी पुरुषः' इति दण्डविशिष्टपुरुषप्रकाशे पुरुषस्याप्रकाशापत्त्या पुरुषांशेऽयं पुरुषो न वेति संशयादिकं प्रसज्येत । नचास्मदुक्तनिष्कृष्टहेतौ न दोष इति वाच्यम् । तस्याप्यनुपदं दूष्यत्वात् ।

यच्चोक्तं[१] ''स्वसमानविषयकज्ञानान्तराजनकादृष्टजन्यज्ञानं तु न प्रमा-

---

१. शाङ्करपादभूषणे ३४तमे पृष्ठेऽयं विचारः प्रस्तुतः - प्रमाजनकादृष्टमादायार्थान्तरवारणाय स्वविषयावरणत्वनिवेशः । तच्च पूर्वं परिष्कृतम् । उत्पादकादृष्टं च चरमफलनाश्यम् । 'अयं घटः' इति सजातीयज्ञानान्तरोत्पत्त्यैव तदुत्पादकमदृष्टं नश्यति । अतः तादृश-सजातीयज्ञानान्तरसमकालीनत्वमेव तस्मिन्नदृष्टे इति स्वसजातीयनिरूपिताधिकरणताविशिष्टाधिकरणतानिरूपकमेव भवति तददृष्टम् । तस्मात् तत्र स्वविषयावरणत्वं नास्ति । इति । ततः प्रश्नः समुत्पन्नः - यत्र यस्माददृष्टादेकमेव ज्ञानमुत्पन्नम्, सजातीयं ज्ञानान्तरं नोत्पन्नं तादृशादृष्टे कथमतिव्याप्तिवारणमिति । तस्योत्तरं तादृशादृष्टे प्रमाणाभाव इति ।

णिकमिति ध्येयम्' इति तदप्यनुपपन्नम्। तादृशज्ञानस्य त्वदुक्तिमात्रेणाप्रामाणिकत्वप्राप्तेरयोगात्। तादृशज्ञानस्य प्रामाणिकत्वे तदुत्पादकादृष्टमादायार्थान्तरतैवेत्यतोऽपि स्वविषयावरणत्वं त्वदुक्तं न निवेश्यमिति।

'प्रमाप्रतिबन्धकादृष्टमादायार्थान्तरवारणाय स्वनिवर्त्यत्वनिवेशः' (शां.पा.भू. पु.३४) इति 'उत्पादविनाशशालिनं विषयगतज्ञातताऽत्यन्ताभावं स्वीकृत्य तद्वारणाय स्वदेशगतत्वनिवेशनम्' इति स्वदेशगतत्वस्य च प्रयोजनमभिधाय यदुक्तम्, वस्तुतस्त्वित्यादिना 'स्वव्यधिकरणप्रमाप्रागभावमादायार्थान्तरवारणाय तत्' इति स्वदेशगतत्वस्य प्रयोजनं तदसत्। स्वव्यधिकरणप्रागभावस्य स्वनिवर्त्यत्वाभावात्। नच 'ध्वंसस्यापि कालोपाधिविधया स्वजन्यत्वानपायात्' इत्यनेन स्वव्यधिकरणप्रागभावध्वंसस्य कालविधया स्वजन्यत्वमुक्तमिति वाच्यम्। स्वनिष्ठजनकतायां कालत्वानवच्छिन्नत्वस्य जन्यतायां कार्यत्वानवच्छिन्नत्वस्य वा निवेशेनैव स्वव्यधिकरणप्रागभावमादायार्थान्तरवारणसम्भवे तद्वारणाय स्वदेशगतत्वरूपविशेषणदानानौचित्यात्।

किञ्चाज्ञानध्वंसं प्रति ज्ञानस्यासाधारणकारणत्वाभावेऽपि कालत्वेन साधारणकारणत्वमादायाज्ञानस्य स्वनिवर्त्यत्वसम्भवेन ज्ञानासाधारणकारणकध्वंसप्रतियोगिन अज्ञानस्य विवक्षितार्थस्यासिद्ध्याऽर्थान्तरतापत्तेश्च।

यदपि 'नच प्रागभावातिरिक्तत्वनिवेशेनैव प्रागभावमादायार्थान्तरवारणसम्भवात् प्रागभावे स्वीयत्वनिवेशो व्यर्थ इति स्वव्यधिकरणप्रागभावमादायार्थान्तरमपि नेति शङ्क्यम्' इत्यभिधाय 'तथार्थान्तरासम्भवेऽपि स्वव्यधिकरणस्वाधिकरणक्षणोत्पत्तिकचरमफलजनकादृष्ट-

मादायार्थान्तरवारणाय तदावश्यकत्वात्' इत्यनेन स्वदेशगतत्वनिवेश-स्यावश्यकत्वकथनं तदपि न चारु । तादृशादृष्टस्य स्वध्वंसप्रागभावा-त्मकतया प्रागभावातिरिक्तत्वासम्भवात् तादृशादृष्टमादायार्थान्तरा-नवकाशात् । प्रागभावे स्वीयत्वनिवेशस्य वैय्यर्थ्यानुमोदोऽप्यसङ्गत एव । तथात्वे प्रमाजनकादृष्टमादायार्थान्तरवारणाय स्वविषयावरण-निवेशस्य, प्रमाप्रतिबन्धकादृष्टमादायार्थान्तरवारणाय स्वनिवर्त्यत्व-निवेशस्य च प्रयोजनाभिधानस्यासङ्गत्यापत्तेः । तयोरपि स्वध्वंसप्राग-भावस्वरूपत्वे प्रागभावातिरिक्तत्वासम्भवात् । किञ्चाज्ञानस्य स्वध्वंस-प्रागभावात्मकतया प्रागभावातिरिक्तत्वासम्भवेनाज्ञानमादाय पक्षे साध्यसङ्गमनस्य कर्तुमशक्यतया पक्षे तादृशवस्त्वन्तरपूर्वकत्वरूप-साध्याभावेन बाधापत्तेः । अनयैव रीत्या दृष्टान्ते साध्यवैकल्याच्च स्वीयत्व-निवेशोऽपि प्रागभावे आवश्यक एव । एवञ्चोभयतः पाशारज्जुरिति ।

एतेन, स्वोत्पत्त्यधिकरणक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपस्व-निवर्त्यत्वनिवेशपक्षमादृत्य तत्पक्षे दूषणतत्परिहारात्मकः 'नचैवमपि स्वाधिकरणक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपस्वनिवर्त्यत्वनिवेशपक्षे तादृशविशेषणाक्रान्तस्वसमानाधिकरणस्वपूर्ववृत्तिज्ञानेच्छादिकमादा-यार्थान्तरमिति वाच्यम् । वस्त्वन्तरपदेन स्वसमानाधिकरणजन्यज्ञाना-नधिकरणकालवृत्तित्वस्य तादृशमनःपरिणामानधिकरणकालवृत्तित्वस्य वा विवक्षणीयत्वात् । नचैवमपि चाक्षुष-स्पार्शन-दर्शनादिरूपविजातीय-ज्ञानेच्छादियौगपद्यस्य सिद्धान्ते कादाचित्कस्येष्टतया स्वजनकादृष्ट-चरमफलभूतज्ञानेच्छासमानकालीनोत्पत्तिके आद्यघटज्ञाने तादृश-ज्ञानजनकादृष्टपूर्वकत्वमादायर्थान्तरं दुर्वारमिति वाच्यम् । स्वसमान-

कालोत्पत्तिकत्वसम्बन्धेन स्वसमानाधकरणविशेषगुणविशिष्टान्यत्वस्यापि पक्षविशेषणतया विवक्षितत्वात् । संयोगद्धित्वादिकमादायार्थान्तरं च स्वदेशान्यदेशासम्बन्धित्वरूपस्वदेशगतत्वविवक्षया निरसनीयं स्वव्याप्य-तमोनिवर्तकप्रभाया दृष्टान्तत्वसम्भवाच्च न दृष्टान्तस्य साध्यविकलता ।

यद्यपि भूतलादिगतस्य तमसः प्रभासम्बन्धशून्यतत्क्षणविशेषविशिष्ट-तद्भूतलादिसम्बद्धतया न कस्यापि तमसः प्रभाव्याप्यतासम्भवः । तथापि स्वाधिकरणतादात्म्यवदन्यावृत्तित्वरूपव्याप्यत्वविवक्षया न दोषः । विशिष्टस्यातिरिक्ततामते आद्यघटज्ञानप्राग्वर्तितत्क्षणादिविशिष्टान्तः-करणादिकमादायार्थान्तरं तु विशिष्टान्यत्वनिवेशेनैव निरसनीयम् । नच विशिष्टत्वमनुगतमनतिप्रसक्तं दुर्वचमिति वाच्यम् । स्वाश्रयसमानाधि-करणाभावप्रतियोगित्व-स्वाश्रयाश्रयत्वैतदुभयसम्बन्धेन सादिधर्म-विशिष्टत्वस्यैव प्रकृते विशिष्टशब्देन विवक्षितत्वात्' इत्यन्तेन वाक्कोला-हलोऽपि निरस्तः । स्वोत्पत्त्यधिकरणक्षणोत्पत्तिकेत्यादिरूपस्व-निवर्त्यत्वस्य दोषानुद्भाव्य तदनिवेश्यत्वस्योक्तत्वात् ।

यदुक्तम् 'अप्रकाशितार्थप्रकाशत्वं च स्वसमानाधिकरण-स्वान्यून-विषयकसंशयान्यसविषयकाव्यवहितोत्तरत्वशून्यप्रमातत्प्रभान्यतरत्वम्' इति तदप्यनुपपन्नम् । एवं सति यत्र पूर्वं घट इत्यनुभवः तादृशानुभवाधीन-संस्कारवशात् कालान्तरे घटस्य स्मरणं तस्य स्वसमानाधिकरण-स्वान्यूनविषयकसंशयान्यसविषयकतादृशघटानुभवाव्यवहितोत्तर-शून्यप्रमात्वेन तत्रोक्तहेतोः सत्त्वेन स्वनिवर्त्याज्ञानपूर्वकत्वाभावेन तथा-विधवस्त्वन्तरपूर्वकत्वरूपसाध्याभावेन व्यभिचारापातात् ।

नच तत्र स्मरणस्य तथाविधसविषयकसंस्काराव्यवहितोत्तरतया

तच्छून्यत्वाभावेन प्रमात्वस्यानुभवत्वघटितत्वेन वा तादृशप्रमातत्प्रभा-न्यतरत्वहेतोः स्मरणेऽभावान्न व्यभिचार इति वाच्यम् । यत्रायं घट इत्याद्यानुभवोत्तरं कालव्यवधानेनायं घट इत्यनुभवस्तस्य स्वसमानाधि-करणस्वान्यूनविषयकसंशयान्यसविषयकतादृशानुभवाव्यवहि-तोत्तरत्वशून्यप्रमात्वेनोक्तहेतोः सत्त्वेन तत्र स्वनिवर्त्याज्ञानाभावेन तथाविधवस्त्वन्तरपूर्वकत्वरूपसाध्याभावेन व्यभिचारास्य सुस्थत्वात् । नच तन्निवर्त्यमज्ञानमस्तीति वाच्यम् । आद्यज्ञानेनैव तस्य निवृत्त-त्वात् ।

किञ्च शून्यत्वान्तं प्रभाविशेषणमस्ति न वा । नेति पक्षे द्वितीयादि-प्रभायामुक्तहेतुसत्त्वेन तत्र प्रथमोत्पन्नप्रभयैव तमसः निवृत्तत्वेन वस्त्वन्तर-पदेनोपादेयतमःपूर्वकत्वरूपसाध्याभावात् व्यभिचारः । विधिपक्षेऽपि ज्ञानेच्छाकृतीनामेव सविषयकत्वेन प्रभायाः कैश्चिदपि सविषयकत्व-स्यानङ्गीकारेण द्वितीयादिप्रभायां प्रथमप्रभाव्यवहितोत्तरत्वसत्त्वेऽपि सविषयकाव्यवहितोत्तरत्वशून्यत्वस्यानपायेन तत्र व्यभिचारस्य दुर्वार-त्वात् ।

किञ्च हेतुकोटावन्यतरत्वघटकभेदप्रतियोगितया प्रभायाः निवेशस्य प्रयोजनं न पश्यामः । नच दृष्टान्ते साधनवैकल्यवारणार्थं तदिति वाच्यम् । हेतुकोटिप्रविष्टविशेषणानां व्यभिचारवारकतयैव सार्थक्यस्य तान्त्रिकैरङ्गीकृतत्वेन साधनवैकल्यवारणस्य हेतुघटकपदाप्रयोजन-त्वात् ।

किञ्चैवं सति लोके साधनवैकल्यव्यवहार एवोच्छिद्येत । यस्य साधनस्य

वैकल्यं प्रतिपाद्यते तत्साधनाश्रयदृष्टान्तान्यतरत्वस्य हेतुत्वसम्भवात् । अतो नोक्तमप्रकाशितार्थप्रकाशत्वं युज्यत इति ।

(भावरूपाज्ञाने श्रुतिप्रामाण्यनिरासः)

यदुक्तम्-

'' 'तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि चरन्तो न विदुरेवमेवेमाः प्रजा अहरहर्गच्छत्यः ब्रह्मलोकं न विदुरनृतेन हि प्रत्यूढा' इति छान्दोग्याष्टमाध्यायस्थश्रुतिरपि ब्रह्मज्ञानप्रतिबन्धकत्वेनानृतं ब्रुवन्ती तादृशाज्ञाने प्रमाणम्'' इति तदपि न। 'ऋतं पिबन्तौ' इत्यत्र ऋतशब्दस्य सत्कर्मणि प्रयोगदर्शनात् 'ऋतं सत्यं तथा धर्मः' इति स्मृतेश्च ऋतशब्दस्य सत्कर्मवाचकतया, एतच्छ्रुतिस्थानृतशब्दस्य 'न ऋतमनृतम्' इति व्युत्पत्त्या दुष्कृतपरत्वेनाज्ञानपरत्वाभावात् । नच 'य आत्मा अपहत-पाप्मा' इत्यनेनात्मनः पापशून्यस्वभावत्वोक्त्या तादृशात्मनः दुष्कर्मप्रत्यूढत्वोक्तिर्न सम्भवतीति वाच्यम् । अज्ञानप्रत्यूढत्वपक्षेऽपि साम्यात् । नचाज्ञानस्यावरणत्वेनात्मन आवृतत्वरूपप्रत्यूढत्वोक्तिः सम्भवतीति वाच्यम्। अज्ञानकल्पनापेक्षया पापादीनामेवैतच्छ्रुत्याऽऽव-रणतया प्रतिबन्धकत्वकल्पनस्यौचित्यात् ।

किञ्चानृतशब्दस्य कयापि वृत्त्याऽज्ञानवाचकत्वाभावाच्च । नचानृत-पदेन लक्षणया तद्बोध इति वाच्यम् । वाच्यार्थासम्भवे लक्ष्यार्थाङ्गी-कारः । प्रकृते 'न ऋतमनृम्' इति व्युत्पत्त्याऽनृतशब्दस्य दुष्कृत-रूपवाच्यार्थसम्भवेऽज्ञाने लक्षणाङ्गीकारस्यानौचित्यात् । तस्मात् परमतेऽज्ञानसाधकप्रमाणाभावान्नाज्ञानं सम्भवतीति ।

'न तं विदाथ य इमाः जजानान्यद्युष्माकमन्तरं बभूव। नीहारेण प्रावृता जल्प्याः चासुतृप उक्थशासश्चरन्ति।' 'सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति'

इत्यादिश्रुतिद्वयमज्ञानसद्भावे प्रमाणम् । नीहारपदस्य नीहारसदृशाज्ञानर्थत्वात् । द्वितीयश्रुतौ तमःपदस्य तमःसदृशाज्ञानार्थकत्वादिति न वाच्यम् । प्रथमश्रुतौ नीहारपदस्यावरकत्वेन नीहारसादृश्योपेतप्रधानवाचकत्वात्। द्वितीयश्रुतावपि तमःपदस्य तमोगुणकारणीभूतप्रकृत्याख्यप्रधानार्थकत्वात् । कार्येण कारणोपलक्षणाङ्गीकारात् । 'न तं विदाथ' इत्यादेरयमर्थः- हे नराः, तं न जानीथ य इमाः प्रजाः जजान= जनयामास । तत्र निमित्तम् 'युष्माकमन्यदेवान्तरं बभूव' तदुच्यते- नीहारसदृशप्रधानेन प्रावृताः, अत एव यूयं जल्प्याः= जगज्जन्मादिकारणं परमात्मानं विहाय हेयपदार्थविषयजल्पनशीलाः, असून्= प्राणान्, तर्पयन्तीति स्वप्राणपरिरक्षणतात्पर्यवन्तः । अत एवोक्थशासः, उक्थं= भगवदितरविषये स्तोत्रविशेषादिकं शंसन्तीत्युक्थशासः । एवम्भूताः सन्तः भवन्तः चरन्ति= नानायोनिषु सञ्चरन्तीति ।

नच नीहारपदेऽज्ञानरूपार्थपरेऽपि सम्भवति सति तस्य प्रधानपरत्वमेवेत्यत्र किं विनिगमकमिति वाच्यम् । नीहारपदस्योक्तरीत्या प्रधानपरत्वेनाप्युपपत्तौ भवन्मते नीहारपदस्याज्ञानपरत्वमेवेति निश्चयोपायाभावादित्यत्र तात्पर्यात्। विस्तृतं चैतत् परमताज्ञाननिराकरणं टीकाकृत्पादश्रीमच्चरणैः सुधादिग्रन्थेषु । विस्तरभयान्नेह लिख्यते ।

एवमाद्यनेकदूषणजालाब्धिमग्नो भूत्वा तारिताज्ञानसाधनाब्धिं मन्यमानः सन् ,

'श्रीमद्गुरुपदाम्भोजस्मरणप्लवसंश्रयात् ।
अज्ञानसाधनाब्धिर्मे सन्तारसुखदो भवेत् ॥' (शां.पा.भूषणम्)

इति यत्पद्यं रचितवान् तदतीव हास्यास्पदमिति प्रतिभाति ।

एवञ्चोक्तरीत्या परमतेऽज्ञानासिद्ध्या तदधीनविषयप्रयोजनाधिकार्याद्यसिद्धौ विवरणवाचस्पत्यादिनिबन्धोक्तरीत्या शास्त्रानारम्भारम्भरूपपूर्वपक्षसिद्धान्तग्रथनरूपैतदधिकरणयोजना अतितरामयुक्तैवेति दिक् ॥

(द्वैतभाष्योक्तप्रथमसूत्रपूर्वपक्षसमर्थनम्)

'आनन्दतीर्थीयास्तु' इत्यारभ्य 'एतदधिकरणरचनामाहुः' इत्यन्तेन श्रीमदानन्दतीर्थश्रीमच्चरणीयानां जिज्ञासाधिकरणपूर्वपक्षसिद्धान्तावुपपाद्य 'तत्र पूर्वपक्षस्तावदयुक्त एव' इत्यारभ्य 'चन्द्रिकोक्तविकल्पखण्डनावसरः' इत्यन्तेन 'सिद्धान्तोऽप्ययुक्त एव' इत्यारभ्य 'आनन्दमयाधिकरणे निराकरिष्यत इति दिक्' इत्यन्तेन च यत्प्रतिपादितं तदप्यसमीचीनमेव । तथाहि । ब्रह्मणः जीवाभिन्नत्वेन जीवस्य त्वहमिति स्वप्रकाशतया भासमानत्वेन निश्चिततया सन्दिग्धत्वाभावत् तस्य विषयत्वासम्भवेन शास्त्रस्य विषयासम्भवपूर्वपक्षस्य युक्तत्वात् । नच 'स्थूलोऽहं, दुःखी, कर्ता, भोक्ता' इत्याकारकप्रत्यये विशिष्टरूपेण प्रत्यगात्मनः भानेऽपि तद्विपरीतवेदान्तवेद्यशुद्धात्मनः सन्दिग्धतया शास्त्रस्य सविषयत्वसिद्धिरिति वाच्यम् । विशिष्टस्य भाने विशेष्यस्याभानायोगात् । अन्यथा दण्डविशिष्टपुरुषस्य भानेऽपि पुरुषस्याभानमिति स्यात् । शुद्धात्मनः वेदान्तवेद्यत्वे दृश्यत्वापत्त्या मिथ्यात्वापत्तेश्च । विस्तृतं

चैतदहंप्रत्यये शुद्धाभाननिराकरणं 'शुद्धो न भातीति कोऽर्थः' इत्यादिना चन्द्रिकायाम् ।

नच चन्द्रिकोपरि दूषणमभिधाय 'तदुक्तं न सम्भवति' इत्युक्तमस्तीति वाच्यम् । चन्द्रिकाखण्डनं मन्यमानभवदीयदूषणस्यापि पूर्वं दूषितत्वात् ।

(सिद्धान्तसमर्थनम्)

सिद्धान्तोऽपि युक्त एव । तथाहि । ब्रह्मणः विषयत्वसम्भवात् । नच जीवब्रह्मणोरभेदेन जीवस्य स्वप्रकाशतया निश्चिततत्वेन न शास्त्रस्य विषयत्वसम्भव इति वाच्यम् । गुणपूर्तिवाचिना ब्रह्मपदेन जीवब्रह्माभेदाशायाः दूरोत्सारित्वात् । नचानन्दवल्ल्यां सर्वात्मस्वरूपब्रह्मविज्ञानात् परब्रह्मभावरूपपरब्रह्मप्राप्तिमभिधाय तादृशब्रह्मज्ञानसाधननिरूपणपरभृगुवल्ल्यां ब्रह्मज्ञानसाधनब्रह्मविचारविधिपरे 'तद्विजिज्ञासस्व तद् ब्रह्म' इति वाक्ये ब्रह्मशब्दस्य जिज्ञासासूत्रे प्रत्यगभिन्नब्रह्मण एव विषयत्वप्रतिपादिकया (अस्य 'युक्त्या' इत्यनेनान्वयः) विचारफलत्वेन सूत्रितस्य ब्रह्मज्ञानस्य स्वतोऽपुरुषार्थतया जीवगतकर्तृताध्यासरूपबन्धनिवर्तकत्वेनैवापेक्षणीणतायाः वाच्यतया भिन्नविषययोरध्यासतत्वज्ञानयोर्निवर्त्यनिवर्तकभावासम्भवात् प्रत्यगभिन्नब्रह्मैव विचार्यमिति सिध्यति, इत्युक्तयुक्त्या प्रत्यगभिन्नब्रह्मपरत्वेनाल्पगुणजीवभिन्नबृहद्गुणब्रह्मपरत्वायोग इति वाच्यम् । 'अहं कर्ता, भोक्ता' इति प्रतीतिमन्यथोपपाद्य जीवगतकर्तृताध्यासान्यथानुपपत्तिरूपोक्तयुक्तेः पूर्वं निरस्तत्वात् ।

नच 'ब्रह्मविदाप्नोति परम्' इत्यस्मिन् वाक्ये ब्रह्मविज्ञानात् परब्रह्म-

भावरूपपरब्रह्मप्राप्तिरुच्यते । अतः ब्रह्मपदस्य प्रत्यगभिन्नब्रह्मपरतेति वाच्यम् । तत्र ब्रह्मज्ञानिनः ब्रह्मप्राप्तिः प्रतिपाद्यते न तु ब्रह्मभावः । नहि लोके कश्चित् पुरुषः 'देवदत्तः ग्रामं प्राप्नोति' इति वाक्येन देवदत्तस्य ग्रामभावप्राप्तिं प्रतिपद्यते । किन्तु ग्रामप्राप्तिमेवेत्यतः ब्रह्मपदस्य प्रत्यगभिन्नब्रह्मपरत्वायोगात् ।

नच दशमस्याव्यवहितस्य स्वस्वरूपतया प्राप्तस्यापि सतः बाह्य-सङ्ख्येयासक्ततया 'नवैव वर्तामहे' इति विपर्यासं प्राप्तवतः स्वरूपादर्शनेन 'दशमोऽप्राप्तः' इति मन्वानस्य 'दशमस्त्वमसि' इति केनचित् स्मारितस्य स्वरूपाज्ञाननिवृत्त्या दशमप्राप्तिवत् सर्वगतसर्वात्मभूतब्रह्मरूपजीवस्य मुख्यायाः ब्रह्मप्राप्तेरयोगेऽप्यनाद्यविद्यया भूतांशकृतान्नमयाद्यानन्द-मयान्तान् अनात्मन आत्मत्वेन पश्यतः 'तेभ्यो नान्योऽहम्' इति मन्वानस्याविद्ययाऽनाप्तब्रह्मस्वरूपस्य श्रुत्युपदिष्टसर्वात्मब्रह्मणः स्वात्म-त्वज्ञानेनानात्मत्वभ्रमनिवृत्यात्मक-तदाप्तिः औपचारिक्युपपद्यत इति वाच्यम् । दशमस्त्वमसीति केनचित् स्मारितोऽपि पुरुषः 'स्मृतदशमः' इत्येवोच्यते । न तु 'प्राप्तदशमः' इत्यतस्त्वस्य दृष्टान्तरस्य वैषम्यात् । नच तादृशभ्रमनिवृत्यात्मकतदाप्तिरौपचारिक्युपपद्यत इत्युक्तमिति वाच्यम् । मुख्यार्थासम्भवे ह्यमुख्यार्थाङ्गीकारः लोके दृष्टः । प्रकृते परब्रह्मप्राप्तिरूपमुख्यार्थस्यैव सम्भवेऽमुख्यार्थाङ्गीकारायोगात् ।

('उदरमन्तरं कुरुते' इति श्रुत्यर्थः)

नच जीवब्रह्माभेदरूपबाधकवशादमुख्यार्थाङ्गीकार इति वाच्यम् । तयोरभेदसाधकत्वेनोक्तानां तत्वमसीत्यादिवाक्यानामभेदबोधनविषये बाधकान्युपपाद्यातदर्थत्वस्य पूर्वमुक्तत्वात् । नच,

'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति' इत्यनेन उत् अपि अरं= अल्पमपि उपास्योपासकभावादिलक्षणमपि, अन्तरं= भेदं, कुरुते= पश्यति, अथ तस्य भयं भवतीति भयमुच्यते जीवब्रह्मभेदं जानतः । अतस्तयोर्भेदबाधकस्य सत्त्वादभेद एव तत्व-मस्यादिवाक्यानामर्थो वक्तव्य इति वाच्यम् । भवेदेषा श्रुतिर्बाधिका यद्युक्तार्थ एव श्रुतेरस्याः भवेत् । नचैवम् । अर्थान्तरस्य सत्त्वात् । तथाहि । एषः= उपासको जीवः, यदा उदरं, उद्= उत्कृष्टं, अः= अकारो वासुदेव इत्युदः= परमात्मा येभ्यस्ते जीवाः, तेषु रं- ऋ गतावित्यतः गतं= जीवेषु परस्परं स्थितम् ईशप्रतियोगिकं चान्तरं= भेदं भगवद्रूपेषु कुरुते= पश्यति, अथ तस्य भयं भवतीति । अवश्यं चैतदेवम् । अन्यथा व्यावहारिकभेदस्य जीवपरमात्मनोस्त्वयाऽङ्गीकृतत्वेन सामान्यतः भेद-दर्शननिषेधस्य कर्तुमशक्यत्वात् ।

नच पारमार्थिकभेददर्शनं निषिध्यत इति वाच्यम् । श्रुतौ भेदे पारमार्थिकत्वबोधकपदाभावात् । नच 'भगवद्रूपेषु' इति वा कथमागच्छति तद्बोधकपदाभावादिति वाच्यम् । अन्तरमित्यस्यावृत्तिः । एकदाऽन्तर-मित्यस्य भेदमित्यर्थः । अन्यदा त्वन्तरमित्यत्रार्शाद्यच् । अन्तरवदिति पर्यवसितम् । अन्तरवत्त्वं चाधेयतयाऽन्तरवृत्तीति यावत् । अन्तरवदित्य-स्यान्तःस्थित्वा रमणकृदिति व्युत्पत्त्याऽन्तराणि= भगवद्रूपाण्याधेयतया तद्वन्तं= तद्वर्तिनमिति यावत् । तथाच उदाः= जीवाः, तेषु रं= गतं अन्तरं= भेदमन्तरं= नियामकत्वेनान्तःस्थित्वा रमणकृत्भगवद्रूपेषु वर्तिनं यदा कुरुते= पश्यति तदा भयङ्गतो भवतीत्यर्थः । एवञ्च भगवद्रूपेषु परस्परं, मूलरूपेण साकं च भेदं यः पश्यति सः भयङ्गतो भवतीति

पर्यवसितम्। अथवाऽन्तरमित्यस्य, अन्तः= भगवद्रूपान्तः, रं= गतमिति वार्थः। तथाचोक्तश्रुतेर्न जीवब्रह्मभेदे बाधकत्वं सम्भवतीति।

('द्वितीयाद्धि भयं भवति' इति श्रुत्यर्थः)

नच 'द्वितीयाद्धि भयं भवति' इति श्रुत्या स्वव्यतिरिक्तेश्वरदर्शिनश्च भयप्रतिपादनेन न जीवब्रह्मभेदः सम्भवतीति वाच्यम्। तादृशवाक्यस्यापि नायमर्थः। किन्तु द्वितीयात्= परमात्मनः सजातीयद्वितीयवस्तुदर्शनाद्भयं भवतीत्यर्थः। एवञ्चैतच्छ्रुतेरपि न जीवब्रह्मभेदे बाधकत्वं सम्भवतीति दिक्।

नचेश्वरः स्वयमेकः सन्नपि तस्मिन्नानन्दमयाधिकरणोक्तरीत्याऽन्नमयप्राणमयादिरूपेण नानात्वादेरेकत्वविरोधश्च,

'ऐश्वर्यान्न विरोधश्च चिन्त्यस्तस्मिन् जनार्दने'

इत्यादिवचनेन परमेश्वरीयाचिन्त्याद्भुतशक्तिरूपैश्वर्यवशान्निर्वाह इव सकलगुणपूर्णस्य ब्रह्मण अल्पगुणजीवभावोऽपि तदीयैश्वर्यवशादेव निर्वहतीति न जीववैलक्षण्यं तस्य ब्रह्मशब्देन सिद्ध्यतीति वाच्यम्। (शां.पा.भू., पृ. ६०) यत्र प्रामाणिकेऽर्थे युक्तिसञ्चारस्य नावकाशः तत्रैवैवंरीत्या निर्वाहः, न सर्वत्र। प्रकृते ब्रह्मणः जीवभावस्याप्रामाणिकत्वेनोक्तरीतेरनवकाशात्।

किञ्च स्वतन्त्रस्य प्रेक्षावतः दुःखसाधनजीवभावोपादानासम्भवाच्च।

किञ्च 'नेह नानास्ति किञ्चन' इत्यारभ्य 'कल्पयितुं सुशकम्' इत्यन्तेन यदुक्तं (शां.पा.भू., पृ. ६१) तदप्येतेनैव परास्तम्। आश्रयविषय-

प्रमाणानां निराकरणेऽज्ञानस्य भवन्मतेऽङ्गीकर्तुमशक्यत्वस्योक्तत्वाच्च ।

(जीवेशभेदे प्रत्यक्षयुक्तिसमर्थनम्)

यदुक्तम् 'अपि चाग्रे आनन्दतीर्थीयमते निरूपणीयं न्यायजातमपि न जीवेशयोर्भेदं व्यवस्थापयितुं प्रभवति' इति (शा.पा.भू., पृ.६३) तदप्यनुपपन्नम् । प्रत्यक्षं तावज्जीवेशयोर्भेदे प्रमाणं सम्भवति । यद्यप्यनवगतेश्वरस्य पुंसः स्वात्मनि तद्भेदो न प्रत्यक्षः । भेदप्रत्यक्षकारणस्यानुयोगिज्ञानस्याभावात् । तथापि शास्त्राधिगतसर्वज्ञत्वसर्वशक्तित्वादिमदीश्वरस्य स्वात्मानं च तद्विरुद्धाल्पज्ञत्वाल्पशक्तित्वादिधर्मवन्तं साक्षिणा जानतः स भेदः प्रत्यक्ष एव । यो हि यमर्थमवगम्य तद्विरुद्धधर्माणं यमर्थं पश्यति सः तस्माद्भेदं साक्षात्करोतीति नियमात् । नच 'सुरभि जलम्, सुरभिः पवमानः' इत्यादिप्रत्यक्षस्य पार्थिवावयवसंसर्गेणेव 'कृशोऽहम्, स्थूलोऽहम्, मनुष्योऽहम्, कुणिरहम्' इति बहुषु दृष्टाप्रामाण्यकप्रत्यक्षसजातीयस्य 'अहमल्पज्ञः, अल्पशक्तिमान्, अहं कर्ता, भोक्ता, सुखी, दुःखी' इत्यादिप्रत्यक्षस्यान्तःकरणतादात्म्येन तदुपाधिकधर्मावगाहितया भ्रमत्वमिति वाच्यम् । पूर्वं कृतनिराकरणभ्रमस्य 'कृशोऽहं स्थूलोऽहम्' इत्यादिप्रत्यक्षस्य पुनः भ्रमत्वनिराकरणस्य पिष्टपेषणत्वात् ।

किञ्च 'कृशोऽहं स्थूलोऽहम्' इत्यादेः प्रत्ययस्य 'अहमल्पज्ञः' इत्यादौ प्रत्यये चाहंपदार्थस्य (आत्मनः) कृशत्वाद्याश्रयदेहाश्रयत्वेनाल्पज्ञानाश्रयन्तःकरणाश्रयत्वेन च परम्परया कृशत्वाल्पज्ञानाद्याश्रयत्वस्यापि सम्भवेन, गृहस्य मणिमालाश्रयमञ्जूषाश्रयस्य मणिमालाश्रयत्वविवक्षया

'मन्दिरे मणिमाला' इति प्रमावदस्यापि प्रत्ययस्य प्रमात्वोपपत्तौ भ्रमत्वकल्पनाया अन्यायत्वात् ।

अभ्युपेत्य चेदमुच्यते । कृशोऽहमित्यादिप्रत्यक्षस्याप्रामाण्येऽप्यहमल्पज्ञ इत्यादिप्रत्यक्षस्याप्रामाण्ये किं बीजम् ? तत्साजात्यमित्येव चेत्, साजात्यं किं स्वविषयविषयकप्रत्यक्षत्वेन वा स्वविषयताव्यापकविषयताकप्रत्यक्षत्वेन वोत केवलं प्रत्यक्षत्वेन । नाद्यः । 'मम देहः' इति प्रत्यक्षस्य भ्रान्तित्वप्रसङ्गः । तस्याप्यहंपदार्थविषयकत्वेन कृशोऽहमिति प्रत्यक्षसजातीयत्वात् । न द्वितीयः । 'अहमल्पज्ञः' इत्यादिप्रत्ययस्य कृशोऽहमिति प्रत्यक्षविषयताव्यापकविषयताकत्वाभावेन तत्साजात्याभावादप्रामाण्यं न स्यात् । न तृतीयः । तथासति प्रत्यक्षमात्रस्य वा अप्रामाण्यापत्तेः । अतः जीवेशभेदे प्रत्यक्षं प्रमाणमित्यत्र यद्बाधकमुपन्यस्तं त्वया तत्परिहृतमिति सम्भवत्येव प्रत्यक्षं प्रमाणम् ।

एवं प्रत्यक्षागमावगतविरुद्धधर्मवत्त्वेन दहनतुहिनवत् तयोर्भेदोऽनुमातुं सुशक एवेत्यनुमानमपि तत्र प्रमाणं सम्भवति । नच 'कामः सङ्कल्पः' इत्यारभ्य 'सर्वं मनः' एवेत्यन्तेन श्रुत्या ज्ञानादीनामन्तःकरणधर्मत्वसिद्धेः जीवेश्वरयोः पक्षयोः सर्वज्ञत्वाल्पज्ञत्वरूपविरुद्धधर्माधिकरणत्वरूपहेत्वभावेन स्वरूपासिद्धिरिति वाच्यम् । सर्वज्ञाल्पज्ञमनसोरेव विरुद्धत्वेन विरुद्धधर्मपदेन सर्वज्ञाल्पज्ञमनसी चादाय विरुद्धधर्माधिकरणत्वस्योक्तपक्षयोः सम्भवात् ।

किञ्च तदाश्रयाश्रयस्य तदाश्रयत्वेन ज्ञानाद्याश्रयान्तः करणाश्रयत्वेन ज्ञानाद्याश्रयत्वस्याप्यक्षततया विरुद्धधर्माधिकरणत्वस्योक्तपक्षयोः

सत्त्वात्। नच वृक्षे मूलाग्ररूपावच्छेदकभेदेन संयोगतदभावयोरिव, एकत्रैव चैतन्येऽन्तःकरणमायारूपावच्छेदकभेदेन सर्वज्ञत्वाल्पज्ञत्वादि-धर्मस्वीकारसम्भवेन सर्वज्ञत्वाल्पज्ञत्वादीनां विरोध एव नास्तीति वाच्यम् । अवेच्छदकाधिकरणसम्बन्धिन एवावच्छेदतयान्तःकरणस्या-वच्छेद्याधिकरणचैतन्यसमन्धेऽपि, अज्ञानप्रभेदरूपायाः मायायाः स्व-प्रकाशचैतन्यसम्बन्धस्य पूर्वमसकृन्निराकृतत्वेन मायाया अवच्छेद-कत्वासम्भवात् ।

किञ्च व्याप्यवृत्तेरवच्छेदकानभ्युपगमेन जीवेऽल्पज्ञताया ईशे सर्वज्ञ-तायाश्च व्याप्यवृत्तित्वाङ्गीकारेण तयोरवच्छेदकास्वीकाराच्च ।

किञ्च त्वन्मते जीवस्य ब्रह्मभावदशायामपि मायावच्छेदेन ब्रह्मणः जीवैक्यम् । अविद्यावच्छेदेन तदभाव इत्यपि वक्तुं शक्यत्वेन मोक्ष-दशायामप्यैक्यतदभावयोरापाताच्च । नचाविद्यानिवृत्तेरेव मोक्षत्वेन मोक्षदशायामविद्याया एवाभावेन नैवमापादनं सम्भवतीति वाच्यम् । अविद्याव्यतिरेकावच्छेदेनैक्यम्, स्वरूपेण मायाव्यतिरेकावच्छेदेन वा तदभाव इति वक्तुं शक्यत्वेन मोक्षदशायामप्यैक्यतदभावयोरापा-तापत्तेर्दुर्वारत्वापत्तेः ।

ननु विरुद्धधर्माधिकरणत्वेन जीवेश्वरयोर्भेदसाधनं न भवद्भिः कर्तुं शक्यम् । परस्परानभिमतखाण्डवदाह-प्रशमनाभ्यामाराध्यत्वाराधक-त्वाभ्यां च विरुद्धगुणाभ्यां युक्तयोराखण्डलार्जुनयोरंशांशिनोर्निर्भेद-त्वस्य भवद्भिः 'एक आत्मनः शरीरे भावात्' इत्यधिकरणे व्यवस्था-पनादिति चेन्न । विरुद्धधर्माधिकरणत्वादित्यस्य विरुद्धस्वरूपभूतधर्माधि-करणत्वादित्यर्थः । दृष्टान्तयोः दहनतुहिनयोः सतोरुष्णत्वशीतलत्व-

योस्तत्स्वरूपत्वेन तत्र हेतुसत्त्वम् । पक्षयोर्जीवेशयोर्विद्यमानयोरल्पज्ञत्वसार्वज्ञयोस्तत्स्वरूपत्वेन तौ आदाय पक्षेऽपि हेतुसत्त्वम् । इन्द्रार्जुनयोर्विद्यमाने खाण्डवदाहप्रशमने न तत्स्वरूपे, किन्त्वौपाधिके एव । आराध्यत्वाराधकत्वेऽपि तथैव । उपाधिश्च प्रथमं रोषेर्ष्यादिः । द्वितीये पितृत्वपुत्रत्वादिः । तथाचेन्द्रार्जुनयोरुक्तहेत्वभावेनैव व्यभिचारानवकाशात् । विरोधश्च परस्परविरहव्याप्यत्वम् ।

नच धर्माणां स्वरूपत्वे धर्मिणः तदधिकरणत्वं न सम्भवति । अभेदे आधाराधेयभावानभ्युपगमादिति वाच्यम् । अभेदे भेदकार्यनिर्वाहकविशेषमहिम्नाऽऽधाराधेयभावसम्भवात् ।

एतेन 'जीवब्रह्मणोर्भेदाभावे ब्रह्मगतभोगानां जीवेऽप्यनुसन्धानं स्यादिति परोक्तं दूषणं निरस्तम्' इत्यभिधाय 'यदुक्तं त्वन्मते भेदाभावेऽप्यर्जुनेन्द्रभोगाननुसन्धानवज्जीवे ब्रह्मभोगाननुसन्धानोपपत्तेः' (शां.पा.भू., पृ. ७२) इति तदयुक्तम् । तथाहि । भुवि जातेनेन्द्रांशेनार्जुनेनांशीन्द्रगतसुखदुःखादिकं किञ्चिदनुभूयत एव । सर्वस्याप्यनुसन्धानाभावरूपः कश्चिद्विशेषः ईशकृत इत्यङ्गीकारादयं दृष्टान्तो विषम एव । जीवब्रह्मभोगानां मध्ये कस्याप्यनुसन्धानाभावात् । तथा जीवब्रह्मणोर्भेदाभावे जीवब्रह्मभोगानां मध्ये यस्य कस्यापि भोगस्यानुसन्धानं स्यादिति दूषणं सुदृढम् ।

किञ्चांशगतसुखदुःखादेः सर्वस्यांशिनानुभूयमानत्वेन जीवस्य ब्रह्मस्वरूपांशत्वे जीवगतदुःखाद्यनुसन्धानं ब्रह्मणः स्यादेवेति दिक् ।

(भेदे श्रुतिप्रामाण्यसमर्थनम्)

एवं विरुद्धधर्माधिकरणत्वोपपत्तिसहिताः द्वा सुपर्णेत्यादिश्रुतयोऽपि जीवेशभेदे प्रमाणम् ।

यदत्रोक्तम्- 'द्वा सुपर्णेत्यादौ न तावद्भेदः प्रमेयः । अपदार्थत्वाद-वाक्यार्थत्वाच्च । श्रुतद्वित्वार्थापत्तिसमधिगम्यस्य भेदस्यापि श्रौतत्वमेवेति स्वीकारेऽपि, अद्वैतश्रुतिविरोधेन पारमार्थिभेदपरत्वाभावात् । अत एवोत्तरार्धस्यापि न तात्त्विकभेदपरत्वम्' (शां.पा.भू., पृ.७२) इति तदनुपपन्नम् । अस्याः श्रुतेः पारमार्थिकभेदपरत्वाभावे जीवेशयोः कर्म-फलाशनानशनोक्तेरसङ्गतत्वापत्तेः । नच जीवेशयोरौपाधिकभेदेनापि तदुक्तिः सम्भवतीति वाच्यम् । औपाधिकभेदसत्त्वेऽपि योगप्रभावोत्पा-दितानेकशरीरवतः सौभरिमुनेः नानादेहावच्छिन्नभोगाशनस्य दृष्टत्वे-नौपाधिकभेदस्य कर्मफलाशनानशनप्रयोजनकत्वाभावात् ।

किञ्चौपाधिकभेदस्यानुभवाननुभवप्रयोजकत्वे,

> 'उद्यतायुधदोर्दण्डाः पतितस्वशिरोक्षिभिः ।
> पश्यन्तः पातयन्ति स्म कबन्धा अप्यरीन् युधि ॥'

इति भारतवाक्ये कबन्धावच्छिन्नचैतन्यानां युधि अरीनुद्दिश्य पात-नोक्तेरसङ्गत्यापत्तेः । अत्रापि शिरोवच्छिन्नचैतन्यकबन्धावच्छिन्न-चैतन्यानां परस्परमौपाधिकभेदसत्त्वात् । नचात्राप्यननुसन्धानमेवास्त्विति वाच्यम् । कबन्धावच्छिन्नचैतन्यानां पतितमस्तकावच्छिन्नचैतन्याधिष्ठि-ताक्षिकरणकदर्शनोक्तेरसङ्गत्यापत्तेः । नह्यन्यदीयेन चक्षुषाऽन्यः पश्यतीति युज्यते । अतः औपाधिकभेदस्य कर्मफलानुभवाननुभवाप्रयोजकत्वेन जीवेशयोः पारमार्थिकभेदस्यैव वक्तव्यतया नापारमार्थिकभेदपरत्वम् ।

एतेन 'अस्य वाक्यस्य द्वौ चन्द्रमसौ इत्यादाविव काल्पनिकभेदानुवादेनाप्युपपत्तेः' इति निरस्तम् । पारमार्थिकभेदपरत्वस्यैवोक्तत्वात् । नच भेदानुवादकत्वमप्यस्य सम्भवति । उत्तरत्र तन्निषेधाभावात् । भेदविधायकत्वे बाधकाभावाच्च । नचाद्वैतश्रुतिर्बाधिकेति वाच्यम् । अशनानशनरूपविरुद्धधर्माधिकरणत्वयुक्तिसाहित्येन प्रबलायाः भेदश्रुतेर्दुर्बलयाऽद्वैतश्रुत्या बाधासम्भवात् । नचाद्वैतश्रुतीनामपि 'जीवो ब्रह्माभिन्नः, तज्ज्ञान-निवर्त्यतदज्ञानप्रयुक्तकर्तृताध्यासाश्रयत्वात्' इत्यादियुक्तिसाहित्येन प्राबल्यमिति वाच्यम्। अज्ञानस्य कर्तृताध्यासस्य च निरस्तत्वेन हेतोरेवासिद्धिः ।

('द्वा सुपर्णा' इति वाक्यस्य बुद्धिजीवपरत्वनिरासः)

यदुक्तम्- 'उत्तरार्धस्य बुद्धिजीवपरत्वम्' इति तदसत् । प्रथमं कर्मफलादनकर्तृत्वेन चेतनस्यैवान्यपदे प्रस्तुतत्वेन द्वितीयान्यपदस्यापि चेतनत्वेन सजातीयान्यवस्तुबोधकत्वस्यैव प्राप्त्याऽनश्नन्नन्यः इत्यस्याचेतनबुद्धिपरत्वायोगात् । 'अस्य गोरन्योऽन्वेषणीयः' इत्युक्ते श्रोता द्वितीयगवान्वेषणमेव प्रत्येति न पुनर्जडान्वेषणम् । नच बुद्धिशब्देन बुद्धितत्वाभिमानिजीवस्यैव ग्रहणमिति वाच्यम्। तस्यापि कर्मफलादनकर्तृजीवेष्वेव प्रवेशेनानश्नन्नित्यस्य तत्परत्वासम्भवात् ।

किञ्च बुद्धिपदेन किं चेतनग्रहणमुताचेतनस्य। न द्वितीयः। अचेतनग्रहणासम्भवस्योक्तत्वात्। आद्येऽपि जीवत्वेन व्यवहारविषयस्य ग्रहणम् उत तदविषयस्य । नाद्यः । तस्य कर्मफलाशनकर्तृत्वेनानश्नन्नित्यस्य तत्परत्वासम्भवात् । द्वितीये त्वस्मदङ्गीकृतेश्वरस्यैव नामान्तरेण ग्रहणं प्राप्तमिति न नो हानिरिति ।

किञ्चात्र,

'समाने वृक्षे पुरुषो निमग्नो अनीशया शोचति मुह्यमानः'

'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः'

इत्युत्तरमन्त्रे जीवान्येशज्ञानस्य मोक्षहेतुत्वोक्त्या जीवेशपरत्वावगमात् तदैकरूप्याय पूर्वस्मिन् द्वा सुपर्णेत्यादि मन्त्रेऽपि जीवेशपरत्वकल्पनस्यैवोचितत्वाच्च । नच 'जुष्टं यदा पश्यत्यन्यमीशम्' इति वाक्ये कस्मादन्यमित्याकाङ्क्षायां शरीरादन्यं स्वात्मानं पश्यतीत्यर्थ एव प्रकृतोपयुक्तो विवक्षितः । न स्वस्मादन्यमीशं पश्यतीत्यर्थः । कुत इति चेत्, 'समाने वृक्षे पुरुषो निमग्नः' इति पूर्वार्धे निमग्नपदेन शोकहेतुतया शरीरतादात्म्यभ्रमस्योक्तत्वेनेह विशोकहेतुतया प्रतिपाद्यमानस्य दर्शनस्य शोकहेतुदर्शनविरोधिन एव वक्तव्यत्वात् ।

देहतादात्म्यभ्रमे च जीवान्येशज्ञानस्याविरोधितया न जीवेशभेदपरत्वमुत्तरमन्त्रस्यापीति वाच्यम् । एतन्मन्त्रस्यातदर्थत्वात् । कोऽसावर्थ इति चेत् । श्रुणु, मया सहितः समः=लक्ष्म्या, निरुपचरितपूर्णज्ञानेन वा सहितः परमात्मा । तेन अनम्=अननम्, चेष्टा यस्य स समानः, मुख्यतः भगवन्नियम्य इत्यर्थः। तादृशे देहाख्यवृक्षे निमग्नः मदतिरिक्तेशो नास्ति, अहमेवास्य ईश इति ज्ञानवान्, वृक्षविशेष्यकमदतिरिक्तेशानधीनत्वप्रकारकज्ञानवानिति यावत्, एवम्भूतः पुरुषो=जीवः, अनीशया= ईशविरोधिन्या बुद्ध्या मुह्यमानः सन् शोचति । यदा तु जुष्टम्=सर्वसेव्यमीशम्, मुख्यतः सर्वजगन्नियामकं भगवन्तं स्वस्मादन्यं पश्यति= जानाति तदा वीतशोको भवति। शोकरहितो भवतीति। तथाचास्य मन्त्रस्य जीवेशभेदपरतया तदैकरूप्याय द्वासुपर्णेत्यादिपूर्वमन्त्रस्यापि जीवेशभेदपरत्वमेव युक्तमिति ।

यदत्रोक्तम्- 'किञ्चान्यत्वव्यपदेशः अभेदविरोधीति त्वया न वक्तुं शक्यम् । प्राणमयादिषु ''अन्योऽन्तर आत्मा'' इत्यन्यत्वव्यपदेशोऽपि प्राणमयादीनां ब्रह्माभेदस्यान्नमयादीनां पञ्चानामपि ब्रह्मत्वमिति वदता त्वयेष्यमाणत्वात्' इति तदयुक्तम् । तथाहि । [१]स्वनिष्ठावच्छेदकताक-

---

१. स्वनिष्ठेत्यादि ।। स्वम्= ब्रह्मत्वम् । तन्निष्ठावच्छेदकताकप्रतियोगिताकभेदो नाम 'ब्रह्मत्ववान् न' इति भेदः। ब्रह्मत्ववत्वं च स्वविशिष्ट-अन्यत्वव्यपदेशत्व-सम्बन्धेन। तादृशसम्बन्धेन ब्रह्मत्ववत्वं 'अन्योऽन्तर आत्मा प्राणमयः' इति ब्रह्मरूपाणां भेदव्यपदेशे सम्भवति। 'द्वा सुपर्णा' इत्यादिजीवेश्वरभेदव्यपदेशे तु न सम्भवति।

तत्रान्यत्वे स्वपदवाच्यब्रह्मत्ववैशिष्टयं च स्वाश्रयप्रतियागिकत्व-स्वाश्रयानु-योगिकत्व-एतदुभयसम्बन्धेन ।

'अन्योऽन्तर आत्मा प्राणमयः' इत्यत्र यः भेदः (अन्यत्वम्) बोध्यते तस्य प्रतियोगि- अन्नमयाख्यं ब्रह्म, अनुयोगि च प्राणमयाख्यं ब्रह्म। अतः सः भेदः ब्रह्मत्वाश्रयप्रतियोगिकः, ब्रह्मत्वाश्रयानुयोगिकश्च भवति । तस्माद् तदुभय-सम्बन्धेन ब्रह्मत्वविशिष्टं यदन्यत्वं तद्व्यपदेशत्वं 'अन्योऽन्तर आत्मा प्राणमयः' इति व्यपदेशेऽस्ति। तेन तादृशसम्बन्धेन ब्रह्मत्ववानेव भवति सः व्यपदेशः। तद्वदन्यो न भवति। अतः सः व्यपदेशः उक्तसम्बन्धेन ब्रह्मत्वविशिष्टो न भवतीति नाभेदविरोधी।

'द्वा सुपर्णा' इत्यत्र तु जीव-ब्रह्मणोर्भेदः व्यपदिश्यते । तस्य च प्रतियोगी जीवः, अनुयोगी ईश्वरः। अतस्तत्र बोध्यमानम् अन्यत्वं स्वाश्रयानुयोगिकत्व-सम्बन्धमात्रेण ब्रह्मत्वविशिष्टं भवति । तेन तदुभयसम्बन्धेन ब्रह्मत्वविशिष्टं यदन्यत्वं तद्व्यपदेशत्वं तस्मिन् भेदव्यपदेशे नास्ति । तस्मादेव तादृशव्यप-देशत्वसम्बन्धेन सः व्यपदेशः ब्रह्मत्ववान् न भवति । अत एव सः व्यपदेशः तादृशभेदवत्त्वसम्बन्धेन ब्रह्मत्वविशिष्टः । तस्मात् सः अभेदविरोधी भवति ।

प्रतियोगिताकभेदवत्त्वसम्बन्धेन ब्रह्मत्वविशिष्टो योऽन्यत्वव्यपदेशः स अभेदविरोधीत्युच्यते । अवच्छेदकताघटकसम्बन्धः स्वविशिष्टान्यत्वव्यपदेशत्वम् । अन्यत्वे स्ववैशिष्ट्यं च स्वाश्रयप्रतियोगिकत्व-स्वाश्रयानुयोगिकत्वोभयसम्बन्धेन । तथाच स्वाश्रयप्रतियोगिकत्व-स्वाश्रयानुयोगिकत्वोभयसम्बन्धेन स्वविशिष्टान्यत्वव्यपदेशत्व-सम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन ब्रह्मत्वविशिष्टान्यत्वव्यपदेश अभेदविरोधीति पर्यवसितम् । एवञ्च 'सत्यं ज्ञानमनन्तं ब्रह्म' इति मन्त्रवर्णे ब्रह्मलक्षणप्रतिपादकानां सत्य-ज्ञानादिपदानामन्नमयादिपञ्चानां पदानां चार्थविचारे कृते सति ब्रह्मरूपैकार्थत्वप्राप्त्याऽन्नमयादीनां पञ्चानां बह्मतासिद्धौ ब्रह्मरूपेषु भेददर्शनस्य प्रबलबहुप्रमाणनिषिद्धतया ब्रह्मरूपेष्वन्योन्यं भेदाभावेन तत्र श्रूयमाणान्यत्वव्यपदेशस्योक्तसम्बन्धेन ब्रह्मत्वविशिष्टत्वाभावेन तत्राभेदविरोधिन उक्तसम्बन्धेन ब्रह्मत्वविशिष्टान्यत्वव्यपदेशस्याभावेन सम्भवत्येव तत्राभेदः । जीवब्रह्मणोस्तावत् भेददर्शनस्योपक्रमोप-संहारादिरूपतात्पर्यनिर्णायकलिङ्गावगतप्रामाण्यवता निषेधाभावेन प्रत्युत तद्दर्शनस्य मोक्षहेतुत्वोक्तिसत्त्वेन च तत्र श्रूयमाणान्यत्वव्यपदेश-स्योक्तसम्बन्धेन ब्रह्मत्वविशिष्टत्वसम्भवेन ब्रह्मत्वविशिष्टान्यत्वव्यप-देशस्याभेदविरोधिनः द्वा सुपर्णेत्यादौ जीवब्रह्मणोः सत्त्वेन नाभेदस्तत्र वक्तुं शक्यते ।

मास्त्वन्नमयादिषु श्रूयमाण अन्यत्वव्यपदेश अभदेविरोधी । सोऽपि निर्भेदस्थले कथं युज्यते ? इति सुहृद्भावेन प्रश्ने विशेषबलाद्युज्यत इति ब्रूमः ।

यदुक्तम्- 'मायाविद्याकृतजीवेशयोर्भेदमाश्रित्य जीवे ब्रह्मान्यत्वव्यपदेशोऽपि तयोः स्वरूपाभेदे बाधकाभावात्' इति तदप्यसङ्गतम्। त्वन्मते मायाविद्ययोरसम्भवस्योक्तत्वात्।

किञ्च जीवेशभेदज्ञानस्य मोक्षसाधनत्वेनोक्तत्वात् जीवेशभेदस्य काल्पनिकत्वे तज्ज्ञानस्य मोक्षसाधनत्वाभावापत्त्या तदुक्तेरसङ्गत्यापत्तेश्च। जीवेशभेदस्य मायाविद्याकृतत्वासम्भवात्।

(परोक्ताथशब्दार्थविमर्शः)

''यत्तु चन्द्रिकायामुक्तविवरणरीत्याऽधिकारिविशेषतद्विशेषणप्रयोजनलाभायाथाब्दस्यानन्तर्यार्थकतामनूद्य 'न तावद्विचारविधौ त्वत्पक्षे मुमुक्षुरधिकारी, मोक्षश्च फलमिति युक्तम्। विचारो मोक्षसाधनतया न प्राप्त इति तद्विधेरपूर्वविधित्वापातात्। मुमुक्षोरपि ज्ञानकामनां विना विचारेऽप्रवृत्तेस्त्वन्मते च वक्ष्यमाणरीत्या ज्ञानकामनानुपपत्तेश्च। विचारविधौ ज्ञानकामोऽधिकारी ज्ञानं च फलमिति न युक्तम्। अध्ययनविधेर्ज्ञानकामनाधिकारं निषेधता त्वयाऽज्ञाते ज्ञाने कामनाया अयोगात्। ज्ञातज्ञाने च तदवच्छेदकविषयस्यापि ज्ञातत्वेन पुनस्तज्ज्ञानकामनाया अयोगादिति युक्त्या ज्ञानकामनानिषेधात्' इति दूषणमुक्तम्'' इत्यनेन चन्द्रिकोक्तदूषणमुपपाद्य 'तदेत्पूर्वापरविवरणग्रन्थमनालोचयतां प्रतारणामात्रमुत तद्ग्रन्थतात्पर्यानवबोधनिबन्धनं वेति न विद्म' इत्यभिधाय तथाहीत्यादिना पूर्वापरविवरणग्रन्थमनूद्य 'विचारैकसाध्यायाः प्रामाण्यसंशयनिवृत्तेरप्रामाण्यज्ञानानास्कन्दितनिर्णयस्य वा अध्ययनमात्रसाध्यतया तदुद्देशेन तद्विधानायोगादिति रीत्या ज्ञानकामनाधिकारित्वमध्ययनविधेर्निराकृतमिति गम्यते। नचैतावता परोक्षज्ञानकामनामात्रं

निषिद्धम् । विचारसाध्याप्रामाण्यशङ्काद्यभावविशिष्टत्वेन तत्कामनायाः बालेनापि सूपपादत्वात्' इत्यनेन विवरणाभिप्रायोपवर्णनपूर्वकं ज्ञानकामनां निषेधयतामनौचित्यं प्रतिपाद्य 'विवरण एव जिज्ञासेत्यारभ्य प्रमाणादि-विचारप्रयत्नसाध्यमित्यादिना परोक्षज्ञानकामनायाः स्पष्टमभिधानाद्युक्त-मेव विचारविधेर्मुमुक्ष्वधिकारिकत्वं विवरणमते' इति यदुक्तं तदपि न सम्यक् । अध्ययनविधेर्ज्ञानकामनाधिकारिकत्वनिषेधकत्वाद्युक्त-युक्तेर्गतिमचिन्त्य स्वोत्प्रेक्षामूलकल्पनामादाय विवरणाभिप्रायवर्णनस्य तवैवानौचित्यसम्पादकत्वात् ।

किञ्च विचारसाध्याप्रामाण्यशङ्काद्यभावविशिष्टत्वेन ज्ञानकामनाया अङ्गीकारेऽपि विचारविधेर्ज्ञानकामनाधिकारिकत्वं दुरुपपादमेव । तथाहि । अप्रामाण्यशङ्काद्यभावविशिष्टत्वेन ज्ञानकामना तु तादृश-शङ्काद्यभावरूपविशेषण एव पर्यवसन्ना तदिच्छैवेत्युच्यते, विशेषण-सम्पादनेनैव तादृशेच्छायाः चरितार्थत्वात् । नतु विशेष्यज्ञानकामनेत्यु-च्यते । ज्ञानस्य पूर्वमध्ययनमात्रसिद्धतया विषयसिद्धाविच्छाया असम्भ-वात् । धनवान् स्यामितीच्छा तु धनेच्छैवेत्युच्यते । तत्प्राप्त्यैव तन्निवृत्तेः । विशेष्येच्छेति तु सा नोच्यते, विशेष्यस्य पूर्वसिद्धत्वात् । तद्वदत्रापि । एवञ्चाप्रामाण्यशङ्काभावरूपविशेषणकामनाधिकारिकत्वमेव विचारविधेर्न ज्ञानकामनाधिकारिकत्वमिति ज्ञानकामनाधिकारिकत्वस्यैवाभावे तद्वारकं मुमुक्ष्वधिकारिकत्वं विचारविधेर्दूरोत्सारितम् ।

किञ्चाप्रामाण्यज्ञानानास्कन्दितनिर्णयकामनापि वा कथं युज्यते । अज्ञाते तादृशनिर्णये कामनाया अयोगात् । ज्ञाते च तादृशनिर्णये तदवच्छेदकविषयस्यापि ज्ञातत्वेन पुनस्तज्ज्ञानकामनाया अयोगादिति

ज्ञानकामनानिषेधकोक्तेस्तत्राप्यवकाशसम्भवात् । यद्युत्पन्ननिर्णय एवाप्रामाण्यशङ्कानिरसनेच्छया विचारे प्रवृत्तस्य मुमुक्षोर्विचारविधि-रित्यङ्गीक्रियते तर्हि ज्ञानं मे उत्पद्यतामिति ज्ञानकामनां विना मुमुक्षोर्विचारविधिरङ्गीकृता भविष्यतीति तद्विधेरपूर्वविधित्वापातस्य दुर्वारत्वात् ।

''यत्तु परोक्षज्ञानकामनाया अयोगेऽप्यपरोक्षज्ञाने कामना विचार-विध्यधिकारिविशेषणमस्त्वित्याशङ्क्य, इच्छाया अपरोक्षत्वात् तदव-च्छेदकज्ञानावच्छेदकविषयस्याप्यपरोक्षत्वात् इच्छासमकालवर्त्यपरोक्ष-ज्ञानस्य विचारसाध्यत्वानुपपत्तिरिति दूषणमुक्तम्' इति चन्द्रिकोक्त-दूषणमुपपाद्य तदसदित्यभिधाय 'परोक्षेच्छावच्छेदकज्ञानावच्छेदक-विषयस्य परोक्षत्वेऽपरोक्षेच्छावच्छेदकज्ञानावच्छेदकविषयस्यापरोक्षत्वेन परोक्षावच्छेदकज्ञानावच्छेदकतया धर्मादीनामप्यपरोक्षत्वापत्तेस्तथा नियमाभावात्' इति दूषणमुक्तम्'' (शां.पा.भू. पु. ७९) तदसत् । अपरोक्षेच्छावच्छेदकापरोक्षज्ञानावच्छेदकविषयस्य, अतीन्द्रियभिन्नस्य वा तादृशविषयस्यापरोक्षत्वमिति नियमाङ्गीकारे धर्मादीनामपरोक्ष-त्वापत्तेर्वारणसम्भवात् ।

''यदपि चन्द्रिकायाम्- 'विचारविधौ त्वत्पक्षे मुमुक्षुरधिकारी मोक्षश्च फलमिति न युक्तम् । विचारस्य मोक्षहेतुतयाऽप्राप्तत्वेन तदुद्देशेन श्रवणविध्युपगमेऽपूर्वविधित्वापातादिति दूषणमुक्तम्' (शां.पा.भू. पु. ८१) इति चन्द्रिकोक्तदूषणमुपपाद्य 'तदपि विवरणाभिप्रायानव-बोधनिबन्धनम्' इत्यभिधाय 'विचारविधेर्मोक्षफलकत्वम्, तद्विधेर्नियम-विधित्वं च वर्णयतः विवरणकारस्य ब्रह्मसाक्षात्कारद्वारैव मोक्षस्य

श्रवणरूपविचारफलकत्वस्याभिप्रेतत्वात्। ब्रह्मसाक्षात्कारे श्रवणस्य हेतुत्वं च श्रोतव्यार्थसाक्षात्कारे शास्त्रविचारात्मकश्रवणस्य हेतुतायाः षड्-जादिसाक्षात्कारहेतुगन्धर्वशास्त्रश्रवणादौ सिद्धत्वादेव सिद्धमिति नापूर्वविधित्वप्रसङ्गः' इति यदपूर्वविधित्वपरिहरणं तदप्यसङ्गतम्।

तथाहि। मोक्षं प्रत्यवश्यक्लृप्तनियतपूर्ववृत्तिना ब्रह्मसाक्षात्कारेण श्रवणस्यान्यथासिद्धत्वेन (मोक्षं प्रति) श्रवणस्याहेतुत्वात् विचार-विधेर्मोक्षफलकत्वासम्भवात्। नच व्यापारेण व्यापारिण अन्यथासिद्ध्य-सम्भवेन प्रकृते श्रवणस्य ब्रह्मसाक्षात्कारद्वारा मोक्षहेतुत्वस्योक्तत्वेन ब्रह्मसाक्षात्कारस्य व्यापारत्वेन तेन श्रवणस्य नान्यथासिद्धिसम्भव इति वाच्यम्। यत्र व्यापारिणः प्रमाणबोधितकारणतानिर्वाहाय व्यापारस्य कारणत्वं कल्प्यते तत्रैव व्यापारेण व्यापारिणः नान्यथासिद्धिः। न सर्वत्र। यागस्य प्रमाणबोधितस्वर्गकारणतानिर्वाहायापूर्वात्मकव्यापारस्य कारणत्वकल्पनात् तत्रैव व्यापारेण व्यापारिणः नान्यथासिद्धिरिति सम्भवति। अत्र तु श्रवणस्य मोक्षसाधनतायाः प्रमाणबोधितत्वाभावेन तस्य प्रमाणबोधितकारणतानिर्वाहाय ब्रह्मसाक्षात्कारकारणतायाः कल्पितत्वाभावेन तेन श्रवणस्य मोक्षं प्रत्यन्यथासिद्धेर्दुर्वारत्वात्।

किञ्च प्रसादं विना साक्षाद् ब्रह्मसाक्षात्कारस्यैव मोक्षहेतुत्वं वदता त्वया ब्रह्मसाक्षात्करं प्रति प्रसादस्यैव कारणत्वाङ्गीकारेण श्रवणस्य साक्षात्कारं प्रति हेतुत्वाभावाच्च।

(अथशब्दस्य मङ्गलार्थत्वसमर्थनम्)

'यत्तु चन्द्रिकायां मङ्गलस्याथशब्दार्थत्वाभावे तस्य वाक्यार्थे समन्व-याभावस्य हेतूकृतत्वात् तत्राथशब्दार्थत्वाभावस्य हेतुत्वोक्तावन्योन्याश्रय

इति निबन्धरीत्या व्याख्याने दूषणमुक्तम्' (शां.पा.भू. पु. ८४) इति चन्द्रिकोक्तं दूषणमुपपाद्य तदसदित्यभिधाय 'प्राथमिकस्याथशब्दार्थत्वाभावस्य तत्तात्पर्यगोचरत्वाभावरूपतयाऽन्योन्याश्रयताविरहात्' इति याऽन्योन्याश्रयपरिहारप्रक्रिया सैषा बालजनमनोहरैवेति दृश्यते। तथाहि। भवेदेतदन्योन्याश्रयपरिहरणं तत्पदतात्पर्यगोचरत्वाभावतः वृत्या पदप्रतिपाद्यत्वरूपपदार्थत्वाभावः भिन्नो भवेत्। नच तथा। उक्ताभावयोः समनियततया तयोरैक्यात्। नच तत्पदतात्पर्यविषयत्वाभावस्य वृत्त्या तत्पदप्रतिपाद्यत्वरूपपदार्थत्वाभावव्यापकत्वेऽपि तत्पदप्रतिपाद्यत्वाभावस्य तत्पदतात्पर्यगोचरत्वाभावव्यापकत्वं न सम्भवति। भोजनकाले लवणतात्पर्येण प्रयुक्ते सैन्धवमानयेति वाक्यघटकसैन्धवपदेऽश्वतात्पर्यकत्वाभावेनाश्वस्य सैन्धवपदतात्पर्यविषयत्वाभावेऽपि तत्पदप्रतिपाद्यत्वाभावाभावेन व्यापकत्वहान्या समनैय्यत्यभङ्गेन तयोरैक्यासम्भवादिति वाच्यम्। अश्वतात्पर्यकस्य सैन्धवपदस्य कालान्तरे प्रयोगसम्भवेन, तत्कालेऽपि पुरुषान्तरस्याश्वे सैन्धवपदतात्पर्यविषयत्वसम्भवेन च तत्तात्पर्यविषयत्वाभावस्याश्वेऽसम्भवात्।

किञ्च समनियताभावनां भेदेऽपि नान्योन्याश्रयपरिहारः सम्भवति। मञ्चाः क्रोशन्ति, मार्गाश्चलन्तीत्यादौ मञ्चमार्गादीनां तत्तत्पदप्रतिपाद्यत्वसत्त्वेऽपि वाक्यार्थे समन्वयाभावेन वाक्यार्थे समन्वयं प्रति तात्पर्यगोचरार्थत्वस्यैव प्रयोजकतया यस्मिन् यत्प्रयोजकं तदभावस्य तदभावे प्रयोजकतया भवता वाक्यार्थे समन्वयाभावप्रयोज्यतयोक्ततत्तात्पर्यविषयत्वाभावस्यैव वाक्यार्थे समन्वयाभावप्रयोजकतायाः वक्तव्यत्वात्।

'यत्तु चन्द्रिकायां सधूमो गिरिः साग्निक इतिवत्, ईक्षतेर्नाशब्दमित्यत्र त्वत्पक्षेऽशब्दमितिवच्च मङ्गलत्वात् कर्तव्येति हेतुत्वेनान्वयोपपत्तेरिति ब्रह्मजिज्ञासा मङ्गलमिति सामानाधिकरण्येनान्वयेन निरर्थकानुवादत्वमिति दूषणमुक्तम्' (शां.पा.भू. पु.८५) इत्यनेन विवरणोपरि चन्द्रिकोक्तदूषणमुपपाद्य तदप्यसदित्यभिधाय 'श्रेयःसाधनतामात्ररूपस्यान्यस्य वा पदार्थान्तरसाधारणस्य मङ्गलत्वस्य हेतुत्वेन सर्वतो विरक्तमुमुक्षुकर्तव्यतारूपप्रकृतसाध्यान्वयानुपपत्तेः । नहि वह्निमत्वात् पर्वतो धूमवानिति वाक्यं प्रमाणम्' इत्यादिना यच्चन्द्रिकोक्तदूषणासाधुत्वोपपादनं तदप्यसमञ्जसम् । तथाहि, मङ्गलत्वात् कर्तव्येति हेतुत्वेनान्वये ब्रह्मजिज्ञासा कर्तव्या मङ्गलत्वादित्युक्तं भवति । नहि श्रेयःसाधनतारूपमङ्गलत्वस्य मुमुक्ष्वनपेक्षितश्रेयःसाधनसाधारण्येऽपि कर्तव्यत्वरूपसाध्यव्यभिचारः सम्भवति । भवेद् व्यभिचारः मुमुक्षुकर्तव्यत्वेन कर्तव्यत्वस्य साध्यत्वं चेदस्ति । न तथा । तथा च श्रेयःसाधनतारूपमङ्गलत्वस्य व्याप्यत्वरूपसाध्यसम्बन्धसत्त्वेन प्रकृतसाध्यान्वयोपपत्तेः, अनुपपत्तेरित्युक्तिस्त्वसङ्गतैव ।

'नहि वह्निमत्वात् पर्वतो धूमवानिति वाक्यं प्रमाणम्' इति वाक्यं तु प्रकृताननुरूपमेव। नहि वह्निमत्वस्य धूमव्यभिचारित्वमिव श्रेयःसाधनत्वरूपमङ्गलत्वस्य कर्तव्यत्वव्यभिचारित्वमस्ति यतः प्रकृतानुरूपं भवेत् । नचैवं सति जिज्ञासायां मुमुक्षुकर्तव्यत्वरूपं विवक्षितसाध्यं न सिद्ध्येदिति वाच्यम् । पर्वते वह्निव्याप्यधूमवत्तापरामर्शात् वह्नित्वेन पर्वतीयवह्निः यथा सिद्ध्यति तथा जिज्ञासायां कर्तव्यत्वव्याप्यश्रेयःसाधनत्ववत्तापरामर्शात् कर्तव्यत्वेन मुमुक्षुकर्तव्यत्वमेव सिद्ध्यतीति ।

किञ्च कर्तव्यत्वत्वेन साध्यत्वेऽपि मुमुक्षुकर्तव्यत्वे लाघवमिति लाघवज्ञानसहकृतात्, मुमुक्ष्वितरकर्तव्यत्वाभावरूपबाधज्ञानसहकृताद्वा कर्तव्यत्वव्याप्यश्रेयःसाधनत्ववत्तापरामर्शात् जिज्ञासायां मुमुक्षुकर्तव्यत्वत्वावच्छिन्नविधेयकानुमितिसम्भवेन विवक्षितार्थसिद्धेः मुमुक्षुकर्तव्यत्वत्वावच्छिन्नमङ्गलत्वयोः साध्यसाधनभावानावश्यकत्वात् ।

किञ्चास्तु वा मुमुक्षुकर्तव्यत्वत्वेन साध्यता । मुमुक्ष्वपेक्षितश्रेयोविशेषसाधनत्वं पकृते मङ्गलत्वमिति परिष्कृत्य तथाविधमङ्गलत्वस्य हेतुत्वे कस्यचिद्दोषस्यानवकाशाच्च ।

यदुक्तं श्रेयोविशेषसाधनत्वं तु न मङ्गलत्वम् । सर्वमङ्गलसाधारण्याभावाद् इति तदसङ्गतम् । श्रेयोविशेषासाधनस्य मङ्गलत्वाभावात् । नहि लोके श्रेयोविशेषासाधनम्, दुःखसाधनं मङ्गलमिति व्यवह्रियते प्राज्ञैः ।

यदुक्तम् 'ज्ञानादिरूपश्रेयोविशेषसाधने कर्तव्यत्वान्वयबाधाच्च' इति तदप्यसङ्गतम् । जिज्ञासितं सुसम्पन्नमिति विचारेऽपि जिज्ञासापदप्रयोगात् ज्ञानादिरूपश्रेयोविशेषसाधने, जिज्ञासापदार्थे, विचारे कर्तव्यत्वान्वयाबाधाच्चेति सर्वमनवद्यम् ।

(परमतेऽनित्यत्वस्वरूपविमर्शः)

'यदपि चन्द्रिकायाम्- नच विवरणरीत्या नित्यानित्यशब्दौ ध्वंसाप्रतियोगिप्रतियोगिपरावित्यादिना ब्रह्मज्ञानफलं नित्यं, कर्मफलमनित्यमिति अपरेत्यादिनोक्तं नित्यानित्यविवेकमाक्षिप्य तन्न युक्तम् । प्रतिपन्नोपाधावत्यन्ताभावप्रतियोगित्वरूपबाध्यत्ववतोऽनात्मनः ध्वंसप्रतियोगित्वायोगात् । पारमार्थिकत्वाकारेणात्यन्ताभावः, स्वरूपेण तु ध्वंस इति चेन्न । पारमार्थिकत्वस्याबाध्यत्वरूपत्वेनान्योन्याश्रयात् । तथाऽत्यन्ता-

भावप्रतियोगित्वस्य निराकारे ब्रह्मण्यपि सम्भवात्। अतात्त्विके रूप्यादावनित्यत्वाव्यवहाराच्च। 'गौरनाद्यन्तवती', 'एषोऽश्वत्थः सनातनः' इति श्रुत्यनुसाराय मोक्षेऽप्यतात्त्विक्यनुवृत्तिः, निवृत्तिस्तु तात्त्विकी, मुक्तेः बन्धात् वैषम्यं तु तात्त्विकनिवृत्तिसत्तामात्रेत्यापाताच्च। तस्मात् परमते नित्यानित्यविवेको न युक्तः, इति दूषणमुक्तम्' इत्यनेन विवरणोपरि चन्द्रिकोक्तदूषणमुपपाद्य 'तत्रेदं विचार्यते' इत्यारभ्य 'न मोक्षेऽपीत्यादिदूषणावकाशः' इत्यन्तेन यदभिहितं (शां.पा.भू. पु.९८) तदसङ्गतम्। तथाहि। प्रतिपन्नोपाधावत्यन्ताभावप्रतियोगिनः ध्वंसप्रतियोगिता कुतो न युज्यत इत्यस्यान्यत्रात्यन्ताभवप्रतियोगित्वेन सम्मतस्यानात्मनः प्रतिपन्नोपाधावप्यत्यन्ताभावप्रतियोगित्वे तस्यात्यन्तासत्त्वापत्त्या नाशासम्भवेन ध्वंसप्रतियोगिता न युज्यत इत्येवोत्तरम्। अत्यन्तासतोऽपि नाशाङ्गीकारे शशविषाणादेरपि नाशापत्तेः। नच सद्विशेषस्यात्मनः नाशादर्शनेऽपि तद्भिन्नस्यानात्मनः प्रपञ्चस्य सतः भवन्मते नाशदर्शनवत् अस्मन्मतेऽप्यसद्विशेषस्य शशविषाणादेर्नाशादर्शनेऽपि तद्भिन्नस्य वियदादेः नाशोऽङ्गीक्रियत इति वाच्यम्। आत्मनः नित्यत्वे प्रमाणसद्भावादात्मनः नाशाप्रतियोगित्वम्। तद्भिन्नस्य जगत अनित्यत्वे प्रमाणसत्त्वादनात्मनः नाशप्रतियोगित्वमित्यात्मानात्मनोः प्रमाणबलान्नाशाप्रतियोगित्वदर्शनं नाशप्रतियोगित्वदर्शनं च सम्भवतः। नच तथा सम्भवति प्रकृते। अत्यन्तासतां मध्ये कस्यचिदत्यन्तासतः नाशाभावः। कस्यचिदत्यन्तासतः नाश इत्यत्र प्रमाणाभावात्। नच जगन्नाशप्रतिपादकं प्रमाणमेवात्यन्तासतः नाशे प्रमाणमिति वाच्यम्। जगत अत्यन्तासत्त्वे नाशो न युज्यत इति वदतः प्रति जगन्नाशप्रमाणस्यात्यन्तासतः नाशप्रमाणतयोदाहरणायोगात्।

यच्च 'प्रतिपन्नोपाधिगतात्यन्ताभावप्रतियोगिनोऽपि वियदादेः शुक्तिरूप्यादेश्चार्थक्रियाकारितया' (शां.पा.भू. पु. ९८) इत्यादिनाऽनात्ममात्रस्यात्यन्तासत्त्वायोगोपपादनं तदप्यसङ्गतम् । अनात्ममात्रस्य प्रतिपन्नोपाधावत्यन्ताभावप्रतियोगित्वेऽत्यन्तासत्त्वापत्त्याऽर्थक्रियाकारित्वं न स्यादिति वदतामर्थक्रियाकारित्वस्याप्यसिद्धतया तस्यात्यन्तासद्वैलक्षण्ये हेतुत्वायोगात् । नच जगत अत्यन्तासद्वैलक्षण्येनार्थक्रियाकारित्वं सिद्ध्यतीति वाच्यम् । जगत अत्यन्तासद्वैलक्षण्यसिद्धावर्थक्रियाकारित्वसिद्धिः, तत्सिद्धावत्यन्तासद्वैलक्षण्यसिद्धिरित्यन्योन्याश्रयात् ।

यदुक्तं शुक्तिरूप्यादेश्चार्थक्रियाकारित्वं तदपि मन्दम् । प्रातिभासिकस्याप्यर्थक्रियाकारित्वे प्रातिभासिकतः व्यावहारिकस्य वैलक्षण्याभावापत्तेः । नच बाधज्ञानविलम्बाविलम्बाभ्यां व्यावहारिकप्रातिभासिकवैलक्षण्यं सम्भवतीति वाच्यम् । यस्यारोपविशेषस्य बाधविलम्बो जातः तद्विषयस्य प्रातिभासिकस्य व्यावहारिकत्वापत्तेः । नच ब्रह्मज्ञानबाध्यत्वतदबाध्यत्वाभ्यां व्यावहारिकप्रातिभासिकवैलक्षण्यमिति वाच्यम् । 'सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते' इत्यनेन सर्वेषामपि बाधज्ञानानां ब्रह्मज्ञानत्वात् । ब्रह्मण्यारोपितक्षणिकत्वस्य व्यावहारिकत्वापत्तेश्च ।

न च ब्रह्मज्ञानबाध्यत्वमित्यस्य ब्रह्मान्याविषयकज्ञानबाध्यत्वमित्यर्थः । नेदं रजतम्, न ब्रह्म क्षणिकम्, इत्यादिबाधज्ञानानां ब्रह्मविषयकत्वेऽपि ब्रह्मान्यरजतत्वाभावाक्षणिकत्वादिविषयकतया नोक्तरूपं ब्रह्मज्ञानबाध्यत्वं प्रातिभासिकस्य । व्यावहारिकस्य तु वेदान्तजन्याखण्डब्रह्ममात्रविषयकसाक्षात्कारबाध्यत्वेनोक्तरूपं ब्रह्मज्ञानबाध्यत्वं

सम्भवतीति तत्कृतं तयोर्वैलक्षण्यं सुवचमिति वाच्यम् । चैतन्यमात्रविषयकसाक्षात्कारे बाधज्ञानत्वस्य विकल्पासहत्वात् । तथाहि । तदधिष्ठानकारोपं प्रति तदन्याविषयकं ज्ञानं बाधज्ञानमिति तु सर्वारोपस्थले कल्प्यत उत ब्रह्माधिष्ठानारोपस्थले । नाद्यः । तदारेपे तद्विरोधिप्रकारेणाधिष्ठानज्ञानस्यैव बाधज्ञानत्वदर्शनात् । द्वितीयेऽपि तदधिष्ठानकारोपसामान्ये उत तद्विशेषे वा । नाद्यः । ब्रह्माधिष्ठानकक्षणिकत्वारोपस्य तद्विरोधिना स्थायित्वादिना ब्रह्मज्ञानस्यैव बाधकत्वदर्शनात् । न द्वितीयः । ब्रह्माधिष्ठानकजगदारोपे एकस्मिन्नेव तथा कल्पनेऽदृष्टाश्रुतकल्पनापत्तेः । अतोऽर्थक्रियाकारित्वतदभावाभ्यामेव व्यावहारिकप्रातिभासिकवैलक्षण्यस्य वक्तव्यतया प्रातिभासिकस्याप्यर्थक्रियाकारित्वे तयोर्वैलक्षण्यं न स्यादित्यापत्तेर्दुर्वारतया प्रातिभासिकेऽर्थक्रियाकारित्वस्याङ्गीकर्तुमशक्यत्वात् ।

'पारमार्थिकत्वस्याबाध्यत्वरूपत्वेनान्योन्याश्रयतोक्तिरपि न साधीयसी' इत्यभिधाय 'अबाध्यं सर्वप्रमेयमित्याकारकवाक्यतात्पर्यविषयधीव्यक्तेस्तद्विषयताया वा पारमार्थिकत्वशब्देन विवक्षितायास्तद्व्यक्तित्वेनाभावप्रतियोगितावच्छेदकतया मिथ्यात्वलक्षणे निवेश्यत्वेनान्योन्याश्रयताविरहात्' इति यदुक्तं (शां.पा.भू. पु. ९८) तदप्यसङ्गतम् । तथाहि । अबाध्यत्वघटकं बाध्यत्वं यदि निर्वक्तुं शक्येत तर्ह्यबाध्यं सर्वं प्रमेयमिति वाक्यविन्यासः कर्तुं शक्येत । तदेव निर्वक्तुमशक्यम् । ज्ञाननिवृत्यत्वादीनां बाध्यत्वपरिष्कराणां निराकृतत्वात् । प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं बाध्यत्वं यदा तदा तत्र पारमार्थिकत्वेनैव निषेधस्य वक्तव्यतया पारमार्थिकत्वनिरूप्यबाध्यत्वनिरूप्यत्वस्यैव

पारमार्थिकत्वे प्राप्त्याऽन्योन्याश्रयतापत्तेर्दुर्वारत्वात्। नच भवदङ्गीकृत-बाध्यत्वमेव मयाप्यङ्गीक्रियत इति वाच्यम्। अन्यथाविज्ञातस्य सम्यग्-विज्ञानविषयत्वस्यैवास्माकं बाध्यत्वरूपत्वात् तथाविधबाध्यत्वस्य सत्य-स्याप्यस्माभिरङ्गीकृतत्वेन पारमार्थिकसत्यत्वाविरोधिन ईदृशबाध्यत्वस्य जगदपारमार्थिकत्ववादिना त्वयाङ्गीकर्तुमशक्यत्वात्। निर्धर्मके ब्रह्मणि तादृशधीविषयत्वरूपधर्माङ्गीकारोप्यसङ्गत एव। तथाविधधर्मस्वीकारे किमपराद्धमन्यधर्मैः। किञ्च दृश्यत्वेन ब्रह्मणः मिथ्यात्वापत्तेश्च।

शुक्तिरूप्यादेश्चात्यन्तासत्त्वस्यास्माभिरङ्गीकारेण नाशं प्रति प्रति-योगिनः कारणतया करणाभावादेव शुक्तिरूप्यादेर्नाशासम्भवादनित्य-त्वव्यवहारप्रयोजकस्य ध्वंसप्रतियोगित्वस्याभावात् शुक्तिरूप्यादा-वनित्यत्वव्यवहारस्यास्माभिर्वारयितुं शक्यत्वेन भवन्मते वारयितुम् अशक्यत्वमात्रेणोभाभ्यां वारयितुमशक्यत्वमुक्ता 'शुक्तिरूप्यस्या-नित्यत्वव्यवहारे इष्टापत्तिः' इत्युक्तिस्तु दूषणपरिहारासमर्थः सन्, अयं इष्ट एवेति वदतीत्यलौकिकत्वं तस्य सम्पादयति।

('गौः अनाद्यन्तवती' इति श्रुत्यर्थः)

यच्चोक्तम् 'गौरनाद्यन्तवतीति श्रुतिश्च नास्मत्प्रतिकूला। अनादि-श्चासावन्तवती चेति तदर्थात्। अन्यथाऽनाद्यन्ता इति वक्तुमुचिततया मतुप्प्रत्ययनैरर्थक्यापत्तेः' (शां.पा.भू. पु. ९९) इति तदयुक्तम्। गोशब्दवाच्यवेदस्य नाशाङ्गीकारेऽनादिनिधना नित्येत्याद्युत्पत्तिनाश-शून्यत्वप्रतिपादकबह्वागमविरोधापत्त्या बह्वागमानुसारेणैवैतच्छ्रुतेरप्यर्थस्य कल्पनीयतया 'नाद्यन्तवत्यनाद्यन्तवती' इत्येव विग्रहस्यानुसरणीयतया प्राप्तत्वेन 'अनादिश्च सा अन्तवती च' इति विग्रहस्यासाधुत्वेनानादर-

णीयतया गौरनाद्यन्तवतीति श्रुतिप्रातिकूल्यस्यैव तव सत्त्वेन सा नास्मत्प्रतिकूलेत्युक्तेरुन्मत्तप्रलपितत्वापत्तेः । नचैवं सति मतुपः वैय्यर्थ्यमिति वाच्यम् । भगवदतिरिक्तस्य सर्वस्य प्रमाणबलेन यथा-सम्भवमुत्पत्तिनाशाङ्गीकारेण सर्वथोत्पत्तिनाशशून्यत्वस्यैतच्छ्रुत्यर्थ-तयोपवर्णयितुमशक्यतया प्रशस्तोत्पत्तिनाशशून्यत्वस्यैवैतच्छ्रुत्यर्थतया वर्णनीयतया प्राप्तत्वेनोत्पत्तिनाशयोः प्राशस्त्यबोधनाय मतुपः सार्थ-क्यात् । प्राशस्त्यं मतुबर्थः । प्राशस्त्यस्याद्यन्तयोरन्वयः । प्राशस्त्यं नाम स्वरूपवृत्तित्वमेव । तथाच स्वरूपत उत्पत्तिनाशशून्या गौरित्यर्थः पर्यवसितः । एवञ्च भगवदतिरिक्तस्य सर्वस्योत्पत्तिनाशप्रतिपादकानि प्रमाणानि वेदादेरुत्पत्तिनाशशून्यत्वप्रतिपादकप्रमाणानि च परस्परम् आनुकूल्योपेतानि भवन्ति भगवदतिरिक्तस्य सर्वस्योत्पत्तिनाश-प्रतिपादकप्रमाणानां यथासम्भवमुत्पत्तिनाशप्रतिपादकतया वेदादेरुत्पत्ति-नाशशून्यत्वप्रतिपादकप्रमाणानां च स्वरूपेणोत्पत्तिनाशशून्यत्वप्रति-पादकतया चेति ।

('एषोऽश्वत्थः सनातनः' इति श्रुत्यर्थपरिशीलनम्)

यदुक्तम् 'एषोऽश्वत्थः सनातनः' इत्यत्र मुक्तिकालातिरिक्तसकल-कालसम्बन्ध एवोच्यते ।

अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्वा ।
ततः पदं तत्परिमार्गितव्यम् .... ॥

इति बलवद्भगवदुक्तिसंवादादिति न मोक्षेऽपीत्यादिदूषणावकाशः' इति तदपि मन्दम् । एवं सति नित्यत्वप्रतिपादकानां प्रमाणानां सर्वेषामप्येव-

मर्थोपवर्णनस्य कर्तुं शक्यतया निरुपचरितनित्यत्वप्रतिपादकप्रमाणानामेव विलयापत्तेः। नचास्तु तथेति वाच्यम्। चिन्मात्रेऽपि निरुपचरितनित्यत्वासिद्ध्यापत्तेः। न चाश्वत्थमेनमिति भगवद्गीतायामश्वत्थस्य छेदनश्रवणात् तत्संवादेनैषोऽश्वत्थः सनातन इत्यत्रामुख्यनित्यत्वं कल्प्यम्, न सर्वत्रेति नोक्ततापत्तिरिति वाच्यम्।

'भगवद्गीतायामेवोर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्' इत्यत्राश्वत्थस्याव्ययत्वोक्त्या तत्संवादेनैषोऽश्वत्थ सनातन इत्यत्र सनातनपदेनाश्वत्थस्य मुख्यतः नित्यस्यैव सिद्धिरित्यपि वक्तुं शक्यत्वात्। नचाश्वत्थस्याव्ययमित्यनेनाव्ययत्वस्य, छित्वेत्यनेन छेदनस्य च श्रवणात् भगवदुक्त्योरेव परस्परं विरोधप्रसङ्ग इति वाच्यम्। छित्वेत्यस्य विमृश्येत्यर्थत्वात्। नच छित्वेत्यश्वत्थस्य नाशप्रतिपादकप्रमाणानुसारेणाश्वत्थस्याव्ययत्वबोधकस्मृतेः सनातनत्वबोधकश्रुतेश्चामुख्यार्थत्वं किं न स्यादिति वाच्यम्। एकप्रमाणानुसारेण प्रमाणद्वयस्य गौणार्थत्वकल्पनापेक्षया प्रमाणद्वयानुसारेणैकस्य प्रमारस्यामुख्यार्थत्वकल्पनौचित्यात्।

(विवेकस्वरूपविचारः)

'यदपि चन्द्रिकायाम्- किञ्च निरुक्तविवेको भेदस्य तद्व्याप्तस्य वा ज्ञानम्। तस्य भ्रमत्वे ब्रह्मविचारो न नित्यफलकः स्यात्। प्रमात्वे भेदः सत्यः स्यादिति दूषणमुक्तं तदपि न विचारसहम्' (शां.पा.भू. पु. ९९) इत्यभिधाय 'निरुक्तज्ञानस्य परमार्थसन्मात्रविषयकत्वलक्षणप्रामाण्याभावेऽपि घटादिज्ञानप्रामाण्यसमकक्षस्य व्यवहारकालाबाध्यविषयकत्वलक्षणप्रामाण्यस्याभ्युपगमेन भेदस्य व्यावहारिकसत्यत्वमेवापद्येत। तच्चास्माकमिष्टमेव। तदादायैव विचारप्रवृत्त्युपपत्तेः' इत्यादिना यदभिहितं

तदप्यसङ्गतम् । तथाहि- पारमार्थसन्मात्रविषयकत्वलक्षणं प्रामाण्यं वदन् जगद्व्यावहारिकम्, शुद्धचिच्च पारमार्थिकमिति समूहालम्बनं प्रमाणम् इत्यङ्गीकरोति न वा । नाद्यः । अपरमार्थजगदादिविषयकत्वेनास्य परमार्थसन्मात्रविषयकत्वलक्षणप्रामाण्यायोगात् । न द्वितीयः । जगत अव्यावहारिकत्वस्य शुद्धचितश्च पारमार्थिकत्वाभावस्यापत्तेः । नचोक्त-ज्ञानस्य तादृशप्रामाण्याभावेऽपि व्यवहारकालाबाध्यविषयकत्वलक्षण-प्रामाण्यसम्भवेन नानुपपत्तिरिति वाच्यम् । एतज्ज्ञानं शुद्धचित् पार-मार्थिकमित्यंशे प्रमाणं न वा । आद्ये जगदिव चैतन्यमपि व्यवहारकाला-बाध्यमित्येव स्यान्न पारमार्थिकमिति । न द्वितीयः शुद्धचितः पारमार्थिकत्वाभावापत्तेरेव ।

किञ्च विषयस्य परमार्थसत्त्वसिद्धेः ज्ञानगतप्रामाण्याधीनतया ज्ञान-गतप्रामाण्यसिद्धौ विषयस्य परमार्थत्वसिद्धिः । विषयस्य परमार्थत्वसिद्धौ ज्ञानस्य परमार्थसन्मात्रविषयकत्वलक्षणप्रामाण्यसिद्धिरित्यन्योन्या-श्रयाच्च ।

यदङ्गीकृतम्, व्यवहारकालाबाध्यविषयकत्वलक्षणमपरं प्रामाण्यं तदपि मन्दम् । शुद्धचितः सर्वकालाबाध्यत्वेन व्यवहारकालाबाध्यत्वस्यापि सत्त्वेन शुद्धचिन्मात्रविषयकज्ञानस्यापि निरुक्तापरप्रामाण्यापत्तेः । नचास्तु तस्य तत्प्रामाण्यमिति वाच्यम् । तादृशप्रामाण्योपेतज्ञानविषयस्य त्वया व्यावहारिकत्वाङ्गीकारेण शुद्धचैतन्यस्यापि व्यावहारिकत्वापत्तेः ।

किञ्च सर्वेषां प्रत्ययानां त्वन्मते चैतन्यविषयकत्वेन शुक्ताविदं रजतमिति ज्ञानस्येदंपदार्थावच्छिन्नचैतन्यविषयकतयोक्तरीत्या व्यवहार-कालाबाध्यचैतन्यविषयकतया तस्याप्युक्तप्रामाण्यापत्तेश्च । नच

व्यवहारकालाबाध्य-बाध्यविषयकत्वमपरं प्रामाण्यमित्यभ्युपगम्यते। चैतन्यस्याबाध्यत्वेन पूर्वोक्तज्ञानद्वयस्याबाध्यचैतन्यविषयकत्वेऽपि व्यवहारकालाबाध्यबाध्यविषयकत्वस्याभावेन नोक्तज्ञानद्वयस्योक्तापर-प्रामाण्यापत्तिरिति वाच्यम्। एवं परिष्कारे शुद्धचिन्मात्रविषयकज्ञान-स्यैवंविधप्रामाण्यापत्तिवारणेऽपि शुक्ताविदं रजतमिति ज्ञानस्यैतादृश-प्रामाण्यापत्तिर्दुर्वारैव। अस्य व्यवहारकालाबाध्यब्रह्मज्ञानबाध्येदमर्थ-शुक्तिविषयकत्वात्।

नच व्यवहारकालाबाध्यप्रकारकत्वं प्रामाण्यम्। तथाच शुक्ताविदं रजतमिति ज्ञानस्य व्यवहारकालाबध्येदमर्थविशेष्यकत्वेऽपि व्यवहार-कालाबाध्यप्रकारकत्वाभावान्न तस्य प्रामाण्यापत्तिरिति वाच्यम्। शुक्तिप्रकारकस्यात्र रजतत्वमिति भ्रमस्य प्रमात्वापत्तेः। नचेदमर्थस्या-धेयतासम्बन्धेन रजतत्वे प्रकारतया प्रकारतायामाधेयतासम्बन्धा-नवच्छिन्नत्वनिवेशेनोक्तदोषवारणं सम्भवतीति वाच्यम्। भूतले घट इति ज्ञानस्य प्रामाण्याभावापत्तेः। तत्र घटे भूतलस्याधेयतासम्बन्धेन प्रकारतयाऽधेयतासम्बन्धानवच्छिन्नव्यवहारकालाबाध्यनिष्ठप्रकारताकत्वा-भावात्। नच घटांशे घटत्वस्याधेयतासम्बन्धातिरिक्तसम्बन्धेन प्रकारतयाऽधेयतानवच्छिन्नव्यवहारकालाबाध्यघटत्वनिष्ठप्रकारताकत्वेनास्य प्रामाण्यं सम्भवतीति वाच्यम्। एतज्ज्ञानस्य घटत्वांशे कथञ्चित् प्रामाण्य-निर्वाहेऽप्याधेयतासम्बन्धानवच्छिन्नव्यवहारकालाबाध्यभूतलनिष्ठप्रकार-ताकत्वाभावेन भूतलांशे प्रामाण्यस्याशक्यनिर्वाहत्वापत्तेः। एतज्ज्ञानस्य धर्मितावच्छेदकघटत्वांशे प्रकारीभूतभूतलांशे च प्रामाण्यात्। अतो नोक्तं प्रामाण्यद्वयमपि सम्भवदुक्तिकमिति।

(इहामुत्रफलभोगविरागविमर्शः)

''यत्तु 'तस्मात् परमते नित्यानित्यविवेको न युक्तः' इत्युक्त्वा 'नापीहामुत्रार्थफलभोगविरागः सम्भवति । विवरणे विषयैरपि नित्यात्मस्वरूपमेव सुखमभिव्यज्यते । नतु जन्यं सुखमस्तीत्युक्तत्वेन वैषयिकसुखेऽपि विरागायोगात् । मोक्षे रागवतः तत्वतो भेदशून्ये भोगे विरागायोगाच्च' इति। चन्द्रिकायां दूषणमुक्तम्'' इत्यनेन चन्द्रिकोक्त-दूषणमुपपाद्य तदसदित्यभिधाय यदुक्तम् 'वैषयिकसुखस्य ब्रह्मानन्द-रूपतोपगमेऽपि तस्यानभिव्यक्तस्यापुरुषार्थतया, काम्यमानायाश्च विषयसम्बन्धाधीनतदभिव्यक्तेरनित्यतया ततो विरागे बाधकाभावात् । कर्माधीना सुखाभिव्यक्तिः स्वोत्तरावरणनियता। शास्त्राधीनब्रह्मानन्दा-भिव्यक्तिश्च न तथेति विवेकस्य तादृशवैराग्यहेतुत्वसम्भवाच्च न शङ्कान्त-रावकाशः । अतिरिक्ते वैषयिकसुखे ब्रह्मानन्दप्रतियोगिकतात्विक-भेदशून्यत्वेऽप्यनित्यत्वस्य दुरपह्नवतया तत्र वैराग्ये बाधकाभावाच्च' इत्यनेन तदसत् । तथाहि । वैषयिकसुखस्य ब्रह्मानन्दस्वरूपत्वे तस्या-नभिव्यक्तत्वं न सम्भवति । ब्रह्मस्वरूपानन्दस्य नित्याभिव्यक्तत्वात् । नचाविद्यारूपावरणवशाद् ब्रह्मस्वरूपानन्दस्यानभिव्यक्तिः सम्भवतीति तदभिन्नवैषयिकसुखस्याप्यनभिव्यक्तत्वं सम्भवतीति वाच्यम् । स्व-प्रकाशस्य ब्रह्मण आवरणायोगात्। नच स्वप्रकाशस्याप्यविद्यावशेनाभानं सम्भवतीति वाच्यम्। स्वप्रकाशस्याप्यविद्यावशेनाभानेऽविद्यादेः प्रकाशो न स्यादित्यादिदूषणजातेन चन्द्रिकाचार्यैः ब्रह्मस्वरूपेऽविद्यावरणस्या-सकृत्खण्डितत्वात् । एवञ्च ब्रह्मस्वरूपानन्दे आवरणासम्भवेन तस्य नित्याभिव्यक्तत्वेन तदभिन्नवैषयिकसुखस्यापि नित्यमभिव्यक्तत्वप्राप्त्या

तदभिव्यक्तेरनित्यत्वाभावेन वैराग्ये कारणाभावः। अतिरिक्ते वैषयिक-सुखे ब्रह्मानन्दप्रतियोगिकतात्विकभेदशून्यत्वेऽपीत्यप्यसङ्गतम्। अतिरिक्तत्वमङ्गीकृत्य भेदशून्यत्वोक्तेर्व्याहतत्वात्।

नचौपाधिकं भेदमङ्गीकृत्य पारमार्थिकभेदशून्यत्वाङ्गीकारे न व्याहति-रिति वाच्यम्। औपाधिकभेदस्य त्वन्मतेऽसम्भवदुक्तिकत्वात्। तथाहि- उपाधिस्त्वज्ञानमुतान्तःकरणादि। आद्ये अज्ञानमज्ञानकल्पितं न वा। आद्ये स्वातिरिक्ताज्ञानकल्पितमुत स्वकल्पितम्। चरमे आत्माश्रय-प्रसङ्गः। स्वातिरिक्ताज्ञानकल्पितमज्ञानमिति पक्षे कल्पकमज्ञानमज्ञान-कल्पितं नेत्यङ्गीकारे सत्यवस्तुद्वयाङ्गीकारेणापसिद्धान्तापत्त्या तदप्य-ज्ञानकल्पितमिति वक्तव्यतया, परस्परं कल्पितत्वाङ्गीकारेऽन्योन्या-श्रयात्, कल्पकाज्ञानपरम्पराया अङ्गीकारे तस्या अप्रामाणिकतयाऽ-नवस्थापातात्।

अन्तःकरणमुपाधिरिति पक्षेऽपि अन्तःकरणमज्ञानकल्पितं न वा। नेति पक्षेऽपसिद्धान्तः। आद्येऽज्ञानसिद्धौ तत्कल्पितान्तःकरणादि-रूपोपाधिसिद्धिः, उपाधिसिद्धौ तत्कृतभेदवतः जीवस्याज्ञानसिद्धि-रित्यन्योन्याश्रयात्। उपाधिसिद्ध्यधीनत्वं भेदस्यैव नाज्ञानस्येत्यङ्गी-कारेऽप्यज्ञानसिद्धौ तत्कल्पितोपाधिसिद्धिः, तत्सिद्धौ तत्कृतजीवेश-भेदसिद्धिः। तादृशभेदसिद्धौ जीवस्याज्ञानसिद्धिरिति चक्रकप्रसङ्गात्। वैषयिकसुखस्य ब्रह्मानन्दप्रतियोगिकतात्विकभेदशून्यत्वमङ्गी-कृत्यानित्यत्वोक्तिरप्यसङ्गतैव। नित्याभिन्नस्यानित्यत्वासम्भवात्। नचौपाधिकभेदमादायानित्यत्वोक्तिः सङ्गतेति वाच्यम्। तस्य निरस्त-

त्वात् । अतस्त्वन्मते वैराग्यमनुपपन्नमित्येतेन ततः वैराग्यात् शमादि-सम्पत्, ततः मोक्षेच्छेति निरस्तम् । मूलस्य वैराग्यस्यैवानुपपन्नत्वात् ।

(परमते मुमुक्षानुपपत्तिसमर्थनम्)

यच्चोक्तम् ''मोक्षश्चात्यन्तिकी अविद्यानिवृत्तिः । तदुक्तम्-

'अविद्यानिवृत्तिर्मोक्षः सा च बन्ध उदाहृतः ।'

इति । तस्याश्चाधिकरणीभूतनित्यब्रह्मानन्दरूपत्वात् पुरुषार्थत्वमविरुद्धम्'' (शां.पा.भू.पु. १०१) इति तदप्ययुक्तम् । ध्वंसस्य प्रतियोगिसमान-दे..त्वनियमेन ब्रह्मण अविद्यासम्बन्धासम्भवयस्योक्तत्वेनाविद्यारूप-प्रतियोग्यनधिकरणतयाऽविद्यानिवृत्त्यधिकरणत्वासम्भवात् । ब्रह्मणस्तद-धिकरणत्वसम्भवेऽविद्यानिवृत्तेरधिकरणीभूतनित्यब्रह्मानन्दरूपत्व-कथनस्यावसरः । तदेव न सम्भवति । एवञ्चाविद्यानिवृत्तेः नित्यब्रह्मानन्द-रूपत्वस्य वक्तुमशक्यतयाऽविद्यानिवृत्तेः पुरुषार्थत्वं दुरुपपादमेव ।

किञ्चाविद्यानिवृत्तेर्जन्यतया तस्याः नित्यब्रह्मस्वरूपानन्दरूप-त्वेऽविद्यानिवृत्तेर्नित्यत्वं ब्रहमणो वा जन्यत्वं स्यादित्यापत्तेश्च ।

किञ्च नित्यसिद्धात्मन अविद्यानिवृत्तिरूपमोक्षस्वरूपत्वे मोक्षस्य विचारसाध्यत्वानुपपत्तेश्च । न च चरमवृत्युपलक्षितनित्यसिद्धात्मन एव अविद्यानिवृत्तिलक्षणमोक्षस्वरूपत्वाभ्युपगमेन चरमवृत्तेर्विचारसाध्यतयैव मोक्षस्य साध्यत्वोक्तिरिति वाच्यम् । 'सविशेषणे हि विधिनिषेधौ सति विशेष्ये बाधे विशेषणमुपसङ्क्रामतः' इति न्यायेन विशेष्ये प्रसक्तस्य विधेः निषेधस्य वा सति विशेष्ये बाधे विशेषणोपसङ्क्रमणस्यैव सर्वतान्त्रिकै-रङ्गीकृतत्वेनोपलक्षणोपसङ्क्रमणस्य कैरप्यनङ्गीकृततयोपलक्षणीभूत-

चरमवृत्तौ मोक्षस्य विचारसाध्यत्वविधिपर्यवसानमादाय चरमवृत्त्युपलक्षितात्मस्वरूपमोक्षस्य विचारसाध्यत्वविधेरनुपपन्नत्वात् । चरमवृत्तिविशिष्टात्मनः मोक्षरूपत्वे विशिष्टस्य तव मते मिथ्यात्वेन मोक्षस्य मिथ्यात्वप्रसङ्गात् । मोक्षदशायामप्यात्मनः चरमवृत्त्यनुषङ्गप्रसङ्गाच्च ।

एतेन 'मुमुक्षा च परमते न युक्ता । मोक्षस्य नित्यसिद्धात्ममात्रत्वेन तत्रेच्छाऽयोगादिति चन्द्रिकोक्तं निरस्तम्' इति निरस्तम् । परमते मोक्षस्वरूपदुर्वचत्वस्य मोक्षेच्छाकारणवैराग्यानुपपन्नत्वस्य चोक्तत्वात् ।

'यदपि चन्द्रिकायां वृत्त्युपलक्षितस्य पश्चादिव पूर्वमपि सत्त्वाच्चेत्युक्तम्' इत्यनेन चन्द्रिकामुपपाद्य 'तदभिप्रायस्तु निरुक्तात्मनः मोहकालेऽपि सत्त्वेन तदानीमपि तद्भान्यापत्तिः' इत्यनेन चन्द्रिकाभिप्रायमुपवर्ण्य, तदपि मन्दमिति प्रजल्प्य, यदभिहितम् 'पूर्वमसिद्धस्योपलक्षणत्वायोगात् । नहि पाकसम्बन्धात् पूर्वं पाचको भवति । तथा व्यवह्रियते वा । अपि तु पाकानन्तरमेवेत्यदिना' (पु. १०२) तदपि मन्दम् । तथाहि । उपलक्षणत्वं व्यावर्तकत्वम्, व्यावृत्त्यनुमितिजनकज्ञानविषयत्वमिति यावत् । किमतोऽन्यदुपलक्षणत्वं नामास्ति ? तच्चास्त्येव पूर्वसिद्धस्येव भविष्यत्कालीनस्यापि । नच भविष्यत्कालीनस्येदानीमसत्त्वत् कथमनुमापकत्वमिति शङ्क्यम् । ज्ञायमानलिङ्गस्यानुमितिकारणत्वेऽनागतादिलिङ्गकानुमितिर्न स्यादिति प्राचां मते दूषणमुद्भाव्य लिङ्गज्ञानस्यानुमितिकारणत्वसमर्थनावसरे भविष्यत्कालीनस्याप्यनुमापकत्वं स्वीकृतं नव्यतार्किकैः । एवञ्च भविष्यत्कालीनचरमवृत्तेरपि व्यावर्तकत्वरूपोपलक्षणत्वसम्भवेन कथं पूर्वमसिद्धस्योपलक्षणत्वायोगः ? कथं च चरमवृत्तिज्ञानाधीनेतरव्यावृत्त्यनुमितिविषयत्वरूपचरमवृत्त्युपलक्षित-

त्वोपेतात्मनः पूर्वमसत्त्वम् ? कथं च निरुक्तात्मनः संसारकालेऽपि सत्त्वेन तदानीमपि मोक्षः स्यादित्यापत्तिवारणम् ? न कथमपीति ।

'नहि' इत्यारभ्य, 'तथा व्यवह्रियते' इत्यन्तेन काकूक्त्या पाकसम्बन्धात् पूर्वं पाचकोऽपि न भवति, तथा व्यवहारोऽपि नास्तीति त्वदभिप्राय इति ज्ञायते । तत्र विचार्यते- पाचक इत्यत्र पच्धात्वर्थः पाकः । प्रत्ययार्थः कृतिः । तस्याः विशेषणत्वविवक्षोपलक्षणत्वविवक्षा चेति विवक्षाद्वयम् । तत्र पाककृतेर्विशेषणत्वविवक्षायां पाकसम्बन्धात् पूर्वं पाककृतिविशिष्टो न भवतीत्युक्तं स्यात् । तच्चाङ्गीकृतमेवेति नानिष्टापादनम् । प्रकृताननुगुणमपीदम् । नहि चरमवृत्तिविशिष्टस्यात्मनः सत्त्वं संसारकाले प्रतिपाद्यते श्रीमच्चन्द्रिकाचार्यश्रीमच्चरणैः । अपितु चरमवृत्त्युपलक्षितस्यात्मन एवेति ।

उपलक्षणत्वविवक्षायां पाकसम्बन्धात् पूर्वं पाककृतिव्यावृत्तत्वं न भवतीत्युक्तं भवेत् । तच्च बाधितम् । भविष्यत्कालीनपाककृतिज्ञानाधीनव्यावृत्यनुमितिविषयत्वरूपपाककृतिव्यावर्त्यत्वस्यैवोक्तरीत्या सत्त्वात् । पूर्वं सत एवोपलक्षणत्वमित्याग्रहेऽपि त्वन्मते चरमवृत्तेरप्यज्ञानकल्पिततयाऽज्ञानरूपकारणात्मना चरमवृत्तेः पूर्वमपि सत्त्वाच्च निरुक्तात्मनः संसारकालेऽपि सत्त्वेन तदानीमपि मोक्षः स्यादित्यापत्तिर्दुर्वारैव । नचेष्टापत्तिरिति वाच्यम् । संसारकालेऽपि मुक्त इति व्यवहारापत्तेः । नच तदानीं स्वरूपसतः मोक्षस्य सत्त्वेऽपि मुक्त इति व्यवहारो न भवति । तथा व्यवहारं प्रति कार्यात्मना चरमवृत्तेः कारणतया संसारकाले तादृशकारणबाधेन न मुक्त इति व्यवहारसंम्भव इति वाच्यम् । एवं सति पाचक इति व्यवहारस्यैव तव दुरुपपादत्वापत्तेः । तथा व्यवहारं प्रति

पाकसम्बन्धस्य कारणत्वमस्ति न वा। नेति पक्षे सर्वेषामपि पाचकत्वेन व्यवहारप्रसङ्गः। प्रथमपक्षेऽपि यदा पाचक इति व्यवहारो भविष्यति तदव्यवहितपूर्ववृत्तित्वशून्यस्य व्यवहितपूर्ववर्तिनः पाकसम्बन्धस्य तदव्यवहितपूर्ववृत्तित्वघटिततत्कारणत्वस्य व्याहतत्वेनाशक्यशङ्कत्वात्, अव्यवहितपूर्ववर्तिनः पाकसम्बन्धस्यैव तद्व्यवहारकारणतायाः वक्तव्यतया पाकसम्बन्धनिवृत्यनन्तरं चिरकालव्यवधानेनाप्ययं पाचक इति व्यवहारस्य जायमानतया तादृशव्यवहाराव्यवहितपूर्वं पाककृतिरूपपाकसम्बन्धस्य कार्यात्मनाऽवस्थानासम्भवात्। अतस्त्वया पाचक इति व्यवहारस्य कारणात्मना पाकसम्बन्धस्याव्यवहितपूर्ववृत्तित्वमादायैवोपपादनीयतया तद्वदत्रापि चरमवृत्तेः कारणात्मना पूर्वमपि सिद्धत्वप्राप्त्या संसारकालेऽपि मुक्त इति व्यवहारापत्तेर्दुर्वारत्वात्।

यदुक्तम्- 'तादृशवृत्तेरनित्यत्वेऽपि तदभिव्यक्तानन्दस्य नित्यतया न विचारस्य नित्यफलकत्वानुपपत्तिः' इति तदप्यसङ्गतम्। लोके आवृत-स्यैवाभिव्यक्तिरिति सत्त्वेन ब्रह्मस्वरूपानन्देऽविद्यावरणासम्भवस्योक्तत्वेन ब्रह्मस्वरूपानन्दस्यावृतत्वप्रसक्तेरेवाभावेन तस्याभिव्यक्तत्वोक्तिर-सङ्गतैव। किञ्च तदभिव्यक्तानन्दस्येत्यत्रानन्दे तदभिव्यक्तत्वं नाम तज्जन्याभिव्यक्तिविषयत्वं वा तदधीनाभिव्यक्तिविषयत्वम्। नाद्यः। 'आनन्दाभिव्यक्तिरपि स्वरूपभूतानन्दजन्यसाक्षात्कारः' इत्युत्तरग्रन्थे-नानन्दाभिव्यक्तेः नित्यत्वाङ्गीकारेण पूर्वोत्तरग्रन्थयोः विरोधापत्तेः। अत एव न द्वितीयोऽपि। परम्परया जन्यत्वपर्यवसितस्याधीनत्वस्य नित्यत्वेनाङ्गीकृतानन्दाभिव्यक्तावसम्भवात्। न च द्रव्यत्वस्य नित्यस्य गुणवत्वाधीन्वेन तार्किकोक्तिरिव नित्यानन्दाभिव्यक्तावपि चरमवृत्त्य-धीनत्वोक्तिः सङ्गच्छत इति वाच्यम्। द्रव्यत्वस्य गुणवत्त्वज्ञाप्यत्वाङ्गी-

कारेण द्रव्यत्वस्योत्पत्तौ गुणवत्त्वोपयोगाभावेऽपि ज्ञप्तौ गुणवत्त्वोपयोगसत्त्वात् सम्भवति गुणवत्त्वाधीनत्वं द्रव्यत्वस्य। प्रकृते आनन्दाभिव्यक्तौ चरमवृत्तेरुत्पत्तौ ज्ञप्तौ चोपयोगाभावेन किञ्चिदुपकाराभावे तदधीनताया मृषात्वात्।

विचारस्य नित्यफलकत्वमप्यनुपपन्नम्। तत्साध्यस्यैव तत्फलत्वेन नित्यसिद्धनिरुक्तात्मनः विचारसाध्यत्वाभावात्। उपलक्षणीभूतचरमवृत्तेः विचारसाध्यतयैव नित्यसिद्धनिरुक्तात्मनः विचारसाध्यत्वमिति तु पूर्वं दूषितमेवेति।

किञ्च तादृशानन्दाभिव्यक्तेः पुरुषार्थताप्यविशेषवादिना त्वया दुरुपपादैव। 'सुखी भवामि' इतीच्छावत् 'सुखमहं भवामि' इतीच्छायाऽनुदयात्। द्रविणवत्त्वे हि परिवृढत्वम्, नतु द्रविणस्वरूपत्वे। तद्वत्सुखवत्त्वे परिवृढत्वम्, न तु सुखस्वरूपत्व इति।

यदत्रोक्तम् - 'सुखादौ पुमर्थत्वं हि न स्वकीयत्वादिप्रयुक्तम्, गौरवात्। किन्तु साक्षात्क्रियमाणतया' (शां.पा.भू. पु. १०२) इति तदसङ्गतम्। साक्षात्क्रियमाणत्वं साक्षात्कारविषयत्वम्। साक्षात्कारत्वं [१]जन्यधीजन्यमात्रवृत्तिजातिशून्यज्ञानत्वम्। स्वकीयत्वं तु स्ववृत्तित्वम्। पुरुषार्थत्वे स्ववृत्तित्वस्य प्रयोजकत्वे प्रयोजकतावच्छेदकस्ववृत्तित्वत्वं भविष्यति। साक्षात्क्रियमाणत्वस्य प्रयोजकत्वे तु जन्यधीजन्यभिन्नावृत्तिजन्यधीजन्यवृत्ति जातिशून्यज्ञानविषयत्वत्वं प्रयोजकतावच्छेदकं भविष्यति। नच साक्षात्कारत्वं जातिरिति वाच्यम्। वेदान्ति-

१. जन्यधीजन्यम्= अनुमितिः, शाब्दश्च। तन्मात्रवृत्तिजातिः= अनुमितित्वम्, शाब्दत्वं च। तच्छून्यज्ञानत्वं प्रत्यक्षे।

भिरनङ्गीकारात्। तार्किकैरपीन्द्रियत्वस्य तेजस्त्वादिना साङ्कर्यादिन्द्रियत्वस्य जातित्वासम्भवात् तस्यैकस्यासम्भवेनेन्द्रियत्वेन साक्षात्कारत्वेन कार्यकारणभावासम्भवात् कार्यतावच्छेदकतया साक्षात्कारत्वं न जातिः सिद्ध्यतीत्यभिधायोक्तस्यैव तादृशजातिशून्यज्ञानत्वस्य साक्षात्कारत्वरूपत्वाङ्गीकारात्, एवं स्थिते पुरुषार्थत्वे स्वकीयत्वं न प्रयोजकं गौरवात्। किन्तु साक्षात्क्रियमाणत्वं प्रयोजकमिति वदतः कौशल्यं सुधियो विचारयन्तु।

किञ्च त्वन्मते मोक्षः कस्य पुरुषार्थः ? अहमर्थस्योत चिन्मात्रस्य ? नाद्यः। अहमर्थस्य मुक्त्यनन्वयात्। नान्त्यः। 'अहं मुक्तः स्याम्' इतीच्छावत् 'चिन्मात्रं मुक्तं स्यात्' इति कस्यापीच्छाया अनुदयात्। अतस्तव मते पुरुषार्थोऽप्यनुपपन्नः।

यदत्रोक्तम्- 'अहमर्थगतचिदंशमहं मुक्तः स्यामितीच्छोपलक्षितमुक्तिकालान्वयिनं प्रति मोक्षस्य पुमर्थत्वाविरोधात्' इति तदसङ्गतम्। लोके सपरिवारोऽहं सुखी स्यामितीच्छाया अहंपदार्थस्य स्वस्य केवलं सुखोत्पत्तौ, परिवारस्य सुखान्वयमन्तरा विषयसिद्धिर्दृष्टा किम् ? नहि दृष्टा। तद्वदत्रापि विशिष्टेच्छायाः विशेष्ये मुक्त्यन्वयमात्रेण कथं चारितार्थ्यं स्यात्।

किञ्च त्वन्मते विशिष्टं विशेष्यात् भिन्नमभिन्नं वा। अन्त्ये विशिष्टस्य शुद्धचैतन्याभिन्नत्वेन तस्य सत्यत्वनित्यत्वे, शुद्धचैतन्यस्य मिथ्यात्वानित्यत्वे वा स्यातामित्यापत्तेः। औपाधिकभेदस्य निरस्तत्वात् औपाधिकभेदमादाय व्यवस्था तु दूरोत्सारितेति। आद्यो न। अन्यदीयेच्छाया अन्यस्य विषयसिद्ध्या चारितार्थ्यस्य लोकेऽदृष्टत्वात्। चैतन्यस्य

मुक्त्यन्वयित्वे तद्भिन्नाहमर्थगतेच्छायाः विषयसिद्ध्यसम्भवात् । अतः मुमुक्षा त्वन्मतेऽनुपपन्ना ।

एतेन 'किमहं मुक्तः स्यामितीच्छा मुमुक्षा, चिन्मात्रं मुक्तं स्यादितीच्छा वा । नाद्यः । त्वन्मतेऽहमर्थस्य मुक्त्यनन्वयात् । नान्त्य इत्यादि-चन्द्रिकोक्तमपास्तम्' इत्यपास्तम् । यादृशविशेषणवता कामितं तादृशविशेषणविशिष्टस्य तु मुक्त्यन्वयो नास्त्येव । तदुपलक्षितमुक्त्यन्वये विशिष्टेच्छायाः विषयसिद्ध्यसम्भवस्योक्तत्वात् ।

यदुक्तम्- 'तव मते तु लोकान्तरप्राप्तेरेव मोक्षतया कामयितृशरीराद्य-विशेषित एव तदन्वयस्य वाच्यतया तव मत एवानुपपत्तेश्च' इत्यने-नास्मन्मते परिदूषणं तदसङ्गतम् । कामयितृशरीराद्यविशेषिते मुक्त्यन्वयं कथयतामुपरि दूषणाभिधानेन तद्विशेषित एव मुक्त्यन्वयतात्पर्यम् इति ज्ञायते । इदं च तव सिद्धान्तविरुद्धम् । तादृशशरीरस्याज्ञानकल्पिततया मुक्तौ तस्य स्थितेरसम्भवात् । अस्मन्मते च नानुपपत्तिः । कामयितृ-भौतिकशरीराद्यविशेषिते चिदानन्दात्मकशरीरविशेषिते लोकान्तरप्राप्तेः मोक्षतयाऽभिधानात् । नच यच्छरीरावच्छेदेन कामना तदवच्छेदेन विषयसिद्धावेवेच्छाचारितार्थ्यं सम्भवतीति नोक्तं युज्यत इति वाच्यम् । यौवने दरिद्रस्य कस्यचित्पुंसः प्राप्तसम्पदिच्छायाः वार्धिक्यदशायां प्राप्त-सम्पदा विषयसिद्ध्या चारितार्थ्याभावप्रसङ्गात् । अवयवोपचयापचभेदेन तत्तद्दशापन्नशरीरयोर्भेदात् । तथाच भौतिकशरीरं विहाय चिदानन्दात्मक-दिव्यदेहवतः जीवस्य परममङ्गलकरवैकुण्ठलोकप्राप्तिरूपमोक्षं कथयतां नास्माकमनुपपत्तिलेशः । एवंस्थितेऽपि श्रीमदानन्दतीर्थश्रीमच्चरणीयानां मते 'तव मते एवानुपपत्तेः' इत्युक्तिस्तु प्राक्तनदुष्कर्मपरिपाकसञ्जाताद्वैत-वासनामूलैवेति प्रतिभाति ।

एतेनात इति ल्यप्लोपे पञ्चमीत्युपादाय 'तथाचेमां मुमुक्षामवाप्येत्यर्थ इति केचित्' इति केषाञ्चितदतःशब्दार्थमुपवर्ण्य 'अस्मिन्नर्थे न परोक्तदूषणावकाशोऽपि' इत्यादिना तादृशार्थस्य साधुत्वोपपादनं निरस्तम् । परमते मोक्षस्वरूपदुर्वचत्वस्य, तदिच्छाया असम्भवस्य चोक्तत्वात् ।

किञ्च मुमुक्षाया अधिकारिसम्पदि प्रवेशस्त्वस्ति न वा । नेति पक्षे ब्रह्मजिज्ञासायां मुमुक्षानन्तर्यकथनस्यानुपयोगेनात इति ल्यप्लोपनिमित्तं पञ्चमीत्यस्यानुपयोगात् । आद्ये अधिकारानन्तर्यार्थकाथशब्देनैव मुमुक्षानन्तर्यस्यापि लाभसम्भवेनातःशब्दस्य निरर्थकत्वापत्तेः । अत एव 'तथाच विवरणमते, अथ=नित्यानित्यवस्तुविवेकादिसाधनसम्पत्त्यनन्तरम्, अतः= उक्तश्रुतीनां सत्त्वात् मुमुक्षुणा इष्यमाणफलीभूतब्रह्मज्ञानाय वेदान्तवाक्यैस्तादृशज्ञानानुकूलविचारः कर्तव्य इति सूत्राक्षरार्थः' इत्यप्यपास्तम् । तव मते नित्यानित्यवस्तुविवेकादिसाधनसम्पत्त्यसम्भवस्योक्तत्वात् । ब्रह्मज्ञानायेत्यप्यसङ्गतम् । शुद्धस्य ब्रह्मणः मानविषयत्वानङ्गीकारात् । विशिष्टस्य ज्ञानविषयत्वेऽपि तादृशविशिष्टज्ञानस्य प्रयोजनविरहेणासम्पाद्यतया तादृशज्ञानानुकूलविचारस्याकर्तव्यत्वाच्च । तस्मात् परमत उक्तरीत्याऽधिकार्यसम्भवात्, असन्दिग्धतया ब्रह्मणः विषयत्वासम्भवेन विषयाभावात्, मोक्षस्वरूपस्य निराकृतत्वेन प्रयोजनाभावात्, तत एव सम्बन्धाभावाच्च न ब्रह्ममीमांसाशास्त्रमारम्भणीयं सम्भवति । श्रीमदानन्दतीर्थश्रीमच्चरणानां मतेऽधिकार्यादिसद्भावेन शास्त्रारम्भणीयत्वप्रकारस्तु जयतीर्थश्रीमच्चरणैः सुधादिग्रन्थेषु विस्तरेण प्रतिपादित एव । विस्तरभयान्नेह लिख्यत इति सर्वमनवद्यम् ।। छ ।।

।। इति जिज्ञासाधिकरणम् ।।

।। अथ जन्माधिकरणम् ।।

।। ॐ जन्माद्यस्य यतः ॐ ।।

(सूत्रसङ्गतिविचारः)

यदत्रोक्तं परेण 'प्रथमसूत्रे ब्रह्मस्वरूपप्रमाणादिविचारः प्रतिज्ञातः। तत्र यत्र सर्वं विशेषजातं कल्पितम्, यच्च सत्यज्ञानादिपदार्थेषु धर्मिभूतमखण्डम् वस्तु वस्तुगत्या स एव ब्रह्मशब्दार्थः। तादृशे ब्रह्मणि सर्वे वेदान्ताः प्रमाणमिति शास्त्रयोनित्वात्, तत्तु समन्वयादित्येताभ्यामग्रिमसूत्राभ्यां क्रियमाणः प्रमाणोपन्यासः जिज्ञास्यत्वाभिमततादृशब्रह्मणः लक्षणेन निर्देशं विनाऽनाकाङ्क्षित एव स्यात्। लक्षणेन ज्ञात एवार्थे प्रमाणाकाङ्क्षोदयादिति लक्षणमुखेन ब्रह्मस्वरूपनिर्णयार्थमिदं सूत्रम्' (शां.पा.भू.पु.१२१) इत्यनेन तदसत्। तादृशाखण्डब्रह्मणि सर्वे वेदान्ताः प्रमाणमित्यङ्गीकारे तादृशब्रह्मणः दृश्यत्वेन मिथ्यात्वापत्त्या तथाऽङ्गीकर्तुमशक्यत्वात्। किञ्च 'यतो वाचो निवर्तन्ते' इति श्रुत्या तादृशब्रह्मणः सर्वथा वागगोचरत्वस्य त्वयाऽभिहितत्वाच्च। किञ्च 'यद्यावदनुभूयते तत्सर्वं परिमितमशुद्धं विध्वंस्यबुद्धं च' इति वाचस्पत्युक्तेश्च।

यच्चोक्तम्, लक्षणेन ज्ञात एवार्थे प्रमाणाकाङ्क्षोदयादिति, तदप्यसङ्गतम्। पर्वतो वह्निमानिति प्रतिज्ञातः ज्ञाते वह्नौ प्रमाणाकाङ्क्षया हेतुवाक्यप्रयोगदर्शनात्। नहि तत्र लक्षणतः वह्नेर्ज्ञातता।

'तत्र वाचस्पत्यादिसम्मता इत्थमधिकरणरचना' इत्यभिधाय 'निरुक्तस्य ब्रह्मणः जिज्ञास्यत्वं सम्भवति न वा' इत्यारभ्य 'किञ्चासाधारणधर्मो हि लक्षणम्। न धर्मी, अभेदे लक्ष्यलक्षणभावानुपपत्तेः' इत्यन्तेन

यदुक्तं पूर्वपक्षे, यच्चोक्तं सिद्धान्ते 'यतो वेत्यादिवाक्योक्तम्' इत्यारभ्य 'अधिकमखण्डार्थविचारेऽद्वैतसिद्धितदीयटीकादौ द्रष्टव्यम्' इत्यन्तेन। तत्रोच्यते। यदुक्तम्, पूर्वपक्षे यतो वेत्यादिवाक्यं ब्रह्मलक्षणं प्रतिपादयति न वेति पूर्वोत्तरयुक्तिभ्यां वक्ष्यमाणाभ्यां संशय इति, तदसङ्गतम्। उत्तरयुक्तेः वक्ष्यमाणत्वेऽपि पूर्वयुक्तेः पूर्वमुक्ततत्वादेव वक्ष्यमाणत्वभावात् पूर्वानुक्तार्थ एव लोके वक्ष्यमाणपदप्रयोगदर्शनात्। नहि द्विवचनोपस्थाप्यद्वित्वाश्रयोत्तरयुक्तौ वक्ष्यमाणपदार्थान्वयमात्रेणेयमुक्तिः सम्भवति। तथासति 'घटाकाशौ नित्यौ' इति प्रयोगापत्तेः। अतस्तादृशापत्तिवारणाय यत्र व्यासज्यवृत्तिधर्मस्य पर्याप्तिसम्बन्धेनोद्देश्यतावच्छेदकता तत्रोद्देश्यतावच्छेदकतादृशव्यासज्यवृत्तिधर्मव्यापकत्वं विधेयताघटकसम्बन्धेन विधेये भासत इत्यवश्यमुपेयम्। प्रकृते पूर्वोक्तयुक्तेर्वक्ष्यमाणत्वाभावेन पूर्वोत्तरयुक्तिगतद्वित्वव्यापकत्वस्य वक्ष्यमाणत्वरूपविधेये बाधात्।

यच्चोक्तं तत्रैव ''यद्यावदनुभूतयते तत्सर्वं परिमितमशुद्धं विध्वंस्यबुद्धं च। न तेनोपलब्धेन तद्विरुद्धं नित्यशुद्धमुक्तबुद्धस्वरूपस्य ब्रह्मणः स्वरूपं लक्षयितुं शक्यम्। न हि जातु कश्चित् कृतकत्वेन नित्यं लक्षयतीति न 'यतो वा' इत्यादिवाक्यं ब्रह्मलक्षणार्थम्'' इति तदप्यसमञ्जसम्। कृतकत्वेन नित्यं नहि लक्षयतीति युक्तम्। तत्र कृतकत्वं प्रागभावप्रतियोगित्वम्, नित्यत्वं प्रागभावाप्रतियोगित्वम्। तथा च कृतकत्वेन नित्यं लक्षयतीत्यभ्युपमे प्रागभावाप्रतियोगि प्रागभावप्रतियोगीति लक्षणवाक्यं स्यात्। नच तथास्त्विति वाच्यम्। 'घटान्यो घटः' इति वाक्यात् घटान्यत्वधर्मितावच्छेदककघटत्वविधेयतावच्छेदककाभेदसंसर्गकशाब्दापत्तिवारणाय तत्धर्मावच्छिन्नप्रतियागिकभेदावच्छिन्नो-

देश्यतानिरूपितविधेयतावच्छेदकतासम्बन्धेन शाब्दं प्रति तत्धर्मभेदस्य कारणताया अवश्यं वक्तव्यतया प्रकृते प्रागभावप्रतियोगित्वावच्छिन्न-प्रतियोगिकभेदावच्छिन्नोद्देश्यतानिरूपितविधेयतावच्छेदकतासम्बन्धेन शाब्दं प्रति प्रागभावप्रतियोगित्वभेदस्य कारणतापत्त्या तादृशकारण-बाधेन 'प्रागभावाप्रतियोगी प्रागभावप्रतियोगी' इति लक्षणवाक्यात् शाब्दासम्भवेन तादृशलक्षणवाक्ये बोधकत्वस्यैवाभावात् । नहि तादृशं बाधकमस्ति 'यतो वा' इत्यदिवाक्यं ब्रह्मलक्षणप्रतिपादकमित्यङ्गी-कारे । अतः यतो वेत्यादिवाक्यस्य न पूर्वोक्ततादृशलक्षणवाक्यसाम्येन ब्रह्मलक्षणप्रतिपादकत्वाभावोक्तिः सङ्गच्छत इति ।

(अभेदे लक्ष्यलक्षणभावानुपपत्तिविचारः)

यच्चोक्तमभेदे लक्ष्यलक्षणभावानुपपत्तेरिति तदपि मन्दम् । लक्षण-वाक्याधीनबोधविषयस्य लक्षणतया 'सास्नादिमान् गौः' इत्यत्राभेदान्वय-बोधप्रयोजकसमानविभक्तिकत्वरूपाकाङ्क्षयाऽभेदान्वयबोधसम्भवेन तद्विषयस्य सास्नादिमत अभेदेन गोलक्षणत्वसम्भवात् । यदि च लक्षण-वाक्यतात्पर्यविषयस्य लक्षणत्वेनोदीच्य सास्नाप्रकारकगोविशेष्यक-मानसबोधमादाय तद्विषयसास्नाया एव लक्षणत्वम्, न सास्नादिमत इति विभाव्यते तर्हि सास्नायाः गवाव्रयवत्वेनावयवावयविनोरभेदादभेदेऽपि गोसास्नयोरिव सत्यादिस्वरूपस्य त्वया ब्रह्मलक्षणत्वाभ्युपगमाच्च अभेदेऽपि लक्ष्यलक्षणभावः प्राप्त एवेति ।

किञ्चाभेदे लक्ष्यलक्षणभावानुपपत्तौ किं बीजम् । तादात्म्येन यल्लक्षणं तद्व्यवहारसाधनं न भवतीति वोत व्यावर्तकं न भवतीति । नाद्यः । तादात्म्येन सास्नादिमद्रूपलक्षणस्य 'सास्नादिमती गौः' इति व्यवहार-

साधनत्वात् । न द्वितीयः । गवि तादात्म्येन, इतरभेदव्याप्यसास्नादिमत्प्रकारकपरार्शात् 'गौरितरभेदवती' इत्यनुमितिसम्भवेन तादात्म्येन लक्षणे व्यावर्तकत्वस्यापि सत्त्वात् । नच तादात्म्यसम्बन्धेन व्याप्त्यनुपगमान्नैवंविधपरामर्शादनुमितिसम्भव इति वाच्यम् । तादात्म्येन हेतुकस्थलानुरोधेनैव हेतुसमानाधिकरणेत्यादिव्याप्तिलक्षणेऽधिकरणतास्थाने सम्बन्धितायाः नैय्यायिकैर्निविष्टत्वात् । तेन ज्ञायते तादात्म्येन व्याप्तिरङ्गीकृतेति ।

(जगज्जन्मादिकारणस्य ब्रह्मलक्षणत्वविमर्शः)

यच्चोक्तं सिद्धान्ते 'यतो वेत्यादिवाक्योक्तं जगज्जन्मादिकारणत्वं ब्रह्मणो लक्षणं सम्भवत्येव । तदुक्तं वाचस्पतिमिश्रैः- मा भूदनुभूयमानं जगत् परिच्छिन्नत्वात् तद्धर्मतया तदात्म्येन ब्रह्मलक्षणम्, तदुत्पत्त्यादि तु भविष्यत्येव । देशान्तरप्राप्तिरिव सवितुः व्रज्याया' इति । तत्रोच्यते । परिच्छिन्नत्वात् जगत् तद्धर्मतया तदात्मतया वा ब्रह्मलक्षणं मा भूदिति जगतः ब्रह्मलक्षणत्वं निषिध्य तदुत्पत्यादेः ब्रह्मलक्षणत्वं कथयत आशयः कः ? जगतः परिच्छिन्नत्वेन लक्षणत्वासम्भवेऽपि तदुत्पत्यादेरपरिच्छिन्नतया तदात्मतया ब्रह्मलक्षणत्वं सम्भवतीति वा परिच्छिन्नत्वेऽपि लक्ष्यवृत्तितया तद्धर्मतया लक्षणत्वं सम्भवतीति । नाद्यः । जगत इव जगन्निष्ठाया आद्यक्षणसम्बन्धरूपाया उत्पत्तेरपि परिच्छिन्नतया तस्या अपरिच्छिन्नब्रह्मात्मतया लक्षणत्वायोगात् । न द्वितीयः । तथाविधजगदुत्पत्तेः जगन्निष्ठतया लक्ष्यब्रह्मवृत्तित्वासम्भवात् असम्भव एव स्यादिति ।

यदुक्तं 'देशान्तरप्राप्तिरिव सवितुर्व्रज्याया' इति । तद्देशान्तरप्राप्तेः सवितृगत्यनुमापकत्वेऽपि न तल्लक्षणत्वमित्यादिना चन्द्रिकाचार्यैः

देशान्तरप्राप्तेः सवितृगतिलक्षणत्वं खण्डितमेवेति नात्र तस्य दृष्टान्ततयोदाहरणत्वसम्भव इति । यदि काल्पनिकसम्बन्धेन जगदुत्पत्तेः ब्रह्मवृत्तितया लक्षणत्वं सम्भवतीति विभाव्यते । तर्ह्यध्यस्तत्वादिरूपकाल्पनिकसम्बन्धेन जगतः ब्रह्मवृत्तित्वसम्भवेन जगतः ब्रह्मलक्षणत्वनिराकरणप्रयासवैय्यर्थ्यापत्तेः ।

यदुक्तं तत्रैव- कल्पितत्वेऽपि तस्य ब्रह्मासाधारणत्वाल्लक्षणत्वमुपपन्नमिति तदयुक्तम् । तस्मिन् कल्पितस्य तदसाधारणत्वे शुक्तौ कल्पितस्य रजतस्य शुक्त्यसाधारणलक्षणत्वापत्तेः । जगज्जन्मादिकारणत्वस्य मिथ्यात्वापरपर्यायकल्पितत्वं स्वीकृत्य ब्रह्मासाधारणलक्षणत्वोक्तेर्व्याहतत्वाच्च ।

(सत्यज्ञानादीनां ब्रह्मस्वरूपलक्षणत्वविमर्शः)

यच्चोक्तम्, एवं सत्यं ज्ञानमनन्तमिति श्रुतिप्रतिपाद्यमखण्डं सत्यज्ञानादिस्वरूपमपि ब्रह्मलक्षणं सम्भवतीति तदप्ययुक्तम् । सत्यत्वादिधर्मविनिर्मोकेण सत्यादिपदानां तादृशाखण्डब्रह्मस्वरूपबोधकत्वासम्भवात् । नच 'वायुर्वै क्षेपिष्ठा देवता' इत्याद्यर्थवादवाक्येषु मुख्येऽर्थे उद्देश्यतावच्छेदकविधेयादिसंसर्गबोधे सत्यपि लक्षणीये स्तुतिरूपे न तत्संसर्गो भासते । तद्वत् सत्यादिवाक्येषु द्वारीभूते मुख्यार्थे तद्भानेऽपि लक्षिते स्वरूपमात्रेऽपि न स भासत इति लक्षणया तादृशाखण्डब्रह्मस्वरूपबोधकत्वाविरोधादिति वाच्यम् । तत्रापि लक्षणयोपस्थापितप्राशस्त्यप्रकारकवायुदेवताकयागादिविशेष्यकबोधस्यैवोत्पत्त्या तद्वदत्रापि लक्ष्यतावच्छेदकपुरस्कारेणैव ब्रह्मबोधस्योत्पत्तुमर्हतया 'सत्यं ज्ञानम् अनन्तम्' इत्यादिवाक्यात् धर्मविनिर्मोकेण तादृशाखण्डब्रह्मबोधस्य

त्वदनुभवैकवेद्यत्वात्। एतेन, प्रकृष्टप्रकाशश्चन्द्र इति लौकिकवाक्येष्वपि स्वरूपमात्रबोधकत्वं प्रत्युक्तम्।

यदुक्तम् ''सत्यादिवाक्ये सत्यत्वब्रह्मत्वसंसर्गोऽपि न भासते। अपितु प्रातिपदिकार्थमात्रम्। 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति, उदरमन्तरं कुरुते, अथ तस्य भयं भवति' इत्यादिश्रुतिभिर्भेददर्शनस्य निन्दितत्वेन स्वरूपमात्र एव श्रुतितात्पर्यावगमात्'' (शां.पा.भू. पु.१२३) इति तदप्ययुक्तम्। तादृशश्रुतीनां भगवद्रूपेषु परस्परं भेददर्शनस्य भयहेतुतापरतयोपवर्णितत्वात्। अतः नैतच्छ्रुतिबलेन 'सत्यं ज्ञानमन्तं ब्रह्म' इत्यादिश्रुतीनां सत्यत्वादिसंसर्गमन्तरा ब्रह्मस्वरूपमात्रे तात्पर्यं कल्पयितुम् उचितमिति।

किञ्च सत्यादिवाक्ये सत्यादिस्वरूपमात्रे तात्पर्ये तादृशस्यैकेनापि पदेन बोधनसम्भवात् पदान्तरोपादानवैय्यर्थ्यम्।

यदत्रोक्तम् 'सत्यत्वज्ञानत्वाद्युपलक्षितशुद्धानामैक्यनिश्चयाय पदान्तरोपादानम्। अन्यथा सत्यत्वाद्युपलक्षितात् भेदः ज्ञानत्वानन्तत्वाद्युपलक्षितवृत्तिरिति भ्रमानिवृत्त्या ब्रह्मरूपमोक्षस्य स्वप्रकाशचिदानन्दभिन्नेन, अनन्तस्वरूपेणाभेदबुद्ध्या तत्प्राप्तेरपुरुषार्थत्वज्ञानेन तत्साधनश्रवणादौ प्रवृत्त्यनुपपत्तेः। तस्य मिथ्यात्वबुद्ध्या ब्रह्मज्ञाने मिथ्याविषयकत्वरूपभ्रमत्वज्ञानात् तस्याज्ञाननिवर्तकत्वानुपपत्तिश्च। तावत्पदसत्त्वे तु समानविभक्तिकसत्यादिपदजन्यशाब्दबुद्धिविषयत्वायथानुपपत्त्या सत्यादिपदार्थानामैक्यनिश्चयान्नोक्तभ्रमसम्भव इति सत्यादिवाक्यप्रतिपाद्यमखण्डस्वरूपं लक्षणं सुवचमेव' (शां.पा.भू. पु.१२४) इति तदपि न। ब्रह्मस्वरूपं यादृशं सत्यचिदानन्दान्तस्वरूपमस्ति, तादृश-

स्वरूपस्यैवेकेन सत्यपदेन प्रकाशसम्भवादधिष्ठानस्य तत्वतः प्रकाशे तत्रारोपासम्भवेन सत्यत्वाद्युपलक्षितेऽनन्तत्वाद्युपलक्षितभेदारोपास्यानन्तत्वाद्युपलक्षिते वा सत्यत्वाद्युपलक्षितप्रतियोगिकभेदारोपस्य चासम्भवेन तन्निवृत्त्यर्थं सत्यत्वज्ञानत्वानन्तत्वाद्युपलक्षितशुद्धानामैक्यनिश्चयः, तदर्थं पदान्तरोपादानमित्यस्यासङ्गतत्वात् ।

नच सत्यपदेन सत्यत्वधर्मपुरस्कारेण ब्रह्मप्रकाशेऽप्यनन्तत्वादिना प्रकाशाभावेन तथाविधो भ्रमः सम्भवत्येवेति वाच्यम् । सत्यादिपदेन सत्यत्वादिधर्मविनिर्मोकेण ब्रह्मस्वरूपमात्रप्रकाशं वदता त्वया त्वेवं वक्तुमशक्यत्वात् । सत्यादिपदाधीनबोधे सत्यत्वादीनां भाने तेषां कल्पिततया मिथ्यात्वेन मिथ्याविषयकत्वरूपभ्रमत्वप्राप्त्या तादृशबोधस्याज्ञाननिवर्तकत्वाभावापत्तेः । उद्देश्यविधेययोरैक्ये उद्देश्यांशे विधेयांशे वाऽधिकानवगाहने 'सत्यं ज्ञानमनन्तम्' इति वाक्यात् 'घटो घटः' इत्यत्रेव शाब्दबोधोऽपि तव दुरुपपाद एव यदन्यथानुपपत्त्या सत्यादिपदार्थानामैक्यनिश्चयान्नोक्तभ्रमसम्भव इति वक्तुं शक्येत । अतः 'तावत्पदसत्त्वे तु समानविभक्तिकसत्यादिपदजन्यशाब्दबुद्धिविषयत्वान्यथानुपपत्त्या सत्यादिपार्थानामैक्यनिश्चयान्नोक्तभ्रमसम्भवः' इत्यपि न युज्यते ।

यच्चोक्तम् - 'स्वरूपैक्येऽपि कल्पितलक्ष्यलक्षणाकारभेदाभ्युपगमात् नाभेदे लक्ष्यलक्षणभावानुपपत्तिरिति न पूर्वपक्षोक्तदोषः' इति तदसत् । मिथ्याभूतभेदेन लक्ष्यलक्षणभावाभ्युपगमे स्वस्य स्वमेव लक्षणमित्यापात् ।

(द्वितीयसूत्रस्य परोक्तपूर्वपक्षसाङ्गत्यचिन्ता)

'यत्तु चन्द्रिकायाम्- अत्र परैरित्यादिनोक्तं पूर्वपक्षमनूद्य तन्नेत्यादिना जिज्ञास्ये स्वेतरव्यावृत्यर्थं लक्षणसूत्रेऽस्मद्रीत्याऽव्यावृत्तिपूर्वपक्षस्यैवोचितत्वात्' इत्यनेन चन्द्रिकामनूद्य तदविचाररमणीयमित्यभिधाय, यदुक्तम् 'तुल्यन्यायेनोक्तरीत्या लक्षणाप्रातिपत्तौ लक्षणेनाज्ञातेऽर्थे विचारासम्भवशङ्काया अप्यवश्यं निरसनीयत्वेन त्वदुक्तशङ्कामात्रस्यौचित्यबीजत्वस्य त्वदेकवेद्यत्वात्' इति । तसदत् । इत्थं वदतस्त्वेवम् अभिप्रायः प्रतिभाति । जिज्ञासाऽसम्भवशङ्कानिरासार्थं लक्षणकथनायैतत्सूत्रस्य प्रवृत्तिरिति । स न युक्तः । जिज्ञासाधिकरणे तावत् 'लोके उभयविधव्यापारदर्शनात् जिज्ञासा कर्तव्या नवेति संशयं प्रापय्य न कर्तव्यैव ब्रह्मजिज्ञासा विषयप्रयोजनाधिकारिसम्बन्धशून्यत्वात्' इति पूर्वपक्षयित्वा विषयप्रयोजनसम्बन्धाधिकारिणः समर्थ्य ब्रह्मजिज्ञासा कर्तव्येति सिद्धान्तितत्वेन तेनैव ब्रह्मविचारासम्भवशङ्कायाः निरस्तत्वात्, पुनश्चैतादृशशंङ्कानिवारणायैतत्सूत्रप्रवृत्तिरित्यसङ्गतमित्यभिप्रायेणाव्यावृत्तिपूर्वपक्षस्यैवोचितत्वमभिहितं श्रीमच्चन्द्रिकाचार्यश्रीमच्चरणैः ।

किञ्च लक्षणकथनेऽपि वा कथं विचारासम्भवशङ्कानिरासः । नहि लक्षणकथनमात्रं तादृशशङ्कानिरासकम् । तथाविधलक्षणवतोऽपि विचारः कर्तव्यो न वेति शङ्कासम्भवात् । तथाच येनोपायेन लक्षणकथनानन्तरमपि प्राप्तविचारासम्भवशङ्कानिरासः तेनैव लक्षणकथनेऽपि तादृशशङ्कानिरासो भविष्यत्येवेति न तादृशशङ्कानिरासार्थमेतत्सूत्रप्रणयनमिति सङ्गतमेवेति । एवञ्चोचितानुचिताविद्वत्-त्वदीय-त्वदेकवेद्यत्वोक्तिस्तु द्वैतवादद्वेषमूलैव ।

'यदपि तत्रैव चन्द्रिकायामनित्यादिरूपशब्दादेर्नित्यादिरूपाकाशादेर्लक्षणत्वदर्शनाच्च । जगत इव कारणत्वस्याप्यनात्मतयाऽऽत्मविरुद्धस्वभावत्वादित्युक्तम्' इत्येनन चन्द्रिकामुपपाद्य 'तदभिप्रायस्तु- अनित्यशब्दस्य नित्याकाशलक्षणत्वदर्शनात् सिद्धान्तेऽनात्मभूतस्य कारणत्वादेः ब्रह्मलक्षणत्वस्वीकाराच्च विरुद्धस्वभावयोर्लक्षणभावानुपपत्तिशङ्कापूर्वपक्षे न युक्ता' इत्यनेन चन्द्रिकाचार्याभिप्रायमुपवर्ण्य 'तदपि वाचस्पत्यादिनिबन्धहृदयानवबोधनिबन्धनम्' इत्यभिधाय यदुक्तम् 'शब्दस्य जगत्कारणत्वादेश्च विरुद्धस्वभावस्य गगनब्रह्मादिस्वरूपलक्षणत्वासम्भवस्यैव तत्रोक्तत्वात्' (शां.पा.भू. पु.१२५) इत्यादिना तदप्यसमीचीनम् ।

जगत्कारणत्वस्य ब्रह्मस्वरूपलक्षणत्वासम्भवपूर्वपक्षश्चेत् तर्हि सिद्धान्ते जगत्कारणत्वस्य स्वरूपलक्षणत्वसम्भवोक्तिरपेक्षिता । नहि तादृश्युक्तिः सिद्धान्ते तव सम्मता । सिद्धान्तेऽपि जगत्कारणत्वस्य ब्रह्मस्वरूपलक्षणत्वाभावस्यैव त्वयोक्तत्वात् । नहि जगत्कारणत्वस्य ब्रह्मस्वरूपत्वलक्षणत्वाभावसिद्धान्तेन जगत्कारणत्वस्य ब्रह्मस्वरूपलक्षणत्वासम्भवपूर्वपक्षनिरासो भवति ।

किञ्च जगतः ब्रह्मस्वरूपलक्षणत्वासम्भवपूर्वपक्ष एव यदि तर्हि सिद्धान्ते 'मा भूदनुभूयमानं जगत् परिच्छिन्नत्वात् तद्धर्मतया तदात्मतया वा ब्रह्मलक्षणं तदुत्पत्त्यादि तु भविष्यत्येव' इत्यनेन जगतः ब्रह्मस्वरूपतदतिरिक्तलक्षणान्यतरत्वनिषेधं ब्रह्मलक्षणत्वसामान्याभावपर्यवसन्नमङ्गीकृत्य तदुत्पत्त्यादेः लक्षणत्वकथनोक्तेरसङ्गत्यापत्तेः । ब्रह्मस्वरूपलक्षणत्वनिषेधस्यैवोपपादनीयतया प्राप्तत्वात् । तेन ज्ञायते सामान्यतः ब्रह्मलक्षणत्वनिषेधेनैव पूर्वपक्ष इति । तथाचास्मदुक्तरीत्योक्तलक्षणस्य

सामान्यतः ब्रह्मलक्षणत्वनिषेधः कर्तुं न शक्यत इति पूर्वपक्षस्त्वयुक्त इति चन्द्रिकाचार्याणामाशयः। एवञ्च 'तदपि वाचस्पत्यादिनिबन्धहृदयानवबोधनिबन्धनम्' इत्युक्तिस्तु श्रीमच्चन्द्रिकाचार्यश्रीमच्चरणाभिप्रायानवबोधनिबन्धनैव।

'ननु देशान्तरप्राप्तेः सवितृव्रज्यायामसत्त्वेन तल्लक्षणत्वाभावादुक्तसिद्धान्ते देशान्तरप्राप्तिरिवेत्यादिना निबन्धेन दृष्टान्तोक्त्यसङ्गतिः' इत्याशङ्क्य 'इति चेन्न' इत्यनेन तन्निषिध्य 'तत्प्रतीतिजकप्रतीतिविषयत्वरूपलक्षणत्वमात्रे एवास्य दृष्टान्तत्वात्' (शां.पा.भू. पु.१२६) इति यदुक्तं तदसत्। तत्प्रतीतिजनकप्रतीतिविषयत्वस्य तल्लक्षणत्वे धूमस्यापि वह्निलक्षणत्वापत्तिः। धूमस्यापि वह्न्यनुमितिजनकप्रतीतिविषयत्वसत्त्वात्।

यच्चोक्तम् 'वस्तुतस्तु दार्ष्टान्तिके जगदुत्पत्त्यादावपि न साक्षात् ब्रह्मनिष्ठत्वमित्यसम्भववारणाय "यतः" इति श्रुति-सूत्रस्थपञ्चम्यनुरोधाच्च तदुत्पत्तिपदस्य तदुत्पत्तिकारणतापरत्वं स्वनिरूपितकारणतासम्बन्धेनोत्पत्तेर्वा लक्षणत्वमवश्यं वाच्यम्। तथाच देशान्तरप्राप्तिपदस्यापि तज्जनकतापरत्वात् देशान्तरप्राप्तेरपि स्वनिरूपितजनकतासम्बन्धेन सवितृव्रज्यावृत्तित्वेन तल्लक्षणत्वाद्वा नासङ्गतिः। देशान्तरप्राप्तिरित्यस्य च देशभेदावच्छिन्नो महादिक्सूर्यसंयोगोऽर्थः। जनकता चासमवायिकारणतारूपा ग्राह्या। तेन संयोगजनके द्रव्ये नातिव्याप्तिः। सिद्धान्ते समवायानभ्युपगमेऽपि तत्स्थाने तादात्म्यलक्षणसम्बन्धाभ्युपगमेन नासमवायिकारणत्वं दुर्वचम्' इत्यनेन तदविचाररमणीम्। स्वनिरूपितकारणतासम्बन्धेन जगदुत्पत्तेः ब्रह्मलक्षणत्वाभ्युपमे स्वनिरूपित-

कारणतासम्बन्धेन, स्वोत्पत्तिनिरूपितकारणतासम्बन्धेन वा जगतोऽपि लक्षणत्वसम्भवे जगतः ब्रह्मलक्षणत्वनिरासप्रयासवैय्यर्थ्यम् । साक्षाद् ब्रह्मनिष्ठत्वं नास्तीति प्रक्रिया तु जगद्-उत्पत्त्योरुभयोरपि समैव । एवं स्थितेऽपि जगतः ब्रह्मलक्षणत्वं निषिध्य तदुत्पत्त्यादेर्ब्रह्मलक्षणत्वोक्तिर्न विद्वत्संसदि भासते ।

यदपि, देशान्तरप्राप्तिरित्यस्य देशभेदावच्छिन्नो महादिक्संयोगोऽर्थ इत्युपवर्ण्य स्वनिरूपितासमवायिकारणतासम्बन्धेन तथाविधसंयोगस्य सूर्यगतिलक्षणत्वाङ्गीकरणं तदपि न शोभते । संयोगजसंयोगस्यापि सत्त्वेन संयोगेऽतिव्याप्तेः ।

किञ्च सिद्धान्ते समवायानभ्युपगमाद् असमवायिकारणत्वमपि दुर्वच-मेव । नच समवायानभ्युपगमेऽपि तत्स्थाने तादात्म्यलक्षणसम्बन्धा-भ्युपगमेनेत्युक्तमस्तीति वाच्यम् । तथासति तदुपादाने तादात्म्यसम्बन्धेन प्रत्यासन्नत्वे सति कारणत्वं तदसमवायिकारत्वमित्युक्तं स्यात् । तथाच सूर्यस्यापि सूर्ये तादात्म्येन प्रत्यासन्नत्वे सति तथाविधसंययोगकारणतायाः सत्त्वेन सूर्येऽतिव्याप्तिवारणस्याशक्यत्वापातात् ।

किञ्च समवायिकारणासमवायिकारणयोस्तादात्म्याङ्गीकारे सम-वायिकारणासमवायिकारणविवेको न स्यात् ।

एतेन 'न चात्र सूत्रे यतो वेत्यादिश्रुतावुत्पत्त्यादिकमद्वितीये ब्रह्मणि लिङ्गत्वेनोच्यत इति त्वयापि स्वीकृतमिति चन्द्रिकाकारोक्तं दूषणं निरस्तम्' इति निरस्तम् । उत्पत्त्यादेः ब्रह्मलिङ्गत्वस्य त्वयैवानभ्युगमात्, लक्षणत्वस्य चोक्तरीत्याऽसम्भवादित्याशयात् ।

'जिज्ञास्यत्वेनाद्यसूत्रे प्रकृतस्य निर्विशेषब्रह्मणः भ्रमाधिष्ठानत्वेनाकारणत्वाच्च । भ्रमाधिष्ठानत्वस्यैव विवक्षायां श्रुतिसूत्रयोर्जन्मोक्त्ययोगात्' इति चन्द्रिकोक्तं दूषणमुपपाद्य यदुक्तम् 'उक्तरीत्योत्पत्तिपदस्य लक्षणया कारणत्वपरतया' (शां.पा.भू. पु. १२६) इत्यादिना । तद् अयुक्तम्। 'निर्विशेषब्रह्मणः भ्रमाधिष्ठानत्वेनाकारणत्वाच्च' इत्यस्योक्तरीत्योत्पत्तिपदस्य लक्षणया कारणतापरतयेत्यनेन किं समाधानमुक्तं भवति। अधिष्ठानत्वमेव कारणत्वम्, ब्रह्मणः अधिष्ठानत्वे कारणत्वमपि प्राप्तमिति वोत तदारोपाधिष्ठानत्वतत्कारणत्वयोः क्वचित् समावेशसम्भवेन ब्रह्मण अधिष्ठानत्वे कारणत्वं सम्भवतीति। नाद्यः। कैरपि तान्त्रिकैस्तथानङ्गीकारात्। रजतारोपाधिष्ठानशुक्तेः रजतकारणतापत्तेश्च। द्वितीयेऽपि कारणत्वं निमित्तकारणत्वमुतोपादनत्वम् । आद्ये कालस्य कार्यमात्रकारणतया कालेऽतिव्याप्तेः। द्वितीयेऽज्ञानस्यैव तदुपादानतया ब्रह्मणस्तदुपादानत्वाभावेनासम्भवापत्तेः ।

यदुक्तम् 'यद्रजतमभात् सा शुक्तिरित्यारोपितरजताकारस्यैवारोपितकारणत्वस्योपलक्षणतया निर्विशेषब्रह्मणः लक्षणत्वसम्भवस्योपपादितत्वात्' इत्यनेन। तदपि न। जगज्जन्मादिकारणत्वं ब्रह्मण्यारोपितमित्यङ्गीकारे जगदारोपाधिष्ठानत्वस्य विशेषस्य प्राप्त्या ब्रह्मणः निर्विशेषत्वोक्तेरसङ्गत्यापत्तेः । किञ्च 'यतो वा इमानि भूतानि' इति श्रुतेः कल्पितलक्षणबोधकत्वे तादृशश्रुतेः मिथ्याभूतार्थप्रतिपादकतयाऽप्रामाण्यापत्तेश्च ।

(जन्मादित्रयाणां ब्रह्मलक्षणत्वपरिशीलनम्)

'यत्तु चन्द्रिकायाम्, यच्चोक्तं परैः जन्मादीत्यत्रोत्पत्तिस्थितिभङ्गमेवो-

च्यते। नत्वन्यत्। यतो वेत्यादिश्रुत्यनुसारात्' इत्यादिनोक्तं सिद्धान्तमनूद्य ''तन्न । यतो वेत्यत्र सृष्टिस्थितिप्रलयमोक्षाणाम्,

'य आत्मानमन्तरो यमयति'

'त्वं मुक्तिदो बन्धदोऽतो मतो नः। त्वं ज्ञानदोऽज्ञानदश्चासि विष्णो ॥'

इत्यादौ नियमनादीनामप्युक्तेः । विचारविधायकनानावाक्यपरामर्शेन सूत्रकृतैव स्कान्दे जन्माद्यष्टककर्तृत्वस्य लक्षणत्वेनोक्तत्वादत्रापि लक्षणत्वेन तस्यैव विवक्षणीयत्वात् ।

'यद्वा सर्वैर्मुमुक्षुभिर्विशिष्याष्टककर्तृत्वस्येवान्यकर्तृत्वस्य ज्ञेयत्वनियमाभावान्नान्यदिहादिशब्दार्थः ।'

'अथवा विषयोपपादकगुणपूर्तिसिद्धये जीवाद्भेदके जन्मादित्रितयहेतुत्वेऽभिहितेऽपि प्रयोजनसिद्धये मोक्षदत्वस्यापि वक्तव्यत्वात्, तस्य च बन्धकत्वं विनाऽयोगात्, तयोश्च तद्धेतुज्ञानाज्ञानदत्वं विनाऽनुपपत्तेः, पुनश्च दीपस्तम इव ज्ञानं बन्धकाज्ञानं स्वयमेव हन्तीति किम् ईश्वरेणेति शङ्कायां दीपज्ञानादिस्वभावोऽपि भगवदायत्त इति वाच्यत्वात् प्रकृतोपयोगित्वादष्टकोक्तिरिति स्वमतेन सिद्धान्त उक्तः' इत्यनेन चन्द्रिकामुपपाद्य, तत्रोच्यत इत्यभिधाय यदुक्तम् 'यतो वेत्यादिवाक्येऽभिसंविशन्तीत्यस्य लयपरतया लयकारणत्वस्यैवोक्तेः । अत एव सुषुप्तौ ब्रह्मप्राप्तेरपि न पृथगभिधानमिति चतुर्णां कारणत्वानामनुक्तेः । नच प्रयन्तीत्यनेनाभिसंविशन्तीत्यस्य पौनरुक्तिपरिहाराय प्रयन्तीत्यनेन लयमात्रम्, संविशन्तीत्यनेन मोक्षो विवक्षित इति चतुर्णामुक्तिः प्राप्तेत्यभिप्राय इति वाच्यम् । मोक्षस्याविद्याध्वंसत्वेन लयविशेषरूपतया पदद्वयलभ्यं लयकारणत्वं लक्षणमेकमेव सूत्रे प्रतिपाद्यत इति कथं चतुर्णां

प्रतिपादनम् ? प्रयन्ति, अभिसंविशन्तीत्येताभ्यामुत्पत्तिस्थित्योरिव पृथगर्थद्वयविवक्षायां प्रायपाठप्राप्तस्य यत्पदस्याभिसंविशन्तीत्येतत् समभिव्याहारेऽप्रयोगस्य निर्बीजतापत्तेः' इत्यभिप्रायेण तदयुक्तम्। प्रयन्ति अभिसंविशन्तीत्येताभ्यामेकस्य लयकाणत्वस्यैव लक्षणत्वप्रतिपादन-मित्यङ्गीकारेऽभिसंविशन्तीत्यस्य प्रयन्तीत्यनेन पुनरुक्ततापत्तिः । नच गोबलीवर्दन्यायेन सामान्यविशेषभावमाश्रित्य तदुक्तिः सम्भवतीति वाच्यम् । तत्र गोत्वबलीवर्दत्वयोः सामान्यविशेषयोः प्रतिपाद्यता-वच्छेदकयोर्भेदेन पौनरुक्त्यशङ्कापरिहारे इवात्रापि लयत्वावच्छिन्न-निरूपितकारणत्वत्वाविद्यालयत्वावच्छिन्ननिरूपितकारणत्वत्वयोः प्रति-पाद्यतावच्छेदकयोर्भेदमाश्रित्य पौनरुक्तिशङ्कावारणेऽङ्गीकृतेऽङ्गीकृतं प्रयन्तीत्यनेन लयत्वावच्छिन्ननिरूपितकारणत्वम्, अभिसंविशन्तीत्यनेन अविद्यालयत्वावच्छिन्ननिरूपितकारणत्वं लक्षणं प्रतिपाद्यत इति। तथाच प्रतिपाद्यलक्षणयोर्भेदस्यैव प्राप्त्या पदद्वयलभ्यमेकमेव लक्षणं सूत्रे प्रति-पाद्यत इत्यस्यासङ्गतत्वात् ।

किञ्च यथाश्रुते लयकारणत्वस्य घटध्वंसादिकारणकुलालादावपि सत्त्वेनातिव्याप्त्यापत्त्या तद्वारणाय जन्यसामान्यलयकारणत्वस्यैव लक्षण-त्वेन प्रतिपादनीयतयाऽविद्याया अनादितयाऽविद्याध्वंसरूपमोक्षकारण-त्वस्य जन्यसामान्यलयकारणत्वस्वरूपत्वस्य कथञ्चिदप्युपपादयितुम् अशक्यतया पदद्वयेन प्रतिपाद्ययोर्लक्षणयोर्भेदस्य स्पष्टं प्राप्त्या चैकमेव लक्षणं प्रतिपाद्यत इत्यस्यासङ्गत्यापत्तेर्दुर्वारत्वात् ।

नच लयकारणत्वं लयसमानाधिकरणात्यन्ताभावाप्रतियागित्व-घटितम्। एवञ्च घटादिध्वंसादिकारणे कुलालादौ नोक्तरूपं लयकारणत्वं

सम्भवति । कुलालादेर्लयाधिकरणदेशनिष्ठात्यन्ताभावप्रतियोगितया लयसमानाधिकरणात्यन्ताभावप्रतियोगित्वसामान्याभावासम्भवात् । अतो न जन्यत्वं लक्षणशरीरे निवेशनीयमिति न तन्निवेशाधीनक्षणभेदोक्तिः सम्भवतीति वाच्यम् । तथासत्यप्यविद्यालयसमानाधिकरणात्यन्ताभावप्रतियोगित्वाभावरूपविशेषाभावस्य लयसमानाधिकरणात्यन्ताभावप्रतियोगित्वसामान्याभावतः भेदसत्त्वेन लक्षणयोर्भिन्नभिन्नाभावघटितत्वेन भेदस्यैव सत्त्वादेकमेव प्रतिपाद्यत इत्यस्यासङ्गत्यापत्तेर्दृढत्वात् । नच लयसामान्यकारणत्वाविद्यालयरूपमोक्षकारणत्वघटकनैयत्यघटकयोरभावयोरीशमात्रवृत्तितया समनैयत्येन समनियताभावानामेकतया भिन्नाभावघटितत्वाभावेन नोक्तलक्षणयोर्भेदः सम्भवतीति वाच्यम् । समनियताभावभेदपक्षे तावदुक्तलक्षणयोर्भेदः स्पष्ट एव । तयोरभेदपक्षेऽपि लयसमानाधिकरणात्यन्ताभावप्रतियोगित्वावच्छिन्नप्रतियोगितानिरूपितानुयोगित्वाविद्यालयसमानाधिकरणात्यन्ताभावप्रतियोगित्वत्वावच्छिन्नप्रतियोगिता-निरूपितानुयोगित्वयोर्भेदेन तत् घटिततया लक्षणयोर्भेदसम्भवात् । अवश्यं चैतदेवम् । अन्यथा लयकारणत्वप्रतिपादकेन प्रयन्तीत्यनेनाभिसंविशन्तीत्यस्य पुनरुक्ततेत्यस्याशक्यवारणत्वापत्तेः ।

एतेन यदुक्तम् 'वस्तुतस्तु प्रयन्तीत्यस्य शत्रन्ततया लयोन्मुखानि सन्ति लययोग्यानि सन्ति, लयं लभमानानि वा सन्ति, यदभिसंविशन्ति= यत्र लीयन्त इत्यर्थविवक्षया न पौनरुक्त्यावसरः' (शां.पा.भू. पु. १२९) इत्यन्तेन तन्निरस्तम् । प्रतिपाद्येऽर्थे यं विशेषमवलम्ब्य पौनरुक्त्यपरिहारः क्रियते तं विशेषमादृत्यैव लक्षणयोर्भेदसम्भवात् ।

किञ्च प्रयन्तीत्यस्य शतृप्रत्ययान्तत्वमङ्गीकृत्य तस्य लययोग्यानि लयं लभमानानि वेत्यर्थकत्वे तेषु भूतेषु लययोग्यत्वोपपादनस्याप्रयोजनतया प्रयन्तीत्यस्य वैय्यर्थ्यापत्तेश्च । नचैवं लक्षणयोर्भेदे यत्पदस्याभिसंविशन्तीत्येतत् समभिव्याहारेऽप्रयोगस्य निर्बीजतापत्तिरिति वाच्यम् । तत्र तदप्रयोगेऽप्यन्वयबोधसम्भवस्य तत्र तदप्रयोगबीजत्वात् । नच तदप्रयोगे कथमन्वयबोध इति वाच्यम् । यत्प्रयन्तीत्यत्र श्रुतयत्पदस्याभिसंविशन्तीत्यत्राध्याहारेणान्वयबोधोपपत्तेः । नच यत इत्यत्र श्रुतयत्पदस्यैव सर्वत्राध्याहारसम्भवेन तदितरयत्पदद्वयवैय्यर्थ्यमिति वाच्यम् । अध्याहारस्यागतिकागतित्वेनानेकस्थलेषु तथाविधगतिकल्पनापेक्षयैकत्र तथाविधगतिकल्पनाया औचित्यात् । नचैकत्राप्यगतिकगतिकल्पनापेक्षया पदद्वयलभ्यमेकमेव लक्षणमित्युक्तिरेव सम्यगिति वाच्यं तदसम्भवस्योक्तत्वात् ।

'यदपि चन्द्रिकायां मोक्षस्य बन्धध्वंसरूपत्वे उत्पत्तिरपि प्रागभावनिवृत्तिः स्यात्' (शां.पा.भू.पु.१२९) इत्यनेन चन्द्रिकामुपपाद्य 'तदभिप्रायस्तु लयकारणत्वेन मोक्षकारणत्वस्येव जन्मकारणत्वस्यापि सङ्ग्रहेण पृथक् तदुपादानवैयर्थ्यम्' इत्येनन चन्द्रिकाभिप्रायमुपवर्ण्य, तदपि न सदिति प्रजल्प्य यदुक्तम् 'सिद्धान्ते सत्कार्यवादाभ्युपगमेन प्रागभावानभ्युपगमेनोत्पत्तेस्तन्निवृत्तिरूपत्वासम्भवात् । उत्पत्तेः प्रागभावनिवृत्तिस्वरूपत्वस्वीकारेऽपि तस्या उत्पत्त्यनन्तरमपि सत्त्वेनाग्रेऽपि 'इदानीमुत्पन्नः' इति व्यवहारापत्त्यादिवाणायाद्यक्षणसम्बन्धविशिष्टप्रागभावनिवृत्तेरेवोत्पत्तिरूपताया अवश्यमङ्गीकरणीयता लाघवेनोत्पत्तेराद्यक्षणसम्बन्धरूपताया एव युक्तत्वाच्च' इत्यनेन तदपि न सत् ।

यस्तु घटादेः कार्यस्य प्रागुत्पत्तेः सत्त्वमभ्युपगच्छति स किं पृथगेव पृथुबुध्नोदरादिना कार्यात्मना, उत मृदादिकारणात्मना ? नाद्यः। अनभ्युपगमात्, तथानुपलब्धेश्च। द्वितीये घटादिकार्यस्य कार्यात्मनाऽसत्त्वं कारणात्मना सत्त्वमङ्गीकृतमिति सदसत्कार्यवादस्यैव प्राप्त्या सिद्धान्ते सत्कार्यवाद इत्यस्यैवाभावात्। तथाच घटादेः कार्यात्मनाऽसत्वाङ्गीकारेण तस्य प्रागभावोऽपि सङ्गच्छते। अतः प्रागभावानङ्गीकारेणेत्यसङ्गतम्।

यदपि, प्रागभावनिवृत्तिरूपत्वस्वीकारेऽपीत्यादिनोत्पत्तेः प्रागभावनिवृत्तिरूपत्वपक्षे द्वितीयदोषाभिधानं तदपि न। उत्पत्तेः प्रागभावनिवृत्तिरूपत्वे बाधकाभावात्। नचाग्रेऽपि 'इदानीमुत्पन्नः' इति व्यवहारापत्तिरूपं बाधकमस्ति। अतस्तद्वारणायाद्यक्षणसम्बन्धविशिष्टप्रागभावनिवृत्तेरेवोत्पत्तिरूपताया अवश्यमङ्गीकरणीयतया लाघवेनोत्पत्तेराद्यक्षणसम्बन्धरूपतैव युक्तेत्युक्तमिति वाच्यम्। उत्पत्तेराद्यक्षणसम्बन्धरूपत्वे तस्या लयान्तर्भावासम्भवेन जन्मादित्रितयहेतुत्वमेकमेव ब्रह्मलक्षणमितिवदतस्तव जन्मकारणत्वांशस्याधिकस्य लक्षणशरीरे निवेशेन गौरवम्। उक्तगुरुशरीराया उत्पत्तिस्वरूपत्वपक्षे उत्पत्तेः लयान्तर्भावसम्भवेन लयकारणत्वेनैव जन्मकारणत्वस्यापि सङ्ग्रहसम्भवेन लक्षणे जन्मकारणत्वनिवेशप्रयुक्तं लाघवम्। तथाचोत्पत्तौ लाघवान्वेषणे लक्षणे गौरवं प्राप्नोतीत्यतः गौरवसम्पादकलाघवस्यायुक्ततत्वेन 'लाघवेनोत्पत्तेराद्यक्षणसम्बन्धरूपताया एव युक्तत्वाच्च' इत्यस्यायुक्तत्वात्।

अथवा, इदानीमुत्पन्न इति व्यवहारे इदानीमित्यतः प्रतीतस्यैतत्कालस्योत्पत्तौ स्वपूर्वकालानवच्छिन्नत्वसम्बन्धेन भानाङ्गीकारेणैवाग्रे

'इदानीमुत्पन्नः' इति व्यवहारापत्तिवारणसम्भवात् प्रागभावनिवृत्तिमात्रस्योत्पत्तिस्वरूपत्वस्वीकारेऽपि न बाधकम्। नचोत्पत्तेः पूर्वम् 'इदानीं घटोत्पत्तिः' इति व्यवहारापत्तिः। भविष्यत्कालीनघटोत्पत्तावप्येतत्कालस्योक्तसम्बन्धेन सत्त्वेन विषयाबाधादिति वाच्यम्। स्वावच्छिन्नत्वस्यापि सम्बन्धत्वाङ्गीकारेणोक्तापत्तेर्वारणसम्भवात्।

नच प्रमेयव्यवस्थितेः प्रमाणाधीनतया बहुप्रमाणेषु जगज्जन्मकारणत्वस्य पृथगभिधानात् लयकारणत्वानन्तर्भावेन जन्मकारणत्वस्य व्यवस्थितिः कर्तव्या भविष्यतीति वाच्यम्। सममत्रापि। बहुप्रमाणेषु मोक्षकारणत्वस्यापि पृथगभिधानात्।

एतेन, लयमोक्षयोः सामान्यविशेषभावस्थले लक्षणद्वयं प्रतिपाद्यमित्यङ्गीकारे जन्मोत्पत्त्योरपि 'आद्यशरीरप्राणसंयोगो जन्म, आद्यक्षणसम्बन्ध उत्पत्तिः' इति सामान्यविशेषभावसत्त्वेन तत्रापि पृथगुभयकारणत्वस्य वक्तव्यतापत्त्या चतुर्णामिति तवासक्तिवैफल्यादिति तु निरस्तम्। प्रमेयव्यवस्थितेः प्रमाणाधीनत्वेन लक्षणस्य यथागमं ग्राह्यतया स्वोत्प्रेक्षामूलककल्पनाया अनादरणीयत्वात्।

यदुक्तम् 'अन्येन बद्धस्यापि लोकेऽन्येन मुक्तिदर्शनात् बन्धकत्वं विना मोचकत्वानुपपत्तिरिति त्वदुक्तिरविचारणीया' इति तदपि न चारु। तदीयबन्धस्य स्वायत्तत्वं विना स्वस्य तदीयबन्धमोचकत्वासम्भवात्। नचान्येन बद्धस्यापि लोकेऽन्येन मुक्तिदर्शनान्न तद्बन्धमोचकत्वे तस्य स्वायत्तत्वमपेक्षितमिति वाच्यम्। खण्डेशेन बद्धस्य मोचनमखण्डमण्डलाधिपेन दृष्टम्। नत्वखण्डेशेन बद्धस्य मोचनं तदाज्ञां विना खण्डेशेन

दृष्टं लोके । तथाच खण्डेशस्याखण्डेशनियम्यत्वेन तत्प्राप्तबन्धस्याप्यखण्डेशायत्तत्वाक्षतेः ।

(तटस्थलक्षणस्वरूपविमर्शः)

''यत्तु चन्द्रिकायाम्- यच्चोक्तं परैर्जन्मादिकारणत्वं तटस्थलक्षणमानन्दादिरेव स्वरूपलक्षणम्'' इति सिद्धान्तमनूद्य ''तन्न। न तावल्लक्ष्यगतागते स्वरूपतटस्थलक्षणे इति युक्तम् । काकादेः गृहे, कारणत्वस्य च ब्रह्मणि, अध्यासतटस्थलक्षणस्य च कारणत्रितयजन्यत्वस्याध्यासे सत्त्वेन स्वरूपलक्षणत्वापातात् । आनन्दादेः स्वरूपलक्षणत्वासम्भवप्रसङ्गाच्च ।

एतेन सत्यासत्ये स्वरूपतटस्थलक्षणे इति निरस्तम् । काकादेरध्यासतटस्थलक्षणस्य च गृहादावकल्पितत्वादिति दूषणमुक्तम्'' इत्यनेन चन्द्रिकोक्तं दूषणमुपपाद्य, तत्रोच्यत इत्यभिधाय यदुक्तम् 'लक्ष्यान्तर्गतागते स्वरूपतटस्थलक्षणे इति विवक्षायामुक्तदोषाभावात् । यदप्यस्मिन् पक्षेऽन्तर्गतपदेन लक्ष्यैकदेशोक्तौ लक्ष्यस्याखण्डत्वहानिः। अभेदोक्तौ प्रकृष्टत्वप्रकाशत्वादेश्चन्द्रस्वरूपलक्षणत्वं न स्यात् । त्वया लक्षणवाक्यस्याखण्डार्थत्वनिर्वाहाय प्रकृष्टत्वादेश्चन्द्रप्रातिपदिकात् बहिर्भावस्योक्तत्वादिति दूषणं चन्द्रिकायामुक्तं तदसत् । लक्ष्यान्तर्गतपदेनोपहितकेवलात्मना लक्ष्यात्यन्ताभिन्नत्वविवक्षायां दोषाभावात् । तस्य चाभावस्याधिकरणात्मकत्वपक्षाङ्गीकारेण अन्तवत्वाभावरूपे आनन्त्ये सत्त्वात् । ज्ञानानन्दादौ च सुतरां सत्त्वात् । अतस्तेषां स्वरूपलक्षणत्वोपपत्तिः' इत्यादिना तदसङ्गतम् । लक्ष्यान्तर्गतपदेन लक्ष्येणात्यन्ताभिन्नत्वविवक्षामादायान्तत्वात्यन्ताभावरूपे आनन्त्ये स्वरूपलक्षणत्वाभ्युपगमे

ब्रह्मणः निषेधस्वरूपत्वं स्यात् । नच ब्रह्मत्वेन विधित्वमन्तत्वात्यन्ताभावत्वेन निषेधत्वमिति धर्मभेदेन विधित्वं निषेधत्वं च ब्रह्मणः सम्भवतीति वाच्यम् । त्वया ब्रह्मणः निर्धर्मिकत्वाङ्गीकारेण धर्मभेदेन विधित्वनिषेधत्वयोः समावेशस्य वक्तुमशक्यत्वात् । नच ब्रह्मणि पारमार्थिकधर्माणामसम्भवेऽप्याविद्यकधर्मसम्भवादुक्तं सङ्गच्छत इति वाच्यम् । त्वन्मतेऽविद्यासम्भवस्यासकृदावेदितत्वात् ।

यदुक्तम् 'प्रकृष्टत्वादेश्चन्द्रप्रातिपदिकार्थरूपत्वे तद्बहिर्भावे वोभयथापि तत्संसर्गो वाक्यार्थबोधे न भासत इति' इति तदसत् । 'प्रकृष्टप्रकाशश्चन्द्रः' इत्यत्र चन्द्रे प्रकृष्टप्रकाशत्वस्याभाने 'प्रकृष्टप्रकाशश्चन्द्रमः' इति ज्ञानस्य चन्द्रः प्रकृष्टप्रकाशो न वेति संशयनिवर्तकत्वं न स्यात् । धर्मिणि तद्धर्मावच्छिन्नाभावबुद्धिं प्रति तद्धर्मिणि तद्धर्मावच्छिन्नावगाहिनिश्चयत्वेन प्रतिबन्धकत्वमित्यस्यानुभवसिद्धत्वात् ।

यदुक्तम्- 'एतेन प्रसिद्धस्यासाधारणधर्मस्य लक्षणत्वेनाप्रसिद्धस्य धर्मिणश्च लक्ष्यतया लक्षणस्य लक्ष्यमात्रत्वानुपपत्तेश्चेति चन्द्रिकाकारोक्तं दूषणं निरस्तम्' इति प्रजल्प्य, 'अखण्डार्थत्वविचारे धर्मिणः श्रुतिप्रसिद्धत्वस्योक्तत्वात्' (शां.पा.भू. पु.१३४) इत्यनेन तदसङ्गतम् । 'अप्रसिद्धत्वात् ब्रह्मणः लक्ष्यत्वं न सङ्गच्छते' इति चन्द्रिकाभिप्रायस्तर्हि त्वदीयाब्राह्मणः श्रुतिप्रसिद्धत्वोक्तिः सङ्गता भवेत् । न तथाभिप्रायः । किन्त्वप्रसिद्धं वस्तु प्रसिद्धेनासाधारणधर्मेण लक्षणेन बोधनीयमित्यतः प्रसिद्धस्यैव लक्षणताया, अप्रसिद्धस्य लक्ष्यतायाश्च प्राप्त्या प्रसिद्धस्य लक्षणस्या-प्रसिद्धलक्ष्यमात्रत्वानुपपत्तेरिति ।

'आनन्दो लक्षणमिति चेत्, तर्हि जगत्कारणं लक्षणमस्त्विति

चन्द्रिकाकारोक्तः दूषणाभास एव' इत्यभिधाय यदुक्तम् 'तस्य लक्षणताया अस्माकमिष्टत्वात्। विशिष्टब्रह्मणः शुद्धब्रह्मशक्तिरूपतायाः पुराणेषु स्पष्टमुक्तत्वान्नापसिद्धान्तशङ्कावसरः' इत्यनेन तस्य स्वरूपलक्षणत्वानुमोदेन 'विशिष्टब्रह्मणां ब्रह्मविष्णुशिवात्मकानां शुद्धब्रह्मशक्तिरूपत्वे इमानि प्रमाणानि' इति कानिचित् प्रमाणान्युपपाद्य तेषां स्वानुकूल्येनार्थं पतिकल्प्य उपसंहारे 'तथाच शक्तिरूपविशिष्टब्रह्मात्मकब्रह्मविष्णुरुद्राणामुपहितब्रह्माभेदेन स्वरूपलक्षणत्वमविरुद्धम् । कारणत्वस्य शक्तिनिष्ठस्य स्वरूपैक्याभावात् तटस्थलक्षणत्वमिति सर्वं सुस्थम्' इति। तत्रोच्यते। शक्तिरूपाणां विशिष्टब्रह्मात्मकानां ब्रह्मविष्णुरुद्राणामुपहितब्रह्माभेदेनोपहितब्रह्मस्वरूपलक्षणत्वे किमागतं 'शुद्धब्रह्मस्वरूपलक्षणं जगत्कारणत्वमस्तु' इति चन्द्रिकाभिप्रेतोक्तेः समाधानम्? नच शुद्धस्य विशिष्टाभेदः, विशिष्टस्य तव मते मिथ्यात्वेन शुद्धब्रह्मणोऽपि मिथ्यात्वापत्तेः। अतः शुद्धस्य पारमार्थिकस्वरूपमभिलषता त्वया तेषां विशिष्टब्रह्मणां शुद्धस्वरूपलक्षणत्वाभावस्यैव वक्तव्यतया शुद्धब्रह्मस्वरूपलक्षणमनभिधायैव 'शुद्धस्वरूपलक्षणमुक्तम्' इति मत्वा, स्वरूपलक्षणत्वमविरुद्धमित्युक्तिस्त्वनुपपन्नैव ।

एवं स्वप्रत्याय्यव्यावृत्तिकालव्यापकत्वं स्वरूपलक्षणत्वम्, तदभावः तटस्थलक्षणत्वमिति विवेकोऽपि न सम्भवति। तव मते स्वज्ञाप्यव्यावृत्तेः व्यावहारिकत्वेन तथाविधव्यावृत्त्यधिकरणव्यवहारकालव्यापकत्वस्य कारणत्वे सम्भवेन कारणतायाः स्वरूपलक्षणत्वापत्तेर्दुर्वारत्वात् ।

एतेन, कारणत्वस्य तटस्थलक्षणत्वोक्तिरप्यपास्ता । उक्तरीत्या स्वरूपलक्षणत्वस्यैव सम्भवे पूर्वोक्तस्वरूपलक्षणत्वाभावरूपतटस्थलक्षणत्वस्यासम्भवात् ।

यच्चोक्तम्, 'एवं लक्ष्यकालव्यापकत्वतदभावरूपे यावल्लक्ष्यभाव्य-भाविनी स्वरूपतटस्थलक्षणे इत्यपि साधु' (शां.पा.भू. पु.१३६) इति तदसाधु। लक्ष्यकाल इत्यत्र कालस्य पारमार्थिकत्वाङ्गीकारे पारमार्थिक-वस्तुद्वयस्वीकारेणापसिद्धान्तापत्त्या व्यावहारिकत्वस्यैव स्वीकर्तव्यतया व्यावहारिकलक्ष्यकालव्यापकतायाः लक्ष्याधिकरणव्यवहारकाल-वृत्यन्ताभावाप्रतियोगितारूपायाः जगत्कारणत्वे सम्भवेन तस्य ब्रह्म-स्वरूपलक्षणत्वस्यैव प्राप्तेः। अत एव तदभावरूपे तटस्थलक्षणत्व-मप्यनुपपन्नं जगत्कारणत्वस्य। तस्मिन्नुक्तरीत्या लक्ष्यकालव्यापकत्व-स्यैव सत्त्वेन तदभावरूपतटस्थलक्षणलक्षणाभावात्। नच कालस्य ब्रह्मस्वरूपत्वमङ्गीक्रियते। अतो नाद्वैतहान्यपसिद्धान्ते इति वाच्यम्। काल इत्यनेन लक्ष्याधिकरणकाल इति विवक्षितः, उत लक्ष्यस्वरूपकाल इति ? नाद्यः। अभेदे आधाराधेयभावानुपपत्तिः। नच काल्पनिक-भेदमादायाधाराधेयभावः सम्भवतीति वाच्यम्। वेदान्तजन्याखण्ड-ब्रह्मसाक्षात्कारेण सकलभ्रमनिदानाज्ञाननाशेन तदानीं कल्पकाभावेन भेदकल्पनाया असम्भवात्।

एतेन, आनन्दादीनां ब्रह्मस्वरूपलक्षणत्वमङ्गीकृत्य कल्पितभेदमादाय लक्ष्यलक्षणभावः सङ्गच्छत इति निरस्तम्। मुक्तिकालेऽविद्यानाशेन कल्पकासम्भवस्योक्तत्वात्। न द्वितीयः। कालादिकं जगत् ब्रह्मण्य-ध्यस्तमिति स्वीकृतवता त्वया काले ब्रह्मस्वरूपत्वस्याङ्गीकर्तुमशक्यत्वात् कालपदवैय्यर्थ्याच्च।

'यत्तु चन्द्रिकायाम्- त्वन्मते स्वप्रत्याय्य यावद्द्रव्यावृत्तिभावि-व्यवर्तकान्तराभावात् तस्यैव यावद्द्रव्यावृत्तिभावित्वावश्यंभावात्' इति

चन्द्रिकामुपपाद्य 'कारणत्वे स्वरूपलक्षणत्वापादनं तदुक्तलक्षणकर्तृहृदयानवबोधनिबन्धनम्' इति प्रजल्प्य यदुक्तम् 'तथाहि, स्वप्रत्याय्येत्यस्य स्वप्रयोज्येत्यर्थविवक्षायामेव व्यावर्तकान्तराभावे कारणत्वस्यैव व्यावृत्तिप्रयोजकस्य यावद्व्यावृत्तिभावित्वावश्यंभावः त्वदुक्तः साधुः। प्रकृते स्वप्रत्याय्यशब्देन स्वज्ञाप्येत्यर्थविवक्षया ज्ञापकस्य कारणत्वस्य ज्ञाप्ययावद्व्यावृत्तिभावित्वानावश्यकत्वेन कारणत्वस्य स्वरूपलक्षणत्वापादानासम्भवात्' (शां.पा.भू. पु.१३६) इत्यनेन तदप्यसमीचीनम्। अनेनापि स्वज्ञाप्यव्यावृत्तिकालत्वव्यापकत्वं स्वरूपलक्षणलक्षणमित्युक्तं भवति। तथाच परमते दृश्यव्यावृत्तेरपि मिथ्यात्वेन मुक्तिकालावृत्तितया स्वज्ञाप्यव्यावृत्यधिकरणव्यवहारकालव्यापकतया कारणत्वे ब्रह्मस्वरूपलक्षणत्वापादनस्य दुर्वारत्वात्। एवंस्थितेऽपि चन्द्रिकाचार्यान् प्रति तदुक्ता लक्षणकर्तृहृदयानवबोधनिबन्धनम्-इत्युक्तिस्तु, एवं वदन्तं देवानांप्रियत्वं प्रापयति।

यदपि 'दृश्यव्यावृत्यादिकं मिथ्यैव। तथापि तदुपलक्षितस्य तात्विकस्वरूपस्य बोधनाय मुमुक्षुं तत्वजिज्ञासुं प्रति व्यावर्तकस्वरूपलक्षणादेरभिधानं लौकिपरमार्थारुन्धत्यादिप्रतिपत्तये तन्निकटवृत्तिन्यां स्थूलतारायामारोपितारुन्धतीत्वादेरुपदेशवन्न विरुध्यते' इत्यनेन यदुक्तं तदप्यचारु। ब्रह्मणि दृश्यव्यावृत्तेः मिथ्यात्वे दृश्यत्वस्यैव प्राप्त्या मिथ्यात्वापत्तेः। नापि मिथ्याभूतदृश्यव्यावृत्तिज्ञापनाय सत्यभूतस्वरूपलक्षणाभिधानमुचितम्। मिथ्याभूतेतरभेदज्ञापनस्य सत्यभूतलक्षणाभिधानाप्रयोजनत्वात्। नहि त्वयाप्यानन्दादिस्वरूपलक्षणज्ञाप्यानन्दादिव्यावृत्तिः मिथ्येत्यङ्गीकर्तुं शक्या। तथा सत्यनानन्दादिस्वरूपं

ब्रह्मेति प्राप्त्याऽऽनन्दादीनां स्वरूपलक्षणत्वोत्कीर्तनस्यासङ्गत्यापत्तेः। स्वरूपलक्षणाभिधानस्यारोपितारुन्धतीत्वादेरुपदेशदृष्टान्तोऽप्यसङ्गत एव। नहि तत्र स्थूलतारायामारोपितारुन्धतीत्वप्रतिपत्तिरिवात्र स्वरूपलक्षणाभिधानेनारोपितप्रतिपत्तिर्भवतीति त्वयाङ्गीकृतम्।

यच्चोक्तम्- 'एतेन न च मिथ्याभेदसिद्ध्यै मिथ्यालक्षणकीर्तनं मुमुक्षुं तत्वजिज्ञासुं प्रति शास्त्रेषु शोभत इति चन्द्रिकोक्तं दूषणं निरवकाशम्' इत्यभिधाय, 'एवं पूर्वोक्तस्वरूपतटस्थलक्षणयोर्लक्ष्यलक्षणशब्दाभ्यां ज्ञाप्यज्ञापकभाव एव विवक्षणीयः' इत्यनेन तदपि न सत्। तथात्वेऽपि किमधिकमाचरितम्। मुमुक्षुं तत्वजिज्ञासुं प्रति मिथ्याज्ञापककीर्तनस्यापि शास्त्रेष्वशोभितत्वात्।

यदुक्तम् ''तथाच 'अत एव न यावल्लक्ष्यभाव्यभाविनी स्वरूपतटस्थलक्षणे। अलक्ष्यव्यावर्तकस्याभावे लक्ष्यस्यानवस्थानाच्च। नह्यक्षीरव्यावर्तकहीनं क्षीरम्' इत्यादि चन्द्रिकोक्तदूषणमपि निरस्तमेव'' इत्यनेन तदप्यचारु। अलक्ष्यव्यावृत्तिज्ञापकशून्यलक्ष्यस्याप्यवस्थानासम्भवात्। नह्यक्षीरव्यावृत्तिज्ञापकशून्यमवस्थितक्षीरमुपलब्धं लोके।

यदुक्तम् ''स्वयं व्यावर्तकं स्वरूपलक्षणम्, व्यावर्तकान्तरोपस्थापकं तटस्थलक्षणमित्यपि सुवचम्। काकादिर्हि व्यावर्तकसंस्थानाद्युपस्थापयतीति तस्य तटस्थलक्षणत्वम्। 'कारणत्वेनोपस्थाप्य-व्यावर्तकान्तराभावात्' इत्यादिकं चन्द्रिकोक्तमत्र दूषणं तु पूर्वोक्तरीत्या कारणत्वस्य ज्ञेयब्रह्मगतानन्त्यरूपव्यावर्तकान्तरोपस्थापकत्वान्निरालम्बनमेवेति दिक्'' इत्यनेन तदप्यसत्। अन्तवत्त्वाभावरूपानन्त्यस्य व्यावर्त्यब्रह्मस्वरूपेणात्यन्ताभेदाङ्गीकारेणानन्त्यस्य व्यावर्त्यत्वस्यैव

प्राप्त्या व्यावर्तकत्वासम्भवात्। तथाच कारणत्वोपस्थाप्य-व्यावर्तकान्त-राभावात् व्यावर्तकान्तरोपस्थापकत्वरूपं तटस्थलक्षणलक्षणं कारणत्वे दुर्वचम्। उक्तरीत्याऽऽनन्त्यस्य व्यावर्तकत्वासम्भवेन स्वयं व्यावतर्कत्व-रूपं स्वरूपलक्षणलक्षणमप्यानन्त्ये दुरुपपादमेवेति दिक्।

(जन्माधिकरणसङ्गतिसमर्थनम्)

आनन्दतीर्थीयास्त्वित्यारभ्य ''जिज्ञासाकारणीभूतगुणपूर्तिप्रसिद्धये। जीवादिभेदकं विष्णोः विश्वकर्तृत्वमुच्यते।। इति पूर्वाधिकरणसङ्गति-मुक्त्वा 'तद्विजिज्ञासस्व तद्ब्रह्मेति' इति वाक्यस्थं ब्रह्म किं जीव उत विष्णुरिति चिन्ता। तदर्थं ब्रह्मशब्दस्य रूढ्यर्थत्यागे हेतुर्नास्ति, उतास्तीति। तदर्थं विध्युद्देश्यस्थब्रह्मशब्दस्वारस्याय यतो वेत्यादिपूर्ववाक्यं कथञ्चिज्जीवे नेतुं शक्यमुताशक्यमिति संशये, जीव एवोक्तवाक्यस्थं ब्रह्म। 'बृहजातिजीवकमलासनशब्दराशिषु' इत्यभिधानात् ब्रह्मशब्दस्य तत्र रूढेः, विष्णोर्यौगिकत्वात्। रूढेश्चावयवार्थनिरपेक्षायास्तत्सापेक्ष-योगात् बलीयस्त्वस्य रथकारादिशब्दे स्थितत्वादिति पूर्वपक्षे, सिद्धान्तः-विष्णुरेव जिज्ञास्यं ब्रह्म। भाष्योक्तश्रुतिभिः विष्णुमात्रनिष्ठकारणत्वस्य यतो वेत्यादौ श्रवणात्। तस्य जीवेऽनुपपत्त्या रूढेरपि बाधात्। अदृष्टद्वारा जीवकारणत्वे जातादिपदानां मुख्यार्थत्यागापत्तेः- इति रीत्याऽधिकरण-रचनामाहुः'' इत्यन्तेन श्रीमदानन्दतीर्थश्रीमच्चरणीयानामधिकारण-रचनामुपपाद्य यदुक्तम् 'तत्रोच्यते' इत्यारभ्य 'जिज्ञासाकारणीभूते-त्यादिनोक्तसङ्गतिस्तावदनुपपन्ना। सामान्यतो ज्ञाते विशेषतो वेदितव्ये च सर्वत्र जिज्ञासादर्शनात्। विशेषधर्मपुरस्कारेण जिज्ञासां प्रति सामान्य-धर्मप्रकारकज्ञानस्य कारणतायास्तार्किकैरुक्तत्वाच्च सामान्यधर्म-

प्रकारकज्ञानसाध्याजिज्ञासायां गुणपूर्तेरकारणत्वात् । स्वरूपतो गुणपूर्तेर्व्यधिकरणतया तत्कारणत्वस्यासम्भवदुक्तिकत्वाच्च'' इत्यन्तेन तदयुक्तम् । सामान्यविशेषभावस्य वैवक्षिकतया जगज्जन्मकारणत्व-स्थितिकारणत्वाद्यपेक्षया गुणपूर्णत्वस्य सामान्यधर्मतया ब्रह्मशब्दात् 'बृहन्तो ह्यस्मिन् गुणाः' इति श्रुत्यर्थपर्यालोचनया गुणपूर्तिरूपसामान्य-धर्मेण प्रतीते जगज्जन्मकारणत्वादिरूपगुणत्वव्याप्यधर्मावच्छिन्न-पुरस्कारेण वेदितव्ये च ब्रह्मणि जिज्ञासासम्भवेन न किञ्चिद् बाधकम् अस्ति। विशेषधर्मपुरस्कारेण जिज्ञासां प्रति सामान्यधर्मप्रकारकज्ञानस्य कारणत्वाङ्गीकर्तॄणां तार्किकाणां च न विरोधः । गुणत्वव्याप्यधर्माव-च्छिन्नपुरस्कारेण जिज्ञासायाः, तां प्रति कारणस्य गुणपूर्णत्वरूपसामान्य-धर्मप्रकारकज्ञानस्य च सत्त्वात् । जिज्ञासायाः गुणपूर्तिरूपसामान्य-धर्मप्रकारकज्ञानसाध्यत्वादेव तत्र गुणपूर्तेः कारणत्वमप्यविवादम् ।

यदस्मिन् पक्षे 'गुणपूर्तिरूपकारणस्य जिज्ञासारूपकार्यवैयधि-करण्यम्' इति दूषणं तदप्युद्देश्यतावच्छेदकत्वस्य कार्यतावच्छेदक-सम्बन्धत्वेन सुलभसमाधानम् । ब्रह्मज्ञानोद्देशेन विचारविधानात् ब्रह्मणः विचारोद्देश्यज्ञानविशेषणत्वेन जिज्ञासोद्देश्यतावच्छेदकत्वात्, उद्देश्य-तावच्छेदकतासम्बन्धेन जिज्ञासाधिकरणे ब्रह्मणि गुणपूर्तेः सत्त्वेन कार्यकारणयोः जिज्ञासागुणपूर्त्योः सामानाधिकरण्यसम्भवात् ।

एतेन ''ब्रह्मविचारानन्तरभाविन्याः 'जगज्जन्मादिकर्ता विष्णुः' इति ज्ञानात् जायमानायाः 'गुणपूर्णो विष्णुः' इति निश्चयरूपायास्तस्याः कथं जिज्ञासाकारणत्वम् ? अनन्यथासिद्धनियतपूर्ववर्तिन एव कारण-त्वात्'' इति दूषणं निरस्तम् । गुणपूर्तेरेव कारणत्वाङ्गीकारात् । न च

विशेषधर्मेण जिज्ञासां प्रति सामान्यधर्मप्रकारकज्ञानस्य हेतुतया प्रकृते तदसम्भव इति वाच्यम्। तत्सम्भवस्याप्युक्तत्वात्।

ननु गुणपूर्णत्वरूपसामान्यधर्मज्ञानात् गुणत्वव्याप्यतत्तद्धर्मावच्छिन्नपुरस्कारेण जिज्ञासासम्भवेऽपि जिज्ञासाकारणीभूतेतिपद्यमनन्वितत्वं प्राप्नोति। जिज्ञासाकारणस्य गुणपूर्णत्वप्रकारकज्ञानस्योक्तरीत्या ब्रह्मशब्दतः सम्भवेन गुणपूर्तिज्ञानाय विश्वकर्तृत्वरूपलक्षणकथनानपेक्षणादिति चेन्न। असम्भावनाशङ्कानिरसार्थं तत्कथनस्यावश्यकत्वात्। अत एव प्रेत्युक्तम्। प्रकर्षश्चासम्भावनाशङ्कानिरास एव।

इदमुक्तं भवति। जिज्ञासाकारणीभूता या गुणपूर्तिस्तस्याः 'प्रसिद्ध्ये' ब्रह्मणः प्रकर्षेण= जीवाभेदप्रयुक्तासम्भावनाशङ्कानिरासेन सिद्ध्ये= ज्ञानाय विश्वकर्तृत्वलक्षणकथनमावश्यकमिति।

अथवा, गुणानां पूर्तिर्यस्यामिति व्युत्पत्तौ सप्तम्यर्थो विषयतेत्यादृत्य गुणपूर्तिपदेन गुणपूर्तिविषयकप्रतीतिर्ग्राह्या। तथा च ब्रह्मशब्दतः प्राप्तजिज्ञासाकारणीभूता या गुणपूर्तिप्रतीतिः तस्यां प्रसिद्ध्ये= प्रकर्षप्रामाण्यस्य सिद्ध्ये= निश्चयाय असम्भावनाशङ्कानिरासेन प्रामाण्यनिश्चयायेति यावत्। तदर्थं विश्वकर्तृत्वरूपलक्षणकथनमिति।

विचारानन्तरभाविन्याः गुणपूर्तिप्रतीतेः कथं विचारकारणत्वमिति न शङ्क्यम्। विचारपूर्वभाविन्या उक्तरीत्या ब्रह्मशब्दतः प्राप्तायाः गुणपूर्तिप्रतीतेः जिज्ञासाहेतुत्वाभ्युपगमात्।

यदत्रोक्तम् 'जिज्ञासां प्रत्यन्यत्र क्लृप्तसामान्यधर्मप्रकारकज्ञानेन तत्सहभूतायास्तस्या अन्यथासिद्धत्वात् तत्कारणकल्पकप्रमाणानुपलम्भाच्च।

न तस्याः कारणत्वम्' (शां.भा.पू. पु. १६१) इति तदप्यसङ्गतम्। जिज्ञासात्वेन सामान्यधर्मप्रकारकज्ञानत्वेन च न कार्यकारणसम्भवः। सामान्यविशेषभावस्य विवक्षाधीनतया धर्मे सामान्यविशेषणस्याव्यावर्तकत्वात्। अपितु सामान्यधर्ममपि प्रातिस्विकरूपेण निवेश्य तत्प्रकारकज्ञानत्वेनैव कारणत्वस्य वक्तव्यतया गुणत्वव्याप्यधर्मावच्छिन्नपुरस्कारेण ब्रह्मजिज्ञासां प्रति गुणपूर्णत्वप्रकारकज्ञानस्य कारणत्वेनाङ्गीकृततया तां प्रति गुणपूर्तिप्रकारकज्ञानं विना क्लृप्तनियतपूर्ववृत्तिताकस्यान्यस्याभावेनान्यथासिध्यसम्भवात्। न च ब्रह्मजिज्ञासां प्रति मोक्षहेतुज्ञानविषयत्वरूपसामान्यधर्मप्रकारकब्रह्मविशेष्यकज्ञानस्य हेतुतया तेन गुणपूर्तिज्ञानस्यान्यथासिद्धिरिति वाच्यम्। मोक्षहेतुज्ञानविषयत्वरूपधर्मप्रकारकज्ञानगुणपूर्तिप्रकारकज्ञानयोः सामानाधिकरण्यनियमेन गुणपूर्तिज्ञानस्य तथाविधज्ञानेनान्यत्र क्लृप्तेत्याद्यन्यथासिध्यसम्भवात्। एवमप्यन्यथासिद्धौ गुणपूर्तिज्ञानेनैव तस्यान्यथासिद्धिरिति विपरीतमेव किं न स्यात्? इति। यदि, यस्य पुंसः गुणपूर्तिज्ञानं विना मोक्षहेतुज्ञानविषयत्वरूपधर्मज्ञानाज्जिज्ञासा तत्र मोक्षहेतुज्ञानविषयत्वज्ञानस्य कारणत्वमवश्यं प्राप्तमिति विभाव्यते। तर्हि, तत्समं गुणपूर्तिज्ञानकारणतायामपि।

यदुक्तम् 'एतेनान्येष्वनेकेषु सत्सु तस्यैव जिज्ञास्यत्वं तद्गतविशेषादेव वाच्यम्। स च गुणपूर्तिरेवेति सा जिज्ञासाकारणं स्यादिति निरस्तम्' इत्यभिधाय 'जिज्ञासाकारणमोक्षहेतुज्ञानविषयत्वरूपसामान्यधर्मप्रकारकज्ञानविषयताया अन्यत्रासत्त्वेन मुमुक्षोस्तज्जिज्ञासानुपपत्तेः' इति तदसत्। जिज्ञासां प्रति गुरुशरीरायाः मोक्षहेतुज्ञानविषयत्वरूपधर्म-

प्रकारकज्ञानविषयतायाः कारणत्वापेक्षया लघुशरीरायाः गुणपूर्तेरेव कारणत्वौचित्यात् ।

यदुक्तम् 'किञ्च गुणपूर्तिवाचकब्रह्मशब्देनैव जीवभेदसिद्धेस्तदर्थं विश्वकर्तृत्वमुच्यत इत्युक्तिरपि न साधीयसी' इति तदपि मन्दम् । तथाहि, गुणपूर्णत्वलक्षणेनैव जीवादिव्यावृत्तिसिद्धेर्विश्वकर्तृत्वलक्षणान्तरं मास्त्वित्युक्तं भवत्यनेन । तच्चायुक्तम् । एकस्यानेकलक्षणानां व्यावर्तकानां सम्भवात् । एकस्य लक्षणस्य लक्षणान्तरवैय्यर्थ्यानापादकत्वात् । तार्किकैः पृथिव्याः गन्धवत्व-नानारूपवत्त्वादीनामनेकेषां व्यावर्तकलक्षणत्वाङ्गीकारात् । त्वयापि सत्यज्ञानानन्त्यानामनेकेषामेव ब्रह्मलक्षणत्वस्वीकारात् ।

वस्तुतस्तु ब्रह्मणि गुणपूर्णत्वलक्षणस्यासम्भावनाशङ्कानिरासार्थं जीवादिभेदकं विश्वकर्तृत्वं लक्षणं विष्णोरुक्तम् । नच विश्वकर्तृत्वमप्यसम्भावितमिति वाच्यम् । यतो वेत्यादिश्रुतिसिद्धत्वात् । ब्रह्मणि गुणपूर्णत्वमपि 'बृहन्तो ह्यस्मिन् गुणाः' इति श्रुतिसिद्धमिति चेत् सत्यम् । श्रुतिसिद्धं गुणपूर्णत्वं श्रुतिसिद्धविश्वकर्तृत्वरूपयुक्तिसिद्धमपीत्याशयः । तथाच ब्रह्मणि गुणपूर्णत्वासम्भावनाशङ्कानिरासाय युक्तिरूपप्रमाणान्तरोपन्यासाय विश्वककर्तृत्वरूपलक्षणकथनमित्युक्तं भवति । तथाच

'जिज्ञासाकारणीभूतगुणपूर्तिप्रसिद्धये ।
जीवादिभेदकं विष्णोर्विश्वकर्तृत्वमुच्यते ॥'

इति चन्द्रिकाचार्योक्तिस्त्वतिरमणीयैवेति सर्वमवदातम् ॥

अथ शास्त्रयोनित्वाधिकरणम्

॥ ॐ शास्त्रयोनित्वात् ॐ ॥

(अधिकरणसङ्गतिविचारः)

"यत्तु चन्द्रिकायाम् 'अत्र परेषां भाष्ये शास्त्रस्य योनिरिति विग्रहम् आश्रित्य ऋगादिकारणत्वं ब्रह्मण उच्यते, पूर्वसूत्रेऽर्थतो लब्धस्य सार्वज्ञस्य स्फोरणार्थमित्युक्तम्' इत्यस्मन्मतमनूद्य लक्षणानन्तरमवश्यापेक्षित-प्रमाणपरत्वसम्भवेऽन्यपरत्वायोगात् । त्वदभिमतभ्रमाधिष्ठानत्वमात्रेण सार्वज्ञालाभाच्च । पूर्वसूत्रेऽर्थतो लब्धसर्वशक्त्यादिपरित्यागेन सार्वज्ञस्यैव स्फोरणे निमित्ताभावाच्च । साङ्ख्याभिमताचेतनकारतायाश्चेतनत्वमात्रेण निषेधसम्भवात् साङ्ख्यानङ्गीकृतेन सार्वज्ञसाधनायोगाच्च । श्रुत्या शास्त्र-योनित्वम्, तेन च सार्वज्ञं प्रसाध्य तेन प्रधानस्य कारणतानिषेधात् वरं श्रुत्यैव तन्निषेधः । जगन्निर्माणेनास्फुटीकृतस्य सार्वज्ञस्य तदेकदेश-शास्त्रनिर्माणेन स्फुटीकरणायोगाच्च" इति तन्नेत्यादिना दूषितमित्यन्तेन चन्द्रिकोक्तमुपपाद्य तदापातरमणीयमिति प्रजल्प्य यदुक्तम् 'ब्रह्मणः सर्वज्ञत्वासम्भवात्' इत्यारभ्य 'सर्वज्ञत्वसाधकत्वाभावात्' इत्यन्तेन' (शां.पा.भू. पु. १७३) तदसत् । तथाहि । यत्तावदुक्तम् 'ब्रह्मणः सर्वज्ञ-त्वासम्भवान्निरुक्तकारणत्वलक्षणमसम्भवीति लक्षणासम्भव-शङ्कयाऽसम्भवदुक्तिके लक्षणे प्रमाणाभिधानस्यावसराभावात्' इति । तदयुक्तम् । शास्त्रस्य= वेदस्य, योनिः= कारणम्, तत्वादिति विग्रहः, सर्वज्ञमिति च पदमध्याहार्यम् । ब्रह्मशब्दश्च जिज्ञासासूत्रादनुषञ्जनीयः । तथाच 'ब्रह्म सर्वज्ञं शास्त्रयोनित्वात्= यावद्वेदकर्तृत्वात्' इति हि तव सूत्रार्थः । तत्र व्यापकाभावाद् व्याप्याभाव इति सर्वज्ञत्वरूपव्यापका-

भावाच्छास्त्रयोनित्वरूपव्याप्याभावप्राप्त्या शास्त्रयोनित्वासम्भवशङ्कैव स्यान्नाम । नतु जगत्कारणत्वलक्षणासम्भवशङ्का । तत्र निमित्ताभावात् । नच शास्त्रयोनित्वस्य जगत्कारणत्वव्यापकतया सार्वज्ञाभावे शास्त्रकारणत्वाभावेन व्यापकस्य शास्त्रयोनित्वस्याभावेन जगत्कारणत्वरूपव्याप्याभावप्रसङ्गेनैव परम्परया कारणत्वलक्षणासम्भवशङ्का सम्भवतीति वाच्यम् । श्रुत्या शास्त्रयोनित्वम्, तेन च सार्वज्ञं प्रसाध्य तेन जगज्जन्मादिकारणत्वसाधनस्य त्वदभिप्रेततया व्यापकाभावस्य व्याप्याभावप्रयोजकतया सार्वज्ञाभावे जगत्कारणत्वाभावस्य व्यापकाभावविधया प्रयोजकतालाभेन सार्वज्ञाभावे जगत्कारणत्वाभावस्य प्रयोजकत्वम्, कारणत्वाभावे सार्वज्ञाभावस्योक्तविधया परम्परया प्रयोजकत्वमिति प्राप्त्याऽन्योन्याश्रयात् । परम्पराया अनाश्रयणेऽपि शास्त्रयोनित्वाभावस्य कारणत्वाभावप्रयोजकत्वम्, कारणत्वाभावस्य सार्वज्ञाभावे प्रयोजकता, सार्वज्ञाभावस्य शास्त्रयोनित्वाभावप्रयोजकतेति रीत्या चक्रकत्वप्रसङ्गः ।

किञ्च, कर्तृत्वस्य स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वरूपत्वेन जगत्कर्तृत्वस्य सार्वज्ञघटिततया तदघटितस्यैव लक्षणत्वप्राप्त्या सार्वज्ञाभावादुक्तकारणत्वलक्षणासम्भवशङ्काया असम्भवात् । नच लक्षणघटकसार्वज्ञस्याभावादेवोक्तलक्षणासम्भवशङ्का सम्भवतीति वाच्यम् । तथा सति लक्षणघटककृतिपालनादीनि विहाय सार्वज्ञासम्भवेन लक्षणासम्भवशङ्कौचित्यस्य त्वदेकवेद्यत्वात् ।

किञ्च 'यस्य सर्वावभासनक्षमं नित्यज्ञानमस्ति सोऽसर्वज्ञ इति विप्रतिषिद्धम्' इतीक्षत्यधिकरणीय-त्वदीयभाष्यानुरोधात् तव मते ब्रह्मणः स्वरूपात्मकज्ञानेनैवाध्यासिकभावस्य तादात्म्यलक्षणसर्वावभासकत्व-

रूपसार्वज्ञस्य सम्मततया सार्वज्ञस्य शुद्धचिन्मात्रवृत्तित्वेन, कारणत्वलक्षणस्य च मिथ्याभूतविशिष्टचैतन्यवृत्तितया कारणत्वसार्वज्ञयोर्वैय्यधिकरण्येन सार्वज्ञाभावात् कारणत्वासम्भवशङ्काया असम्भवात् ।

यदुक्तम्, प्रमाणाभिधानस्यावसराभावदिति तदपि न। जगत्कारणत्वे ब्रह्मलक्षणतया प्रतिपादिते तस्य लक्षणस्य 'शिवो जगत्कर्ता शिवत्वात्' इत्याद्यनुमानावष्टम्भेन शिवादावतिव्याप्तिप्रसक्तौ तद्वारणाय जगत्कारणस्य ऋगादिशास्त्रैकसमधिगम्यतया केवलानुमानाद्यवेद्यत्वेन ऋगादिशास्त्रेषूपक्रमादितात्पर्यनिर्णायकलिङ्गैर्विष्णोरेव जगत्कारणतया प्रतिपादनस्यावगतत्वेन, विष्णोरेव जगत्कारणत्वं न शिवादावित्यवश्यं वक्तव्यतया तदर्थं प्रमाणाभिधानस्यावसरसत्त्वात् ।

यदुक्तम्, 'जन्मादिसूत्रोदाहृतस्य यतो वेत्यादिश्रुतिरूपप्रमाणस्यावगतत्वेन प्रमाणाकाङ्क्षाया अनुदयाच्च' (शां.पा.भू. पु.१७४) इति तदसत्। तथाविधश्रुत्या कारणत्वरूपलक्षणावगमेऽपि तस्य शिवाद्यतिव्याप्तिनिरासेन विष्णावेकवृत्तित्वकथनाय प्रमाणोदाहरणस्यावश्यकतया तथाविधप्रमाणाकाङ्क्षोदयस्य न्यायप्राप्तत्वात् ।

'त्वयापि न प्रमाणजिज्ञासया सूत्रमवतारितम्। किन्तु शिवादावतिव्याप्तिवारकतया' इत्यपि न । अनुमानस्यापि प्रमाणतया तदवष्टम्भेन लक्षणस्य शिवादावतिव्याप्तिरिति प्राप्त्याऽतिव्याप्तिवारकतयाऽवतारितस्य सूत्रस्य, ऋगादिशास्त्रमेव प्रमाणम्, तदननुकूलमन्यदप्रमाणम्। अत अनुमानावष्टम्भेन न रुद्रादावतिव्याप्तिरित्यवश्यं वक्तव्यतया जगत्कारणे वस्तुनि ऋगादिशास्त्रमेव प्रमाणमिति प्रमाणपरत्वस्यावश्यकत्वात् ।

'भ्रमाधिष्ठानत्वमात्रं न जन्मादिसूत्रे लक्षणतया विवक्षितम्। किन्तु कर्तृत्वादिकमपि' इत्यपि न। भ्रमाधिष्ठानत्वं कर्तृत्वादिकं च स्वतन्त्र-लक्षणद्वयम्, उत भ्रमाधिष्ठानत्वे सति कर्तृत्वमित्येकमेव लक्षणम्। नाद्यः। जन्मादिसूत्रे त्रितयकर्तृत्वमेकमेव लक्षणं प्रतिपाद्यत इत्यङ्गीकृतवता त्वया चैवं वक्तुमशक्यत्वात्। न द्वितीयः। जगत्कर्तृत्वमात्रस्य लक्षणत्वसम्भवे सत्यन्तस्य वैय्यर्थ्यात्।

(शास्त्रयोनित्वाधिकरणस्य सार्वज्ञ्यसाधनार्थत्वविमर्शः)

''पूर्वसूत्रे इत्यादिकमपि न युक्तम्। सर्वज्ञत्वासिद्धिपरिहाराय शास्त्र-कर्तृत्वेन सार्वज्ञसाधनाय शास्त्रस्य ब्रह्मकार्यत्वबोधकेन 'अस्य महतो भूतस्य निःश्वसितमेतत् ऋग्वेदः' इत्युदाहरणेन सर्वशक्तत्वरूपसर्व-कर्तृत्वस्य स्फुटीकरणात्। तथाहि। निरुक्तवैदिकप्रपञ्चोत्पत्त्यनन्तरम् 'अयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैव निःश्वसितानि' इति लौकिकप्रपञ्चस्यापि सृष्टिराम्नाता। ततश्च सर्वशक्तित्वमपि तेन सिद्ध-प्रायमेव। तदपि शास्त्रयोनित्वसूत्रेण सूचितमेव। आहत्य तु नोक्तम्। तस्य लक्षणासम्भवनिरासकसर्वज्ञत्वसाधकत्वाभावात्'' (शां.पा.भू. पु.१७४) इत्यपि न सत्। अनया श्रुत्युक्तसृष्ट्याऽर्थाल्लब्धं सर्वशक्तित्वं सिद्धप्रायमेवेति यद्यङ्गीक्रियते तर्हि किमपराद्धं सार्वज्ञेन। तस्यापि सार्वज्ञं विनाऽनुपपद्यमानेन जगज्जन्मादिकर्तृत्वेनार्थाल्लाभसम्भवात्।

'तस्य लक्षणासम्भवनिरासकसार्वज्ञसाधकत्वाभावात्' इत्यपि न। यः सर्वशक्तिः स असर्वज्ञः, इति विप्रतिषिद्धतया सर्वशक्तित्वस्यापि सार्वज्ञसाधकत्वात्। शास्त्रकर्तृत्वं सार्वज्ञं विनाऽनुपपद्यमानमिति शास्त्र-कर्तृत्वं सार्वज्ञसाधकमिति यदि मन्यते तर्हि सर्वशक्तित्वं सार्वज्ञं विनाऽ-

नुपपद्यमानं सार्वज्ञं साधयेदेवाविशेषात्। एवमविशेषेऽपि शास्त्रकर्तृत्वस्यैव सार्वज्ञसाधकता न सर्वशक्तित्वस्येति विशेषस्य त्वदेकवेद्यत्वात्।

यदुक्तम्- 'वेदांशे शङ्काविशेषेणाधिकरणयोजना चेत्थं तत्सम्मता। जन्मादिसूत्रोक्तं निखिलजगत्कारणत्वं न ब्रह्मणः सम्भवति। 'वाचा विरूपनित्यया' इति श्रुत्या जगदन्तःपातिवेदस्य नित्यत्वप्रतिपादनादिति पूर्वपक्षः' इति तदप्यनुपपन्नम्। 'अनादिर्वाऽयमाकाशः' इति श्रुत्या जगदन्तःपात्याकाशस्योत्पत्तिशून्यत्वप्रतिपादनात् तत्कर्तृत्वासम्भवेन ब्रह्मणः जगत्कारणत्वं लक्षणं न सम्भवतीति पूर्वपक्षं प्राप्य तत्कर्तृत्वप्रतिपादनाय सूत्रान्तरप्रणयनापत्तेः। आकाशादीनामपि नित्यानां सत्त्वेन तत्कर्तृत्वासम्भवेन कारणत्वं लक्षणं न ब्रह्मणः सम्भवतीति पूर्वपक्षं हित्वा वेदनित्यत्वेन तत्कर्तृत्वासम्भवेन लक्षणं न सम्भवतीति पूर्वपक्षे विशेषबीजाभावाच्च।

'जगन्निर्माणनेत्यादिनोक्तं दूषणमेतदधिकरणीयप्रदर्शितपूर्वपक्षसिद्धान्तरहस्यदुरवगाहाब्धौ निमग्नं नोन्मज्जनमर्हति' इत्यभिधाय यदुक्तम् 'जगत्कारणत्वलक्षणेन सर्वज्ञत्वमुपक्षिप्तम्। तदेव दृढयन्नाहेति शास्त्रयोनित्वसूत्रावतारकभाष्येऽपि दृढयन्नित्यस्य कारणत्वलक्षणेनोपक्षिप्तस्य सर्वज्ञत्वस्यासिद्धिशङ्कायां तत्सिद्धिमाहेत्येवार्थो विवक्षितः। अन्यथा जगत्कारणत्वेन लब्धसर्वज्ञत्वे शास्त्रयोनित्वस्य हेत्वन्तरत्वे पूर्वाधिकरणगुणसूत्रत्वापत्तेरधिकरणान्तरत्वव्याघातात्' (पु. १७६) इति। तदपि न। तादृशभाष्येण 'जगत्कारणत्वलक्षणेनोपक्षिप्तम्= लब्धं सर्वज्ञत्वमेव दृढं करोति शास्त्रयोनित्वसूत्रेण' इत्यर्थः प्रतीयते। न पुनस्त्वदुक्तार्थस्य त्वदीयतादृशभाष्यतः प्रतीतिः। एवमुपवर्णनस्यापि स्वस्याकौशल्यप्रकटनम्, स्व-

भाष्यस्य कर्तुश्च प्रेक्षावदितरत्वज्ञापनं विनाऽन्यत् प्रयोजनं न पश्यामः। नच जगत्कारणत्वेन सर्वज्ञत्वं लब्धं नेति प्रतिपादनार्थं तथोपवर्णनमिति वाच्यम्। तथा सति पूर्वं चन्द्रिकोपपादनवेलायां, पूर्वसूत्रेऽर्थतः लब्धस्य सार्वज्ञस्य स्फोरणार्थम्, इत्यस्मन्मतमनूद्येत्यनेन जन्मादिसूत्रोक्तकारण-त्वेनार्थतः सार्वज्ञलाभस्य स्वमतसिद्धत्वमङ्गीकृत्येदानीं तद्विरुद्धभाषणे व्याहतोक्तित्वापत्तेः। एवं पूर्वोत्तरानुसन्धानं विना विकत्थमानस्य किं वक्तव्यमस्ति ?

''यत्तु चन्द्रिकायाम्, वेदाः स्वविषयादधिकविषयकज्ञानवता प्रणीताः, वाक्यप्रमाणत्वात् पाणिनिशास्त्रवदिति प्रदर्शितविवरणोक्तम् 'अत्र भामतीविवरणयोः' इत्यनेनानूद्य तन्न एकार्थमात्रज्ञेन प्रयुक्तस्यानेकार्थक-शब्दस्याबाधितानेकार्थबोधकत्वदर्शनात्।

नन्वन्योऽर्थो न तात्पर्यविषय इति चेत्, तर्हि प्राशस्त्यपरार्थवाद-प्रतीतवायुक्षेपिष्ठत्वादिसंसर्गज्ञं ब्रह्म न स्यात्। पदार्थज्ञानं विना पदा-प्रयोगेऽपि संसर्गज्ञानासिद्धेः। मानान्तरसिद्धे संसर्गेऽवान्तरतात्पर्य-स्याप्यभावात्।

किञ्च, वेदस्यातत्वे तात्पर्ये प्रामाण्यायोगात् तत्वे चिन्मात्रे तात्पर्यात् ब्रह्मापि तन्मात्रज्ञं स्यात्।

किञ्च, प्रत्यक्षादिसिद्धस्य घटादेः निष्प्रयोजनगङ्गावालुक-काकदशन-सङ्ख्यादेश्च शास्त्राविषयत्वात् तज्ज्ञं ब्रह्म न स्यात्।

अपिच, न तावदर्थमुपलभ्य रचयितृत्वं वेदप्रणेतृत्वम्, पौरुषेयत्वापा-तात्। नाप्यध्यापकवदुच्चारयितृत्वमात्रम्। तेन सार्वज्ञासिद्धेः।

किञ्च, स्वव्यतिरिक्तोपदेश्यपुरुषगोचरस्य भ्रमस्य भ्रान्तिसिद्धशरीरादेश्चाभावे उच्चारणायोगात्, तस्य चासार्वज्ञ्यं विनाऽसम्भवात् शास्त्रयोनित्वमसार्वज्ञ्ये एव हेतुरिति दूषितम्' इति चन्द्रिकोक्तदूषणमुद्भाव्य तदसदिति प्रजल्प्य यदुक्तम् 'यद्यद् विस्तरार्थं शास्त्रं यस्मात् पुरुषविशेषात् सम्भवति स ततोऽधिकतरविज्ञानः' इति भाष्ये यो यत् शास्त्रकर्ता स तदर्थ-तदधिकार्थज्ञानवानिति सामान्यव्याप्तेर्विवक्षिताया एकार्थमात्रज्ञ-प्रयुक्तानेकार्थबोधकाधुनिकलौकिकवाक्यान्तर्भावेण व्यभिचारस्य कथमपि शङ्कितुमप्यशक्यत्वात्' (शां.पा.भू. पु.१७९) इत्यादिना। तदप्यसत्। वेदपक्षकानुमाने वेदकर्तृपक्षकानुमानाभिधास्य मानसामान्यव्याप्त्यभिधानस्यानुपयोगात्। नच यद्यत् प्रमाणशास्त्रं यद्यत् प्रणीतं तत्तत् स्वविषयक-स्वविषयाधिकविषयकज्ञानवत्प्रणीतमिति सामान्यव्याप्तेरभिप्रेततया नानुपयुक्ताभिधानमिति वाच्यम्। प्रकृतहेतुतावच्छेदक-प्रकृतसाध्यतावच्छेदकव्यापकधर्मावच्छिन्नयोर्व्याप्तेरेव सामान्यव्याप्तितया शास्त्रत्वस्य प्रकृतहेतुतावच्छेदकाव्यापकतयोक्तधर्मावच्छिन्नयोर्व्याप्तेः प्रकृते सामान्यव्याप्तित्वस्योपपादयितुमशक्यत्वात्।

नच प्रमाणशास्त्रत्वमेव हेतुरिति नास्याः सामान्यव्याप्तित्वानुपपत्तिरिति वाच्यम्। तावताऽप्यस्यानुमानस्य कर्त्रनारोपितत्वरूपोपाधिग्रस्तत्वेनासदनुमानतया सार्वज्ञासाधकत्वात्। तथाहि। नहि पाणिनौ आरोपितं व्याकरणमिति त्वयाऽङ्गीक्रियत इत्यतः अस्योपाधेर्दृष्टान्तं पाणिनिशास्त्रमादाय साध्यव्यापकता वेदस्य तु ब्रह्मण्यारोपितत्वस्यैव त्वयाऽङ्गीकारेण पक्षे साधनाव्यापकता च सूपपादा। तथा च 'वेदाः स्वविषयस्वविषयाधिकविषयकज्ञानवता न प्रणीताः कर्त्रनारोपितत्वा-

भावात्, यन्नैवं तन्नैवं यथा पाणिनिशास्त्रम्' इत्युपाधेः स्वाभावेन साध्याभावसाधनसंम्भवान्न पूर्वोक्तानुमानेन सार्वज्ञसाधनं सम्भवतीत्युक्तं भवति।

नच साध्यसमव्याप्तस्यैवोपाधितया नास्योपाधित्वं सम्भवति। एकार्थमात्रज्ञप्रणीतवाक्ये कर्त्रनारोपितत्वसत्त्वेऽपि निरुक्तसाध्याभावेन व्यभिचारात् उपाधेः साध्यसमव्याप्तत्वासम्भवादिति वाच्यम्। कर्त्रनारोपितशास्त्रत्वस्यैवोपाधित्वे तात्पर्यात्।

एतेन, यो यद्वाक्यप्रमाणप्रणेता सः तदर्थ-तदर्थाधिकार्थज्ञानवानिति सामान्यव्याप्तिविवक्षातात्पर्यानुरोधेनाप्युक्तव्यभिचारोद्भावनं न सम्यक्। तथा व्याप्तिविवक्षायामपि तादृशव्याप्तौ साध्ये स्वविषयशब्देन स्वप्रयोजकबुबोधयिषाविषयार्थविवक्षया दर्शितलौकिकवाक्यान्तर्भावेण व्यभिचारस्य वारणसम्भवात्। प्राशस्त्यपरार्थवादेत्याद्युक्तदूषणस्याप्यनवकाशात्। अर्थवादवाक्ये हि तद्वाक्यवाच्यार्थज्ञानद्वारा प्राशस्त्यबोधो भवत्वितीच्छायाः प्रयोजकत्वात्, तद्विषयतायाश्च वायुक्षेपिष्ठत्वादिसंसर्गसाधारण्यात्।

'मानान्तरप्राप्तार्थबोधके हि वाक्ये तदर्थप्रमित्युद्देश्यकत्वरूपमेव तात्पर्यं नोपेयते। न तूक्तेच्छानिरूपितोक्तविधविषयत्वमपीति न मानान्तरेत्याद्युक्तदूषणं विचारसहम्' (शां.पा.भू. पु.१८०) इति निरस्तम्। एवं विवक्षायामपि उक्तकर्त्रनारोपितत्वरूपोपाधिदूषितानुमाने व्यभिचारवारणस्य पूर्वदिशि चण्डालादिस्पृष्टचैले पश्चिमदिशि तन्निवारणस्येव व्यर्थत्वात्।

किञ्च, स्वविषयेत्यस्य स्वप्रयोजकबुबोधयिषाविषयेत्यर्थविवक्षाऽपि कर्तुमशक्या। अर्थान्तरापत्तेः। तथाहि। एकार्थमात्रज्ञपुरुषप्रणीतवाक्येऽबाधितानेकार्थबोधके तथाविधपुरुषस्य स्वविषयाणां स्वप्रतिपाद्यानां यावतामर्थानां ज्ञानाभावेऽपि यादृशार्थबोधेच्छया वाक्यस्य प्रयोगः तादृशार्थज्ञानस्य सम्भवेन स्वप्रयोजकबुबोधयिषाविषयविषयकज्ञानतदधिकविषयविषयकज्ञानोभयवत्प्रणीतत्वरूपसाध्यसम्भवान्न व्यभिचार इति व्यभिचारवारणं कर्तव्यम्। एवञ्चानयैव रीत्या ब्रह्मणोऽप्येकैकस्य पदस्यैकैकार्थबुबोधयिषां स्वीकृत्य तादृशबुबोधयिषाविषयाणां तावतां ज्ञानमात्रेण वेदप्रतिपाद्यानामर्थानां यावतां ज्ञानमन्तराऽपि साध्यपर्यवसानसम्भवेन सार्वज्ञासिद्धेः। नच स्वविषयाधिकविषयकज्ञानस्यापि साध्यकोटौ निविष्टत्वेन तथाविधबुबोधयिषाऽविषयाणामपि ज्ञानलाभेन सार्वज्ञोपपत्तिरिति वाच्यम्। स्वविषयाधिकविषयकमित्यत्र स्वविषयाधिकानि यावन्ति तावतां ज्ञानमिति विवक्षा वोत स्वविषयातिरिक्तकतिपयार्थज्ञानविवक्षा ? नाद्यः। पाणिनेरपि सार्वज्ञाभावेन तत्प्रणीतशास्त्रे निरुक्तसाध्याभावेन दृष्टान्ते साध्यवैकल्यापत्तेः। न द्वितीयः। स्वविषयाधिकानां कतिपयार्थानां ज्ञानमात्रेण सार्वज्ञासिद्ध्याऽर्थान्तरत्वापरिहारात्।

'ब्रह्मभिन्ने वेदार्थे तात्विकप्रामाण्याभावेऽपि व्यावहारिकप्रामाण्याभ्युपगमेन' (शां.पा.भू. पु.१८०) इत्यपि न। व्यावहारिकपदेन सत् गीयते, उत मिथ्या ? आद्ये वेदस्यातत्वे तात्पर्ये सत्यभूतप्रामाण्यायोग इति दूषणं दुर्वारम्। द्वितीये वेदस्य प्रामाण्यं नास्तीत्येवायातम्।

यदुक्तम् "वेदकर्तृत्वेन वेदार्थज्ञानसिद्धावपि वेदाविषयाधुनिकपुरुष-

पाणिगतवराटक-गङ्गावालुकादिसङ्ख्याज्ञानासिद्धौ कथं ब्रह्मणः सर्वज्ञ-त्वम्' इति शङ्कायाम् 'यद्यद् विस्तरार्थं शास्त्रम्' इति सामान्यव्याप्तिबलात् वेदाविषयज्ञानसिद्धये प्रवृत्तानुमाने 'किञ्च प्रत्यक्ष'[1] इत्यादिनोक्तदूषणं तु स्वप्रवचनमेव'' (पु.१८०) इति तच्चन्द्रिकाचार्याभिप्रायानवबोध-निबन्धनमेव । साध्यकोटौ स्वविषयाधिकविषयकज्ञानस्य प्रवेशात् शास्त्राविषयाणाम् उक्तपदार्थानां ज्ञानलाभ इति तवाभिप्रायः । स न सम्भवति । तथाहि, स्वविषयाधिकविषयकज्ञानमित्यत्र किं स्वविषयाति-रिक्ताः यावन्तः तावतां ज्ञानमिति वा, उत तथाविधज्ञानमात्रं वा । नाद्यः । पाणिनेः सार्वज्ञाभावेन दृष्टान्ते साध्यवैकल्यापत्तेः । द्वितीयेऽ-नधिगत-प्रयोजनवदर्थबोधकानामेव प्रामाण्यमिति वदता त्वया प्रत्यक्ष-सिद्धघटादेः, निष्प्रयोजनकाकदशनादेश्च शास्त्रविषयता तु नाङ्गीकृतेति स्वविषयज्ञानपदेन नोक्तपदार्थज्ञानलाभः । अधिकविषयविषयक-ज्ञानमित्यत्राप्यधिकविषयमध्ये उक्तपदार्थानाम् अतिरिक्तानाम् अग्रह-णेऽपि साध्यपर्यवसानसम्भवेन ब्रह्मणस्तूक्तपदार्थज्ञानालाभापत्त्या तज्ज्ञं ब्रह्म न स्यादित्यापत्तेर्दुर्वारत्वात् ।

नन्वेकार्थमात्रज्ञप्रयुक्तानेकाबाधितार्थबोधकवाक्ये पूर्वं कथं व्यभिचार उक्तः ? हेतुमति प्रमाणवाक्यत्ववति तस्मिन् साध्यस्यापि सत्त्वात् । तादृशवाक्यकर्तरि स्वविषयस्यैकार्थस्यापि ज्ञानसम्भवात्, ततोऽधिक-कतिपयपदार्थज्ञानस्य च सम्भवादिति चेन्न । यथाश्रुते एकैकस्य पदस्यैकैकार्थज्ञानमादाय वेदप्रतिपाद्यानां यावदर्थानां ज्ञानाभावेऽपि

१. किञ्चेति चन्द्रिकोक्तं खण्डनम् । प्रत्यक्षादिसिद्धस्य घटादेः ज्ञानं न सिद्ध्येत् इति तत्र चन्द्रिकावाक्ये दोषः अभिहितः ।

साध्यपर्यवसानसम्भवेन सार्वज्ञासिद्ध्याऽर्थान्तरतापत्तेः, स्वविषयज्ञानपदेन स्वप्रतिपाद्याः यावन्तः तावतां ज्ञानमेव विवक्षितमिति वक्तव्यतया, उक्तव्यभिचारसम्भवात् ।

'अपि च, इत्यादिकमसत्' इत्यभिधाय यदुक्तम् ''ईश्वरस्यार्थमुपलभ्य वेदरचयितृत्वेऽपि 'धाता यथा पूर्वमकल्पयत्' इत्यादिश्रुत्यनुरोधेन पूर्वकल्पीययथावस्थितवर्णानुपूर्वीतात्पर्यज्ञानाद्यनुसन्धानपूर्वकतत्समानानुपूर्विकवेदोच्चारयितृत्वस्यैव स्वीकारेण भारतादिवत् सजातीयोच्चारणाद्यनपेक्षोच्चारणकर्तृत्वरूपपौरुषेयत्वस्यापादनासम्भवात्' (शां.पा.भू. पु.१८०) इति। तदसत्। नहि सजाजीयोच्चारणाद्यनपेक्षोच्चारणकर्तृत्वरूपापौरुषेयत्वं वेदे स्यादित्यापादनं चन्द्रिकाचार्याणामभिप्रेतम् । किन्तूच्चारणमात्रस्य वेदार्थज्ञानासाधकतया सार्वज्ञासम्भवेन सार्वज्ञसाधनेप्सुना त्वया वेदकर्तृत्वस्य वक्तव्यतया तथाऽङ्गीकारे पुरुषप्रणीतत्वापत्त्या पुरुषप्रणीतत्वरूपपौरुषयत्वापादनमेव। तच्चानिष्टम्। तथेष्टत्वे धर्मादिनिश्चयोपायाभावेन धर्माद्यसिद्धिः स्यात् । नच पौरुषेयेण वाक्येन तत्सिद्धिः, प्रमादाज्ञानसंशयविपर्ययाणां पुरुषेषु सम्भवेन तेषु तत्कृतवाक्येष्वपि चानाश्वाससम्भवात् । विस्तृतं चैतत्सुधायाम्-

'नहि धर्मादिसिद्धिः स्यान्नित्यवाक्यं विना क्वचित् ।
अविप्रलम्भस्तद् ज्ञानं तत्कृतत्वाद्योऽपि च ॥'

इत्याद्यनुव्याख्यानव्याख्यानावसरे । 'न पौरुषेयं वाक्यं धर्मादिनिश्चयाय प्रभवति । पुरुषाणामज्ञानविप्रलम्भापटुकरणत्वानां बहुलमुपलम्भेन धर्माद्युपदेष्टर्याश्वासानुपपत्तेः । तदेवमपौरुषयवाक्यं विना धर्मादिनिश्चयासम्भवात् सामान्यसिद्धिपरिशेषाभ्याम्, विनाऽपौरुषेयवाक्यं

धर्मादिप्रतिपादकमस्तीति सर्ववादिभिरभ्युपेयम्' इत्यादिना जयतीर्थ-श्रीमच्चरणैः । विस्तरभयान्नेह विशेषतोल्लिखितम् ।

''चरमं 'किञ्च [१]स्वव्यतिरिक्त' इत्यादिकमपि न सत्'' इति प्रजल्प्य यदुक्तम् 'भ्रान्तिसिद्धशरीरादेः भ्रान्तिसिद्धत्वेनावगाहमानस्य पारमार्थिकत्वेनानवगाहमानस्य भगवज्ज्ञानस्य भ्रमत्वायोगस्य बहुशोऽद्वैत-ग्रन्थेषु प्रदर्शितत्वेनोक्तदूषणतत्परिहारयोः पिष्टपेषणत्वात्' इति । तदपि मन्दम् । उपदेश्यस्य भ्रान्तिसिद्धत्वज्ञाने उपदेशस्यैवासम्भवात् । नहि लोके उपदेश्यस्य मिथ्यात्वं निश्चित्य तं प्रत्युपदेशे प्रवृत्तः प्रेक्षावान् दृष्टः । तथासति वन्ध्यासुतोद्देशेनाप्युपदेशप्रवृत्तिप्रसङ्गः प्रेक्षावतामिति ।

'यत्तु चन्द्रिकायाम्- विवरणे तु यथा दीपगता प्रकाशनशक्तिस्त-दुपादाने वह्नौ तथा वेदगतसर्वप्रकाशनशक्तिस्तदुपादाने ब्रह्मणि । कार्यकारणयोरेकशक्तित्वात्, इति निरुक्तमर्थमनूद्य ''तन्न । कारणेऽदृष्ट-स्यापि शक्तिविशेषस्य कार्ये दर्शनात् । किञ्च त्वन्मतेऽन्धकारदहनादेरपि ब्रह्मोपादानकत्वात् तद्गताप्रकाशन-दाहादिशक्तिमद् ब्रह्म स्यात् । अविद्यापि शास्त्रोपादानमिति सापि सर्वज्ञा स्यात् । किञ्च परिणामिपरि-णामयोरेकशक्तिमत्त्वेऽपि कथमधिष्ठानाध्यस्तयोः तत् ।''

'एतेनाधिष्ठानस्य ब्रह्मणः विज्ञानशक्तिविवर्तरूपं शास्त्रमिति निरस्तम् । अविद्याकाशादेरपि तद्विवर्ततया शास्त्रवत् सर्वप्रकाशकत्वापा-

---

१. स्वव्यतिरिक्तेत्यादि चन्द्रिकावाक्यम् । ईश्वरः अशरीरः, स्वव्यतिरिक्तं पुरुषं यदा पश्यति तदैव वेदम् उच्चारयितुं प्रभवति । तदा भ्रान्तः स्यात्, इति दोषः तत्रोद्भावितः ।

तात्। रज्वामपि भयकम्पादिशक्तेः, ब्रह्मण्यप्यावरणशक्तेः प्रसङ्गात्। बाह्यागमानामपि ब्रह्मविवर्ततया तदर्थज्ञत्वे ब्रह्मणो भ्रान्तत्वप्रसङ्गाच्च। अपिच कार्योपादानयोरेकशक्तितत्वस्योक्तत्वात् वेदः स्वयमज्ञ एव जीवान् प्रति प्रकाशक इति ब्रह्मापि तथा स्यात्। तथाच सार्वज्ञार्थं यत्नेऽत्यन्तासार्वज्ञमेवापन्नम्।'

'किञ्च जन्मादिकारणत्वेनोपलक्ष्यस्वरूपसिद्धेः किं निर्विशेषत्वप्रतिकूलसार्वज्ञस्फोरणेनेति दूषणमुक्तम्' इत्यनेन चन्द्रिकोक्तं दूषणमुपपाद्य 'तत्रेदं वक्तव्यम्' इत्यभिधाय यदुक्तम् 'कार्यकारणयोरेकशक्तिमत्त्वमित्युत्सर्गः। स च सति बाधकप्रमाणे न प्रवर्तते। तदनवतारे तत्प्रवृत्तिर्निराबाधैव घटगतोदकाहरणादिशक्तेः मृत्पिण्ड इवान्धकारगतावारणशक्तेः स्वप्रकाशरूपत्वेन श्रुतिसिद्धे ब्रह्मण्यापादनायोगः। दृष्टान्ते प्रत्यक्षविरोधरूपबाधकस्येवात्रापि स्वप्रकाशत्वबोधकश्रुतिशतविरोधरूपबाधकसत्त्वात्। एवञ्च बाधकाभावात् औत्सर्गिकनियमेन ब्रह्मणि वेदगतसर्वार्थप्रकाशनशक्तिः सिद्ध्यन्ती नापनह्नोतुमुचिता' इत्यदिना तदयुक्तम्। तथाहि, कार्यकारणयोरेकशक्तिमत्त्वमित्युत्सर्ग इति किमर्थमङ्गीक्रियते। मृत्पिण्डेऽदृष्टस्योदकाहरणादिशक्तिविशेषस्य घटेऽदर्शनात् तथाङ्गीकार इति न वाच्यम्। तथासत्येतन्नियमस्य मृत्पिण्डघटयोरपवाद इव ब्रह्मवेदयोरपवाद इत्यङ्गीक्रियते। अतः न वेदगतसर्वार्थप्रकाशनशक्तेः ब्रह्मवृत्तितासम्भवः। नच यत्र बाधकमस्ति तत्रापवादः। मृत्पिण्डघटयोस्तावदेकशक्तिमत्त्वे प्रत्यक्षविरोधरूपबाधकसत्त्वात् तत्र तादृशनियमस्यापवादसत्त्वेऽपि न तथा प्रकृते ब्रह्मविषये बाधकमस्तीति नात्र तादृशनियमस्यापवाद इति वाच्यम्। अत्रापि वेदस्य ब्रह्मपरिणामत्वमङ्गीकृत्य

परिणामिपरिणामयोरेकशक्तिमत्त्वेन वेदगतसर्वार्थप्रकाशनशक्तिः ब्रह्मणीति वक्तव्यम् । न तथाङ्गीकर्तुं शक्यते । ब्रह्मणः परिणामाङ्गीकारे निर्विकारत्वप्रतिपादकश्रुतिशतविरोधरूपबाधकसत्त्वेन वेदब्रह्मणोरुपादानोपादेयभावस्यासम्भवात् । तस्यैवाभावे नेदृशनियमस्तत्र पदमादधाति । अतः वेदगतसर्वार्थप्रकाशनशक्तेः ब्रह्मवृत्तितायां बीजाभावः नचोपादानोपादेयभावापन्नयोः मृत्पिण्डघटयोः बाधकवशादपवादविषयत्वमिव ब्रह्म वेदयोरुपादानोपादेयभावं स्वीकृत्य बाधकवशादपवादविषयत्वानुपन्यासेन विषमोऽयमुपन्यास इति वाच्यम् । कार्यकारणयोरेकशक्तिमत्त्वनियमस्य औत्सर्गिकत्वमस्तु । उभयथापि ब्रह्मणः वेदोपादानत्वस्यैवासम्भवेन न वेदगतार्थप्रकाशकशक्तिः ब्रह्मणः सम्भवति बीजाभावादित्याशयेन तथोपन्यासात् ।

यद्वा वेदोपादानत्वोपलक्षिते निर्विशेषे चिन्मात्रे ब्रह्मण्यसत अर्थप्रकाशनशक्तिविशेषस्योपादेये वेदे दर्शनादपि वोक्तनियमस्य वेदब्रह्मणोरपवादविषयत्वम् । ब्रह्मण्यर्थप्रकाशनशक्त्यङ्गीकारे निर्विशेषत्वप्रतिपादकश्रुतिविरोधरूपबाधकसत्त्वादिति ।

यदुक्तम् ''यद्वा, वेदगता प्रकाशशक्तिः स्वाश्रयोपादाननिष्ठा, प्रकाशनशक्तित्वात् । या या प्रकाशनशक्तिः सा सा स्वाश्रयोपादाननिष्ठा । दीपगतप्रकाशनशक्तिवदिति विशेषनियम एव कार्यकारणयोरेकशक्तित्वादित्यनेन विवक्षितः । नातो जलाहरणादिकमादाय व्यभिचारावकाशः । कार्यकारणयोरित्यस्योपादानोपादेययोरित्यर्थः । उपादानत्वं च कार्याभिन्नत्वम् । एवं च, आवारणरूपतया 'नीहारेण प्रावृताः' इत्यादिश्रुतिशतानुभवादिसिद्धेऽज्ञाने प्रकाशनशक्तेर्बाधात् तस्याः तदन्य-

वेदोपादाननिष्ठत्वसिद्ध्या फलतः ब्रह्मणि सार्वज्ञसिद्धिः निराबाधैव'' (शां.पा.भू. पु. १८४) इति तदपि न। ब्रह्माविद्ययोः वेदोपादानत्वे समानेऽपि वेदगतप्रकाशनशक्तेरविद्यावृत्तित्वेन साध्यपर्यवसानमनादाय ब्रह्मनिष्ठत्वमादायैव साध्यपर्यवसाने बीजाभावः।

नचोक्तश्रुत्याऽऽवारकतया सिद्धेऽज्ञाने प्रकाशनशक्तेः प्रमाणबाधिततया न तत्र साध्यपर्यवसानं सम्भवतीति वाच्यम्। तथासति ब्रह्मण्यपि निर्विशेषत्वप्रतिपादकश्रुतिभिः प्रकाशनशक्तिविशेषस्य बाधिततया ब्रह्मण्यपि साध्यपर्यवसनास्य कर्तुमशक्यत्वात्। तथाचोभयत्र प्रमाणबाधे समेऽप्यविद्यायां साध्यपर्यवसानं नास्ति, किन्तु ब्रह्मण्येव साध्यपर्यवसानमित्युक्तिर्न विद्वत्संसदि भासत इति।

उपादानत्वं च कार्याभिन्नत्वमित्यपि न। तथासति कार्यस्यापि कार्योपादानत्वापत्तेः।

यदुक्तमज्ञानस्य नीहारेणेत्यादिश्रुतिसिद्धत्वं तदपि न। तथाविधश्रुतेरन्यार्थत्वमुपवर्ण्याज्ञानसाधकत्वाभावस्य पूर्वमुक्तत्वात्।

यदुक्तम् 'एतेनाविद्यापि शास्त्रोपादानमिति सापि सर्वज्ञा स्यादिति दूषणं निरालम्बनमेव। तथा, [१]'किञ्चेत्याद्यपि' इति। तदपि न। अविद्यायाः शास्त्रोपादानात्वेऽपि प्रमाणबाधादेव तस्याः सार्वज्ञापादनं न सम्भवतीति त्वया वक्तव्यम्। न तथा वक्तुं शक्यते। आपादने प्रमाणबाधस्यादूषणत्वादलङ्कार एव हि प्रमाणबाधः। न दूषणमापादनस्येति। अधिष्ठानाध्यस्तयोरेकशक्तिमत्त्वे शुक्तिनिष्ठशक्तेः रजतवृत्तिताप्रसङ्गरूपबाधकसत्त्वात् किञ्चेत्याद्युक्तमपि साध्वेव।

---

१. किञ्चेति चन्द्रिकोक्तं दूषणं पूर्वम् अनूदितम्।

यदुक्तम् ''अधिष्ठानस्य ब्रह्मणः विज्ञानशक्तिविवर्तरूपं शास्त्रमित्येतदर्थकः 'तस्यैव विज्ञानशक्तिविवर्तत्वान्नामरूपप्रपञ्चस्य' इति पञ्चपादिकाग्रन्थोऽप्युक्तविशेषनियमाभिप्रायः[१] । न तु यो यज्ज्ञानशक्तिविवर्तः स तदीयप्रकाशनशक्तिमानिति नियमाभिप्रायः। तथैव विवरणेऽभिप्रायवर्णनात्' इत्येतेनेत्यादिनोक्तदूषणमपि (चन्द्रिकायाम्) निरालम्बनमेव'' (शां.पा.भू.पु.१८४) इति तदप्यसङ्गतम्। अविद्याकाशादेरित्यादिना (चन्द्रिका)इदमुक्तं भवति । 'अविद्याकाशादिकं ब्रह्मवृत्तिसर्वप्रकाशनशक्तिमत् ब्रह्मविज्ञानशक्तिविवर्तत्वात् । यो यदीयविज्ञानशक्तिविवर्तः स तदीयप्रकाशनशक्तिमान्, यथा वेदः' इति । तथाचानेनानुमानेनाविद्याकाशादेरपि सार्वज्ञं सिद्ध्येदिति । नच ब्रह्मविज्ञानशक्तिविवर्तत्वं हेतुरविद्याकाशादेः नास्तीत्युच्यत इति वाच्यम् । 'विज्ञानशक्तिविवर्तत्वान्नामरूपप्रपञ्चस्य' इति पञ्चपादिकाग्रन्थेऽविद्याकाशादेरपि ब्रह्मविज्ञानशक्तिविवर्तत्वाभिधानात् ।

ननु, यत् यज्ज्ञानशक्तिविवर्तं तत् तदीयप्रकाशनशक्तिमदिति व्याप्तिर्नाभिप्रेता । किन्तु यत् यदीयविज्ञानशक्तिविवर्तं शास्त्रं तत् तदीयार्थप्रकाशशक्तिमदिति। तथाचैतादृशव्याप्तिसहकृतेन ब्रह्मज्ञानशक्तिविवर्तशास्त्रत्वेन हेतुना वेदे ब्रह्मसम्बन्धिसर्वार्थप्रकाशनसाधनेन न तथापत्तिः सम्भवति। अविद्याकाशयोरुक्तहेतोरेवाभावादिति चेन्न। तथासति, वेदः ब्रह्मसम्बन्धिसर्वार्थप्रकाशनशक्तिमान् ब्रह्मज्ञानशक्तिविवर्तशास्त्रत्वादित्युक्तं भवति। तथाचात्र चित्स्वरूपत्वमुपाधिः। अस्य तु ब्रह्मणि साध्यव्यापकता, वेदे साधनाव्यापकता च सुखोपपादा । एवञ्चोपाध्य-

१. 'या या प्रकाशनशक्तिः सा सा स्वाश्रयोपादाननिष्ठा' इति नियमः।

भावेन वेदे ब्रह्मसम्बन्धिसर्वार्थप्रकाशनशक्त्यभाव एव सिध्येत् । नतु ब्रह्मसम्बन्धिसर्वार्थप्रकाशनशक्तिरिति ।

यदुक्तम् 'बाह्यागममपीत्यादिकं तु न विचारसहम्' इति प्रज्लप्य तथा हीत्यादिना 'किंवा बाह्यागमार्थानामत्यन्तासत्त्वमभिप्रेतमुत, अनिर्वचनीयत्वं किं वा बाह्यागमजन्यं ज्ञानमन्यथाख्यातिरूपम्' इति विकल्प्य, 'आद्ये ब्रह्मज्ञानस्यासदर्थान् असत्त्वेनावगाहमानस्य स्वीकारान्न तस्य भ्रमत्वमिति नेश्वरस्य भ्रान्तत्वापत्तिः' (शां.पा.भू. पु.१८३)इति तदयुक्तम् । ब्रह्मणस्त्वागमार्थानभिज्ञतापत्तेः । नचागमार्थानामसत्त्वेन ज्ञानमस्तीत्युक्तं तेनागमार्थाभिज्ञता सङ्गच्छत इति वाच्यम् । तदर्थस्यासत्त्वेन ज्ञातरि तदभिज्ञ इति व्यवहाराभावात् । नहि गुणानामसत्त्वेन ज्ञातरि पुरुषे गुणाभिज्ञ इति व्यवहारो लोके दृष्टः ।

एतेनानिर्वचनीयत्वेन जानतः भगवतः भ्रान्तत्वापादनायोगादिति निरस्तम् । सर्वस्यापि निर्वचनार्हतयाऽनिर्वचनीयत्वज्ञानस्य भ्रमतया तद्वतो भगवतः भ्रान्तत्वापादनस्य दुर्वारत्वात् । तृतीयपक्षस्य त्वर्थतः प्रथमपक्ष एवान्तर्भावात् प्रथमपक्षदूषणेन तृतीयपक्षोऽपि निरस्तः । आगमजन्यज्ञानस्यान्यथाख्यातित्वे तद्वत्त्वे ह्यागमजन्यप्रतीतिविषयो यादृशविशिष्टार्थः तादृशविशिष्टार्थप्रकाशनशक्त्यङ्गीकारेऽपि वा तादृशार्थस्यारोपिततया ब्रह्मणि तज्ज्ञानाङ्गीकारे भ्रान्तत्वापत्तेर्दुर्वारत्वात् ।

'' 'अपिच' (चन्द्रिका) इत्यादिकमप्ययुक्तम् । कार्योपादानयोरेकशक्तित्वमित्युक्तेऽपि कार्योपादानयोरेकधर्मत्वानुक्तेः कथं वेदस्याज्ञत्वे ब्रह्मणोऽज्ञत्वापत्तिः ? अज्ञत्वस्य शक्तिरूपत्वाभावात् । कार्योपादानयोरेकशक्तिमत्त्वमिति कार्योपादानयोरेकधर्मत्वमिति वोत्सर्ग एव नियमः,

इति पूर्वमेवोदितत्वादुत्सर्गस्य च बाधकाभाव एव प्रवृत्तेः । सर्वज्ञत्व-बोधकश्रुतिविरोधादेव वेदगताज्ञत्वबलान्न ब्रह्मणि तत्प्रसङ्गः'' (शां.पा.भू. पु.१८६) इति यदुक्तं तदप्ययुक्तम् । तादृशनियमस्यौत्सर्गिकत्वमस्तु मा वा, उभयथाऽपि ब्रह्मणः वेदोपादानत्वाङ्गीकारेणोपादानत्वं कार्याभिन्नत्वमित्यङ्गीकृततया वेदब्रह्मणोरभेदे वेदधर्माणां ब्रह्मण्यङ्गीकर्तुं न्यायप्राप्ततया ब्रह्मणि वेदगताज्ञत्वापादनस्य वज्रलेपायितत्वात् ।

ननु भवद्भिरप्युपादानोपादेययोरैक्यस्याङ्गीकृततया घटगतोदका-हरणादिशक्तेः मृत्पिण्डेऽपि सत्त्वं स्यादित्यापत्तिः भवन्मतेऽपि दुर्वारेति चेन्न । सविशेषाभेदाङ्गीकारेणास्मन्मते तथाविधापत्तिपरिहारसम्भवात् । न तथा त्वयाङ्गीकर्तुं शक्यं विशेषानङ्गीकारात् ।

यदुक्तम् [१] 'किञ्चेत्यादिकं तु जन्मादिसूत्रोक्तं लक्षणं न सम्भवति । तदुपपादकसर्वज्ञत्वस्य ब्रह्मण्यसम्भवादिति पूर्वपक्षनिरासाय कारण-त्वोपयोगि सर्वज्ञत्वं वेदकर्तृत्वात् समर्थ्यत इति पूर्वोपदर्शितपूर्वपक्ष-सिद्धान्तरचनामस्मन्मतसिद्धामाच्छाद्य केवलं स्वोत्प्रेक्षामूलकम्' इति तदप्यसङ्गतम् । सार्वज्ञसाधनस्य ब्रह्मणि निर्विशेषत्वप्रातिकूल्यात् । जगत्कारणत्वस्य मायावृत्तितायाः सार्वज्ञस्य चिन्मात्रवृत्तितायास्त्वयाऽ-ङ्गीकारेण कारणत्वसार्वज्ञत्वयोर्वैय्यधिकरण्येन सार्वज्ञस्य जगत्कारणत्व-साधकत्वाभावाच्च । तस्मात् परमते शास्त्रयोनित्वसूत्रस्यानुपपन्नार्थतया श्रीमदानन्दतीर्थश्रीमच्चरणीयार्थ एवातिरमणीय इति सर्वमवदातम् ॥

---

१. किञ्च जन्मादिकारणत्वेनैवोपदर्शितलक्षणेन उपलक्ष्यस्वरूपसिद्धेः किं निर्विशेषत्वप्रतिकूलसर्वज्ञत्वस्फोरणेन । -चन्द्रिका ।

एतेन,

'यो ब्रह्माणमचीक्लृपत् प्रथमतो वेदानमुष्मै स्वतो
निर्मायोपदिदेश चान्तरगतः साक्षीति यो गीयते ।
यः सङ्क्रान्ततया समग्रमतिषु प्राप्तोऽपि जीवाभिधां
वस्तुत्वे निरुपाधिकः स भगवान् भूयाच्चिरं भूतये ॥'

इति पद्यमपि (शां.पा.भू. पु.२५१) निरस्तं वेदितव्यम् । वेदापौरुषेयत्वं समर्थ्य वेदकर्तृत्वाभावस्यैव ब्रह्मण्युक्तत्वात् । भूतिप्रार्थनमप्यनुपपन्नं निर्धर्मिकत्वेन स्वस्यैव भूतेरभावेन परस्य तद्दानायोगात्, अभेदेन परस्याभावाच्चेति दिक् ॥

अथ समन्वयाधिकरणम्

॥ ॐ तत्तु समन्वयात् ॐ ॥

(परोक्ताधिकरणसङ्गतिविमर्शः)

''यत्तु चन्द्रिकायाम्- 'अत्र परैः वेदान्ताः ब्रह्मणि न प्रमाणम् । सिद्धवस्तुबोधने प्रवृत्याद्यभावेन फलाभावात् सापेक्षत्वप्रसङ्गाच्चेति प्राप्ते' इत्यनेनोक्तपूर्वपक्षमनूद्य 'पूर्वपक्षो निर्दलः । निष्प्रयोजनत्वशङ्कायास्त्वन्मते आद्यसूत्र एव जिज्ञासाशब्देन परिहृतत्वात् । लौकिककार्यपरवाक्येऽपि सापेक्षत्वदर्शनेन पौरुषेयत्वस्यैव सापेक्षत्वप्रयोजकत्वाच्च' इति दूषणमुक्तं तदापातरमणीयम्'' इति प्रजल्पदुक्तम् 'प्रबलप्रत्यक्षविरोधेन कर्तृत्व-भोक्तृत्वविधुरप्रत्यगभिन्नं ब्रह्मरूपविषयप्रतिपादकत्वं न वेदान्तानां सम्भवतीत्यादिप्रथमसूत्रे दर्शितविवरणरीत्या, नाप्यहमिति प्रत्यक्ष-सिद्धात्मप्रतिपादकत्वं वेदान्तानां सम्भवति संशयप्रयोजनयोरभावात् । नच वाच्यम् अहंप्रत्ययः स्थूलोऽहं दुःखीति गृह्णाति, तद्विपरीतश्च वेदान्त-प्रतिपाद्यः सन्दिग्ध इति विषयादिसिद्धिरिति वेदान्तानामध्ययन-विध्यापादितप्रयोजनवदर्थपराणामपि प्रबलाहंप्रत्ययबाधितत्वेन जप-मात्रोपयोगित्वेनाविवक्षितार्थत्वादुपचरितार्थत्वाद्वा इत्यादिना दर्शित-वाचस्पतिरीत्या वा विषयाभावनिबन्धनः फलाभावनिबन्धनश्च शास्त्रा-नारम्भपूर्वपक्षः प्रत्यक्षापेक्षया श्रुतिबलीयस्त्वादिरूपार्थसूचकेन ब्रह्म-जिज्ञासापदेन निरस्तः । तथाचोक्तं वाचस्पतिमिश्रैः 'नच क्रियासमभि-व्याहरेणेतादृगात्मतत्वमभिदधति तत्पराणि सन्ति शक्यमुपचरितार्थानि कर्तुम्' इति । प्रत्यक्षात् श्रुतेः प्राबल्ययुक्तिश्चैतदधिकरणनिर्णयश्रुतेरु-क्तार्थपरत्वसिद्ध्यधीनैवेति निर्णीततात्पर्यकायाः श्रुतेरेव स्वतात्पर्य-

विषयविरोधिप्रत्यक्षप्राबल्यस्यास्मन्मते स्वीकारात्'' (शां.पा.भू.पु.२५२) इत्यनेन । तत्रोच्यते । जिज्ञासाधिकरणे तावत् फलाभावनिबन्धनपूर्वपक्षस्त्वङ्गीकृतः । सिद्धान्तेन तन्निरासोऽपि । एवञ्च सिद्धान्ते फलसमर्पणं विना फलाभावनिबन्धनपूर्वपक्षनिरासायोगात्, अवश्यं फलस्य वक्तव्यतया पुनश्च निष्प्रयोजनत्वशङ्काया असम्भवेन पूर्वपक्षनिर्दलत्वस्य दुर्वारत्वात् । नचैतस्मिन् जिज्ञासाधिकरणे श्रुतेः प्राबल्ययुक्तिर्न सिद्धेति तदर्थं समन्वयाधिकरणारम्भ इति वाच्यम् । पूर्वाधिकरणे श्रुतेः प्राबल्यसिद्ध्यभावे फलाभावनिबन्धनपूर्वपक्षनिरासायोगात् ।

यदप्युक्तम्- 'एवञ्चैतदधिकरणे निर्णेष्यमाणस्यैव विषयप्रयोजनाद्यर्थस्य शिष्यहितैषिणाऽऽचार्येण शास्त्रारम्भोपयोगितया प्रथमसूत्रे जिज्ञासाशब्देन सूचनेऽप्येतदधिकरणवैय्यर्थ्यानवकाशात्' इति तदपि मन्दम् । एतत्सूत्रस्य निर्णेष्यमाणसूचकजिज्ञासापदघटितत्वाङ्गीकारे प्रयोजनादिसूचकत्वस्यैव प्राप्त्या तन्निर्णायकत्वाभावेन निर्णायकत्वरूपसूत्रलक्षणाभावापत्तेः । एतदधिकरणे प्राप्तपूर्वपक्षस्याधिकरणान्तरेण निर्णयेऽधिकरणभेदानुपपत्तेश्च ।

(पराभिप्रेतपूर्वपक्षपरिशीलनम्)

यदुक्तम् ''त्वयापि ह्यानन्दमयाधिकरणे 'प्रादुर्भावो हरेर्जनिः' इत्यनुव्याख्यानोक्तजन्यत्वस्य विष्णौ सावकाशत्वोक्तिरत्रत्यसिद्धान्तसिद्धजन्यत्वाभिप्रायेति प्रतिपाद्यैव त्वदीयभाष्योदाहृतद्युभ्वाद्यधिकरणपूर्वपक्षसमर्थनादुक्तास्मद्रीत्या पूर्वपक्षदूषणं स्वशिरसि पाषाणप्रक्षेपसमत्वात्तुल्यपरिहारमेव'' इति तदतिमन्दम् । न ह्यस्माभिरानन्दमयाधिकरणे प्राप्तस्य- 'नहि ब्रह्मणः जिज्ञासा सम्भवति । तस्य श्रुता-

वानन्दमयावयवत्वेनोक्तत्वेनावयवावयविनोर्भेदसत्त्वात् । नह्यवयविनं विनाऽवयवमात्रस्य ज्ञेयता' इति ब्रह्मजिज्ञास्यत्वपूर्वपक्षस्य निरासः द्युभ्वाद्यधिकरणे नाङ्गीक्रियते, येन साम्यं स्यात् । एवमत्यन्तायुक्तभाषणस्य पाषाणप्रक्षेपसमत्वजल्पनमुन्मत्तजल्पनमेवेति ।

यदुक्तम्- 'एवं लौकिकेत्याद्यपि एतदधिकरणपूर्वपक्षदूषणं न सत् । नहि पूर्वपक्षे कार्यपरवाक्यानां प्रमाणान्तरासिद्धार्थपरत्वनियमः अस्माभिरुक्तः । किन्तु सिद्धवस्तुत्वावच्छेदेन प्रमाणान्तरवेद्यत्वनियम एवेति पूर्वपक्षो न निर्दलः' (शां.पा.भू. पु.२५५) इति तदप्यसत् । 'वेदान्ताः ब्रह्मणि प्राधान्येन न प्रमाणं सापेक्षत्वात् ।' तत्र सापेक्षत्वसाधनार्थमनुमानं तु 'वेदान्ताः सापेक्षाः कार्यपरत्वाभावात्' इत्यभिप्रायः त्वदीयग्रन्थपर्यालोचनया ज्ञायते । तत्र सापेक्षत्वसाधकानुमाने पौरुषेयत्वमुपाधिः । तथा च पौरुषेयत्वरूप उपाध्यभावः वेदान्तेषु सापेक्षत्वाभावं साधयतीति चन्द्रिकाचार्याणामाशयः । तथा चास्य 'नहि पूर्वपक्षे' इत्यादिवाक्येन किं दूषणमुक्तं भवति ? न किमपि ।

नच सिद्धवस्तुत्वावच्छेदेन प्रमाणान्तरवेद्यत्वनियमेन ब्रह्मणः सिद्धत्वात् प्रमाणान्तरवेद्यत्वावश्यकतया ब्रह्मणि वेदान्तानां न प्रामाण्यम्, अनधिगतार्थपरत्वाभावादिति दूषणमुक्तं भवतीति वाच्यम् । सापेक्षत्वे पौरुषेयत्वं प्रयोजकीकुर्वतां प्रामाण्याभावेऽप्यनधिगतार्थपरत्वाभावस्य न प्रयोजकत्वम् । अपितु पौरुषेयवाक्यत्वे सत्यधिगतार्थपरत्वस्यैवेत्याशयात् ।

''यत्तु चन्द्रिकायाम्- सिद्धवस्तुप्रतिपादनस्य निरुक्तफलवत्तामनूद्य कण्ठमण्युपदेशस्य प्राप्तमणिप्राप्तिर्न फलम् । किन्तु प्राप्तिज्ञानजन्यसुखस्य,

वस्तुतः प्रागप्राप्तस्य प्राप्तिः, मण्यप्राप्तिभ्रमादिजन्यदुःखस्य, वस्तुतः प्रागनिवृत्तस्य निवृत्तिर्वा फलम्। एवं 'चरणाभरणमिदं न सर्पः' इत्युपदेशस्यापि न निवृत्तसर्पनिवृत्तिः फलम्। किन्त्वाभरणत्वज्ञानजन्यसुखस्य वस्तुतः प्रागप्राप्तस्य प्राप्तिः, सर्पभ्रमजन्यदुःखस्य वस्तुतः प्रागनिवृत्तस्य निवृत्तिर्वा। नह्युपदेशेन मणिः प्राप्तः, सर्पो वा निवृत्त इत्यनुभवः। किन्तु, प्राप्तिज्ञानात् भ्रमो निवृत्त इति। नच प्रकृते प्राप्तस्वरूपसुखादन्यत् प्राप्यसुखम्, नित्यनिवृत्ताविद्याभ्रमदुःखादेरन्यत् निवर्त्यं वास्ति येन सप्रयोजनता स्यादिति दूषणमुक्तम्'' इति चन्द्रिकोक्तं दूषणमुपपाद्य 'तदसत्' इति प्रजल्प्य यदुक्तम् 'प्राप्तमणिप्राप्तिर्न फलमित्यत्र प्राप्तेर्मणिनिष्टस्वत्वादिरूपत्वे इष्टापत्तिः। तत्साक्षात्काररूपत्वे च कण्ठे मणिरस्तीत्युपदेशस्य सा कथं न फलम्? स्वत्वादिवत् तद्विशिष्टसाक्षात्कारोऽपि प्राप्तिशब्दार्थः। उपदेशानन्तरं साक्षात्कृतमणीनां व्युत्पन्नानामपि, मणिः प्राप्त इति प्रयोगदर्शनात्।

प्राप्तिज्ञानजन्यसुखस्य वस्तुतः प्रागप्राप्तस्येत्यसदेव। अस्मन्मते सुखमात्मैव। चन्दनादियोगजन्यवृत्तेस्तत्राभिव्यञ्जकत्वमात्रमिति तस्य नित्यप्राप्तत्वेन वस्तुतः प्रागप्राप्तेरभावात्। त्वयापि हि चन्द्रिकायां जिज्ञासाधिकरणे- नापीहामुत्रार्थभोगविरागः सम्भवति। विवरणे, विषयैरपि नित्यमात्मस्वरूपमेव सुखमभिव्यज्यते। नतु जन्यं सुखमस्ति- इत्युक्तत्वेन तद्विस्मरणेन 'प्राप्तिज्ञानजन्यसुखस्य वस्तुतः प्रागप्राप्तस्य' इत्यस्य वक्तुमशक्यत्वात्। मण्यप्राप्तिभ्रमजन्यदुःखस्य प्रागनिवृत्तिस्य निवृत्तिः फलमित्यपि न सत्। तादृशदुःखनिवृत्तेः पूर्वसिद्धाधिष्ठानात्मस्वरूपत्वेन तादृशदुःखस्य वस्तुतः प्रागनिवृत्तत्वासिद्धेः कथं तन्निवृत्तेः

फलत्वम् ? यदि च तन्निवृत्तित्वेन तस्य फलत्वं तर्हि ब्रह्माप्राप्तिभ्रम-जन्यदुःनिवृत्तेरपि तत्वेन वेदान्तजन्यब्रह्मज्ञानफलकता किं न स्यात्'' (पु.२७४) इत्यनेन तदसत् । प्राप्तेः स्वत्वरूपत्वे प्राप्तमणिप्राप्तिर्नाम स्वत्वविशिष्टमणिस्वत्वं फलम्, इत्युक्तं स्यात् । तच्च न सम्भवति । मणौ स्वत्वस्य पूर्वमेव सिद्धत्वेन साध्यत्वाभावात् । स्वत्वविशिष्ट-मणिस्वत्वस्य फलत्वासम्भवेन तत्रेष्टापत्तेरयोगात् । परकीयधन-साक्षात्कारेऽपि 'धनं मया प्राप्तम्' इति व्यवहाराभावेन साक्षात्कारस्य प्राप्तिशब्दार्थत्वाभावेन साक्षात्कारोऽपि प्राप्तिशब्दार्थ इत्यसङ्गतम् । नच साक्षात्कृतमणीनां व्युत्पन्नानामपि, मणिः प्राप्त इति प्रयोगदर्शनात् साक्षात्कारस्य प्राप्तिशब्दार्थत्वमिति वाच्यम् । तेषां तथाविधप्रयोग-दर्शनस्य, तेषां व्युत्पन्नत्वस्य च त्वदनुभवैकवेद्यत्वात् । त्वन्मते सुखस्याजन्यत्वेऽप्यभिव्यज्यमानत्वाङ्गीकारेण प्रागप्राप्तस्य प्राप्तिरित्यस्य प्रागनभिव्यक्तस्य सुखस्याभिव्यक्तिरित्यर्थाङ्गीकारात् । प्रागप्राप्तस्य प्राप्तिरित्यपि साधु । 'तादृशदुःखनिवृत्तेः पूर्वसिद्धाधिष्ठानात्मरूपत्वेन' इत्यप्यसङ्गतम् । तथा सति ब्रह्मण अभावस्वरूपत्वापत्त्या तथाऽङ्गी-कर्तुमशक्यत्वात् । दुःखनिवृत्तेः जन्यतया तस्याः नित्यात्मस्वरूपत्वा-सम्भवाच्च ।

'यदि च' इत्यारभ्य 'किं नस्यात्' इत्यन्तमप्यसङ्गतमेव । त्वया दुःखादिप्रपञ्चस्य वेदान्तजन्यब्रह्मज्ञाननिवर्त्यत्वाङ्गीकारेण दुःखनिवृत्तेः तथाविधब्रह्मज्ञानफलत्वस्यैव प्राप्त्या किं न स्यादित्युक्तेरनवकाशात् । नच, दुःखनिवृत्तेरात्मस्वरूपतया नित्यसिद्धत्वेन न तथाविध-ब्रह्मज्ञानफलत्वं दुःखनिवृत्तेरित्यभिप्रायेण तथोक्तिरिति वाच्यम् ।

अविद्यानिवृत्तिरूपमोक्षस्यापि त्वन्मते आत्मरूपतया मोक्षस्यापि तथाविधब्रह्मज्ञानफलत्वानुपपत्तेः । यद्यविद्यानिवृत्तित्वेन मोक्षस्य तत्फलत्वं तर्हि दुःखनिवृत्तावपि तथा वक्तुं शक्यत इति सममेव ।

''यदपि चन्द्रिकायाम् ,

'स्वप्रभत्वादसन्दिग्धेऽवाच्यत्वाच्छ्रुत्यगोचरे ।
निर्विशेषे च चिन्मात्रे कथं श्रुतिसमन्वयः ॥'

इत्युक्तं तदपि जिज्ञासासूत्रे विस्तरतः प्रत्युक्तम् । ईक्षत्यधिकरणे च निराकरिष्यामः'' (पु.२७६) इति यदुक्तं तदप्यनुपपन्नभाषणमेव । ब्रह्मण्यसन्दिग्धत्व -अवाच्यत्व-श्रुत्यगोचरत्व-निर्विशेषत्वादिकान् प्रसाध्य तत्र श्रुतिसमन्वयस्यासाधितत्वात् तथा साधनस्य गीर्वाणगुरूणामप्यशक्यत्वाच्च । अत एवेक्षत्यधिकरणे च निराकरिष्याम इति प्रतिज्ञाऽपि वन्ध्यैव ।

''यदपि चन्द्रिकायाम्- अपिच,

आद्यसूत्रेऽहमर्थे हि प्रसिद्धिरुपपादिता ।
जिज्ञासार्थं द्वितीये च जगज्जन्मादिहेतुता ।
अविद्यमानाहमर्थे तु लक्षणत्वेन कीर्तिता ।
ईश्वरस्य, तृतीये तु निर्विशेषप्रमाणता ।
शास्त्रस्योक्ता, चतुर्थे तु तस्मिन्नेव समन्वयः ।
प्रतिज्ञातोऽन्तरित्यादौ सविशेषं तु कथ्यते ।
ब्रह्मेति मायिनां पक्षस्तत्र किं केन सङ्गतम् ।
तत्वविद्वेषमात्रेण श्रुतिसूत्रे कदर्थिते ॥''

इति चन्द्रिकामुपपाद्य यदुक्तम् 'इति विरोधोद्भावनं तद्विरोधाभावेऽपि

स्वस्यैवाद्वैतवादविद्वेषमूलकम्' इति । तदेव द्वैतवादविद्वेषमूलकम् । तथाहि- 'कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्धर्माणाम्' इत्यादिना, स्वभाष्यमुपपाद्य यदुक्तम् 'जीवस्य यत्पारमार्थिकं रूपं ब्रह्म तस्यैवानौपाधिकरूपेण जिज्ञासाया उक्तत्वेन' इति तदसङ्गतम् । नहि तस्य मिथ्यारूपेण प्रसिद्धिः सत्यानौपाधिकरूपेण जिज्ञासाहेतुः । सत्यतद्वृत्तिसामान्यधर्मेण प्रसिद्धः तद्धर्मव्याप्यसत्यधर्मेण जिज्ञासाहेतुत्वस्यैव लोके दृष्टत्वात् । अतः देहेन्द्रियाध्यासोपयोग्यौपाधिकरूपेणास्मत्प्रत्ययरूपप्रसिद्धिमादाय ब्रह्मण अनौपाधिकरूपेण जिज्ञासोपपादनमदृष्टचरमेव ।

यदुक्तम्, 'अस्य च प्रतीयमानजैवरूपव्यावृत्तत्वेन जिज्ञास्यत्वायाहमर्थावृत्तिलक्षणस्यौपाधिकस्योपलक्षणतया व्यावर्तकस्याभिधानेनौपाधिकरूपेण जगत्कारणत्वाद्युपलक्षित एव शास्त्रप्रामाण्यं पूर्वाधिकरणे प्रदर्शितमस्मिन्नधिकरणे समर्थ्यते' इति तदप्यनुपपन्नम् । यस्य जिज्ञास्यत्वं तस्य लक्षणाभिधानस्य सन्दर्भशुद्धतया जैवरूपव्यावृत्तत्वेन शुद्धचितः जिज्ञास्यत्वाय शुद्धचैतन्यावृत्तिलक्षणाभिधानस्य सन्दर्भविरुद्धत्वात् । जगज्जन्मादिकारणत्वलक्षणस्य च शुद्धचैतन्यावृत्तित्वेन तदङ्गीकारात् ।

'अहमर्थावृत्तिलक्षणस्य' इत्यपि न सत् । शुद्धचैतन्यावृत्तित्वेनाङ्गीकृतस्य कारणत्वस्याहमर्थरूपविशिष्टचैतन्यावृवित्वस्याप्यङ्गीकारे वृत्तित्वविशेषाभावकूटेन तथाविधलक्षणस्य वृत्तित्वसामान्याभावापत्तेः । 'जगत्कारणत्वाद्युपलक्षित एव शास्त्रप्रामाण्यम्' इत्यप्यसङ्गतम् । यदा कदाचित् सम्बन्धवतः तदुपलक्षितत्वेन यदा कदाचिदपि कारणत्वस्य शुद्धचैतन्यसम्बन्धाभावेन शुद्धचितस्तदुपलक्षितत्वायोगात् ।

'शास्त्रप्रामाण्यम्' इत्यप्यसङ्गतम्। धर्मविनिर्मोकेण धर्मिबोधकत्वस्य काप्यदर्शनेन शुद्धचैतन्यबोधकत्वासम्भवात्। कारणत्वाद्युपलक्षणबोधने तात्पर्ये मिथ्याभूतबोधकत्वप्राप्त्या शास्त्रेऽप्रामाण्यस्यैव प्राप्तेः। 'पूर्वाधिकरणे प्रदर्शितम्' इत्यपि न सत्। तस्यैवाभावात्। अत एव 'ईक्षत्यधिकरणे समर्थ्यते' इत्यनुपपन्नमेव। सत एव समर्थनम्, नत्वसत इति 'उक्त-लक्षणातिव्याप्तिवारणायोक्तं गतिसामान्यमानन्दमयाधिकरणमारभ्य स्फुटीक्रियते' इत्यप्यनुपपन्नमेव । नह्यसम्भविनः लक्षणस्यातिव्याप्ति-वारणाय यत्नः क्रियते केनचित् प्रेक्षावता।

'अन्तस्तद्धर्माधिकरणादौ च प्रसङ्गात् प्रकृतब्रह्माश्रितोपासना निरू-प्यते' इत्यप्यसङ्गतमेव। ब्रह्माश्रितोपासनेत्यत्र ब्रह्माश्रितानामुपासनेति षष्ठी वोत ब्रह्माश्रिता च सा उपासना चेति कर्मधारयः ? नाद्यः। ब्रह्मणः त्वया निर्धर्मिकत्वाङ्गीकारेण ब्रह्माश्रितधर्माणामप्रसिद्धेः। न द्वितीयः। ब्रह्मविषयकोपासनायाः ब्रह्माश्रितत्वायोगात्। एवमसङ्गतौ जागृत्यां काप्यसङ्गत्याभावादिति तु देहोपरि प्रज्ञाशून्यस्य जल्पनमेवेति दिक् ।

समन्वयनये-

'भूयाद् रघुनाथस्य सन्मुदे।
कृतिरेषा भगवतः पादमूले समर्पिता ॥'

इति पद्यमसङ्गतम्। नहि कृतौ सन्मोदप्रयोजकधर्माणामभावे भूयादि-त्याशीर्वचनमात्रेण मोदो भवति। कृतेः भगवतः पादमूले समर्पणमप्यनुपन्नं विशिष्टचेतनस्य मिथ्यात्वेन तत्पादमूलसमर्पणस्य व्यर्थत्वात् शुद्धचैतन्यस्य त निराकारत्वेन पादाभावादिति सर्वमनवद्यम् ॥ छ ॥

॥ श्रीमदानन्दतीर्थार्यहृत्कमलनिवासिने श्रीमद्बादरायणाय मङ्गलम् ॥

अथ ईक्षत्यधिकरणम्

॥ ॐ ईक्षतेर्नाशब्दम् ॐ ॥

(परोक्ताधिकरणसाङ्गत्यविमर्शः)

यदत्रोक्तं परेण 'अथातो ब्रह्मजिज्ञासेत्यत्र भोक्त्रात्मनोः यत्पारमार्थिकं रूपं ब्रह्मेति निखिलवेदान्तेषु प्रसिद्धं तद्विचार्यमित्युक्तम्। तदेव च स्वरूप-तटस्थलक्षणाभ्यां जन्माद्यस्य यत इति सूत्रेण प्रतिपादितम्। तत्रैव तृतीय-सूत्रेण शास्त्रैकसमधिगम्यत्वमुक्तम्। तत्तु समन्वयादित्यत्र च शास्त्र-तात्पर्यगोचरत्वरूपं शास्त्रैकसमधिगम्यत्वं सिद्धस्य वस्तुनः प्रमाणान्तर-गोचरत्व-निष्फलत्वनैय्यत्यान्न सम्भवतीत्याक्षिप्य समाहितम्। इदानीं स एव प्रागुक्तसमन्वयः परपक्षप्रतिक्षेपपूर्वकमनेनाधिकरणेन दृढीक्रियते' इति, तदयुक्तम्। 'यतो वाचो निवर्तन्ते' इत्यादिश्रुत्या पारमार्थिकरूपस्य ब्रह्मणः सर्वथा वागगोचरत्वस्य त्वयाऽङ्गीकृततया तस्य वेदान्तेषु प्रसिद्ध-त्वोक्तेरसङ्गतत्वात्। कारणत्वस्य तटस्थलक्षणत्वस्य, आनन्दादेः स्वरूपलक्षणत्वस्य च पूर्वं निराकृततया तथाविधलक्षणाभ्यां प्रतिपादित-मित्यस्याप्यसङ्गतत्वात्। सर्वथा वागगोचरे निर्विशेषे ब्रह्मणि शास्त्रैक-समधिगम्यत्वं समाहितमित्यस्याप्ययुक्तत्वात्। एवं स्वपक्षस्यातिदुष्टतया शिथिलत्वेन तद्दृढीकरणप्रतिज्ञाऽपि वन्ध्यैवेति।

(परोक्ताधिकरणार्थविमर्शः)

यदुक्तम् 'अत्र च सदेव सौम्येदमग्र आसीदित्यादिवेदान्तवाक्यानि जगत्कारणत्वेन प्रधानमेव प्रतिपादयन्त्युत ब्रह्मेति। तदर्थं चोक्तविधं जगत्कारणत्वं प्रधानादावेव सम्भवत्यथ ब्रह्मण्येवेति संशयः। तद्बीजं च

वादिविप्रतिपत्तिः । पूर्वपक्षस्तु कारणत्वेन वेदान्तप्रतिपाद्यं प्रधानमेव । तत्रैव कारणत्वोपपत्तेः । न ब्रह्म । तस्य कर्तृत्वोपयोगिज्ञानाश्रयत्वाभावात् । तथाहि- ब्रह्मण्यङ्गीक्रियमाणं ज्ञानं नित्यमनित्यं वा । नाद्यः । त्वया ब्रह्मातिरिक्तनित्यज्ञानानभ्युपगमादत्यन्ताभेदे आश्रयाश्रयिभावानुपपत्तेश्च । न द्वितीयः । सत्त्वगुणपरिणामविशेषस्य तस्य निर्गुणे निर्विकारे च परमात्मन्यसम्भवात् ।

यद्यपि प्रधानेऽपि न ज्ञानाश्रयत्वमिति सम्भवति । तथापि ज्ञानाकारेण परिणामिसत्त्वगुणात्मकत्वात् युज्यते तत्र सर्वज्ञत्वेन व्यवहारः । परमात्मनि तु तादृशज्ञानानुकूलशक्तिमद्गुणाभेदशून्यत्वादुक्तरीत्या सर्वज्ञत्वं दुरुपपादम् । तस्मात् प्रधानमेव कारणवाक्यप्रतिपाद्यमिति पूर्वपक्षे, सिद्धान्तस्तु जगत्कारणतया वेदान्तप्रतिपाद्यं नाशब्दशब्दितं प्रधानम्, ईक्षतेः= ईक्षणात् । न चेक्षणं ब्रह्मण्यनुपपन्नमिति वाच्यम् । मायापरिणामवृत्तिविशेषस्य तस्य ब्रह्मण्यपि सम्भवात्' इत्यादिना, तत्रोच्यते । पूर्वपक्षे तावद् ब्रह्मणः कारणत्वं न सम्भवति । कर्तृत्वोपयोगिज्ञानाश्रयत्वाभावादिति चानुपपन्नम् । शास्त्रयोनित्वसूत्रे वेदकर्तृत्वोक्त्या ब्रह्मणः सार्वज्ञस्य साधितत्वात् ।

नच, ब्रह्मणः निर्विकारत्वेन सत्त्वगुणपरिणामविशेषस्य जन्यज्ञानस्यासम्भवेन नित्यज्ञनेनैव सार्वज्ञ्यं वक्तव्यम् । तत्तु न सम्भवति । अभेदे आश्रयाश्रयिभावाभावात् । अतः कर्तृत्वोपयोगिज्ञानाश्रयत्वाभावात्, इति चोपपन्नमिति वाच्यम् । आनन्दादेः ब्रह्मस्वरूपलक्षणत्वकथनावसरे पूर्वं त्वयाऽभेदेऽप्याश्रयाश्रयिभावस्य स्वीकृतत्वात् ।

सिद्धान्तोऽप्ययुक्तः । प्रधानस्याशब्दत्वाभावेनाशब्दशब्दितत्वासम्भवात् । विस्तृत्वं चैतत् सुधायां जयतीर्थश्रीमच्चरणैः-

'नह्यशब्दत्वं प्रधानेऽङ्गीकारोऽत्यसौ'

इत्यनुव्याख्यानव्याख्यावसरे ।

किञ्च वेदान्तप्रतिपाद्यं पक्षीकृत्य तत्राशब्दशब्दितप्रधानत्वाभावसाधनमुपयुक्तं न भवति । साङ्ख्यैरपि प्रधानस्य वैदिकत्वाभ्युपगमेन शब्दवाच्यतयाऽशब्दशब्दितप्रधानत्वस्यात्यन्तासत्त्वेन प्रधानस्य जगत्कारणतया वेदान्तप्रतिपाद्यत्वेऽप्युक्तसाध्यस्य सिद्ध्या साङ्ख्यानां सिद्धसाधनता तव चार्थान्तरता स्यात् । नच प्रतियोगिन अप्रसिद्ध्याऽभाव अप्रसिद्ध इति वाच्यम् । अप्रामाणिकप्रतियोगिकाभावपक्षे प्रतियोग्यप्रसिद्धिरभावस्य भूषणमेव । प्रामाणिकप्रतियोगिकाभावपक्षेऽप्रसिद्धविशेषणतेति ।

नन्वत्राशब्दशब्दितप्रधानत्वसाध्याभावव्यापकीभूताभावप्रतियोगिप्रकृतहेतुमत्तापरामर्शादनुमितिसम्भवेन नेदमप्रसिद्धविशेषणत्वं दूषणम् इति चेन्न । द्वितीयाभावस्य प्रतियोगिस्वरूपतापक्षेऽभावाभावस्यातिरिक्तताग्रहदशायामुक्तपरामर्शस्याप्रयोजकत्वात् । तस्यातिरिक्तत्वपक्षे तु सुतरामप्रयोजकत्वमित्यप्रसिद्धविशेषणत्वस्य दूषणत्वादिति दिक् ।

अप्रसिद्धविशेषणताभियाऽशब्दशब्दितत्वप्रधानत्वोभयाभावसाधनमपि न सम्यक् । अशब्दशब्दितत्वाभावेनाप्युभयाभावरूपसाध्यसिद्ध्या पूर्वोक्तदोषानिवृत्तेः । नचेक्षत्याऽशब्दत्वं प्रधाने प्रसाध्य तेन हेतुना कारणतया वेदान्तप्रतिपाद्यत्वाभावसाधनमपि सम्यक् । ईक्षणाश्रयत्वस्य

चेतनधर्मतयाऽचेतनप्रधाने तस्यासम्भवेन स्वरूपासिद्धतयेक्षतेः प्रधानेऽशब्दत्वासाधकत्वात्। अशब्दत्वेन प्रधाने, कारणतया वेदान्तप्रतिपाद्यत्वाभावसाधनमपि न सम्भवति। प्रधानस्य शब्दवाच्यत्वाङ्गीकारेण पक्षे हेतोरभावात्।

'यत्तु चन्द्रिकायाम्' इत्युक्त्वा ''अन्ये तु 'सदेव सौम्येदमग्र आसीत्' इत्यादिकारणवाक्यं साङ्ख्यादिसिद्धाचेतनकारणानुवादीति प्राप्ते ईक्षणेन चेतनकारणताप्रापकमिति सिद्धान्त इत्याहुः' इत्यनेनास्मन्मतमनूद्य तत्र किं विशिष्टपरिणामित्वमेतद्वाक्यबोध्यमिति सिद्धान्त्यते, यद्वा कर्तृत्वं बोध्यमिति, किं वा शुद्धस्य भ्रमाधिष्ठानत्वं बोध्यत इति। नाद्यद्वितीयौ विशिष्टे सदादिवाक्योक्तसत्त्वाद्ययोगात्। पूर्वसूत्रेऽखण्डे समन्वयस्यैव प्रतिज्ञातत्वेनात्राखण्डस्यैव वक्तव्यत्वाच्च। द्वितीये वैय्यधिकरण्यं च। नहि प्रधानं परिणामीति प्राप्ते 'ब्रह्म कर्तृ' इति सिद्धान्तो युक्तः। अत एव न तृतीयः। प्रधानं परिणामीति प्राप्ते ब्रह्माधिष्ठानमित्यस्य व्यधिकरणत्वात्। कथञ्चिद्वैय्यधिकरण्येऽपि 'तदैक्षत, सेयं देवतैक्षत, नाम रूपे व्याकरोत्' इत्यादिकमयुक्तं स्यात्। तस्य लक्षणया चिन्मात्रपरत्वे च सर्वमपि लक्षणया प्रधानपरं स्यात्। सूत्रे ईक्षतेरिति हेतोरुक्तिश्च न स्यात्। नच तात्पर्याविषयेक्षणेन प्रधानस्य निरास इत्युक्तम्'' इत्यनेन चन्द्रिकोक्तदूषणमुपपाद्य 'अत्रेदं वक्तव्यम्' इत्यभिधाय यदुक्तम् 'प्रधानस्यानेकात्मकस्य परिणामसम्भवात् कारणत्वोपपत्तिः, मृदादिवत् नासंहतस्यैकात्मकस्य ब्रह्मणः, इति पूर्वपक्षभाष्ये कर्तृत्वोपयोगिज्ञानवत्तायाः, परिणामित्वोपयोगिसांशतायाश्च ब्रह्मण्यसम्भवप्रदर्शनेन तस्य कर्तृत्वमुपादानत्वं च द्वयमपि न सम्भवति। प्रधाने तु तदुपपद्यत इति

व्युत्पाद्य कारणतया वेदान्तप्रतिपाद्यं प्रधानमिति पूर्वपक्षपर्यवसाने प्राप्ते, प्रधानं न कारणतया वेदान्तप्रतिपाद्यम्, अशब्दत्वादिति सिद्धान्तः श्रीमद्भाष्यटीकादौ प्रदर्शितः। कथमत्रैतेषां भावत्काविकल्पानां स्वबुद्धि-कल्पितानामवकाशः'' (शां.पा.भू. पु.२८५) इत्यनेन, तदविचार-रमणीयम्। ब्रह्मणः कर्तृत्वोपयोगिज्ञानाश्रयत्वासम्भवेन पूर्वपक्षस्य, प्रधानस्याशब्दत्वेन कारणतया वेदान्तप्रतिपाद्यत्वाभावसमर्थनसिद्धान्तस्य च पूर्वपमेव निराकृततया पुनस्तन्निराकरणस्य पिष्टपेषणत्वात्। ब्रह्मणः परिणामित्वोपयोगिसांशताया असम्भवेन पूर्वपक्षोऽप्ययुक्तः। परि-णामित्वोपयोगिसांशतायाः सिद्धान्तेऽसाधनात्। नहि त्वयापि ईक्षति-सूत्रेण ब्रह्मणः परिणामित्वोपयोगिसांशत्वं साधितमित्यङ्गीक्रियते।

किञ्च कर्तृत्वोपयोगिज्ञानवत्तायाः शास्त्रयोनित्वसूत्रेणोपपादिततया तत एव कर्तृत्वस्य ब्रह्मणि सम्भवेन ब्रह्मणि कर्तृत्वमुपादानत्वं च द्वयमपि न सम्भवतीत्यप्ययुक्तमेव।

यदुक्तम् 'उपहितशुद्धयोस्तादात्म्येनोपहिते शुद्धधर्मसत्त्वाद्युपपत्त्या त्वदीयदूषणानवकाशात्' इति तदपि मन्दम्। विशिष्टस्य मिथ्यात्वेन शुद्धस्य सत्यतया तयोरैक्यासम्भवात्। नचोपहितमात्रं न मन्मते मिथ्या। वाक्यान्वयाधिकरणकल्पतरावुपहितसत्यतायाः स्पष्टमभि-धानादिति वाच्यम्। तथासति तत्त्वमसीति महावाक्ये विशिष्टचैतन्ये शुद्धचैतन्याभेदबोधसम्भवे त्वन्मते तत्त्वम्पदयोः द्वयोरपि लक्षणया चिन्मात्रपरत्वोपवर्णनस्यासङ्गत्यापत्तेः। नच कारणतया वेदान्त-प्रतिपाद्योपहितस्यैव शुद्धाभेदः, न सर्वत्र विशिष्टस्येति न तथोप-

वर्णनासङ्गतिरिति वाच्यम्। जगत्कारणतया वेदान्तप्रतिपाद्योपहितस्य शुद्धाभेदे किमपराद्धं तत्त्वमसीत्यत्र विशिष्टेन ?

किञ्च जगत्कारणत्वोपहितस्य शुद्धाभेदे जगत्कारणत्वस्य शुद्ध एव सम्भवेन 'जगत्कारणत्वं मायागतमेव ब्रह्मण्युपचर्यते' इति त्वदीयोक्तेर-सङ्गत्यापत्तेः।

एतेन 'ईक्षणादिरूपहेत्वसिद्धिशङ्काऽपि चन्द्रिकोक्ता निरस्ता। शुद्धा-भिन्ने कल्पिततद्भेदवत्युपहिते तत्सम्भवात्' (शां.पा.भू. पु.२८६) इति यदुक्तं तदप्यसङ्गतम्। उपहिते कल्पितस्य शुद्धभेस्य सत्यत्वं मिथ्यात्वं वा। आद्ये, उपहिते शुद्धाभिन्नत्वाङ्गीकरणमसङ्गतम्। द्वितीये, उपहिते शुद्धाभेस्य पारमार्थिकस्य प्राप्त्या शुद्धस्य निर्धर्मिकत्वेन परमार्थतो तदभिन्ने उपहिते ईक्षतिरूपधर्मासम्भवेन हेत्वसिद्धेर्दुर्वारत्वात्। नच शुद्ध एव स्वरूपेण धर्मसामान्याभावः, उपाध्यवच्छेदेनेक्षणं सम्भवतीति नेक्षण-हेतोः स्वरूपासिद्धिशङ्केति वाच्यम्। तदसम्बद्धस्य तद्वृत्तिधर्मान-वच्छेदकतया, उपाधेः शुद्धासम्बद्धशुद्धवृत्तीक्षणानवच्छेदकतया, उपाधेः शुद्धसम्बन्धस्यावश्यं वक्तव्यतया तादृशोपाधिसम्बन्धस्यापि शुद्धे उपाध्यवच्छेदेनैव वक्तव्यतया तस्याप्येवम्, तस्याप्येवमित्यनवस्थापत्तेः।

एतेन 'शुद्धे ब्रह्मण्येवोपाध्यवच्छेदेन जगत्कारणतास्वीकृता सा न व्याप्यवृत्तिः। 'कथं तर्हि शुद्धं न जगत्कारणमिति भावत्कप्रवादः ?' इति नाशङ्कनीयम्। शुद्धं ब्रह्म न जगत्कारणमित्यस्य ब्रह्मणि जगत्कार-णता नानवच्छिन्नवृत्तिकेति तदर्थात्' इति तु निरस्तम्। शुद्धं ब्रह्म न जगत्कारणमित्यतः शुद्धब्रह्मणि जगत्कारणता नानवच्छिन्नवृत्तिकेत्यस्य कथमप्यप्रतीतेश्च।

यदुक्तम् 'नच तात्पर्याविषयत्वमीक्षणस्य चन्द्रिकोक्तं साधु। तत्रावान्तरतात्पर्योपगमात्' इति तन्न साधु। धर्मसामान्यविधुरे शुद्धब्रह्मणीक्षणाश्रयत्वरूपधर्मस्यावान्तरतात्पर्योपगमस्याप्यशक्यत्वात्। शुद्धब्रह्मण्येवोपाध्यवच्छेदेनेक्षणं सम्भवतीति तत्र तात्पर्यं कल्पयितुं शक्यमिति तु निरस्तम् 'तदसम्बद्धस्य' इत्यादिना ग्रन्थेन।

'नचात्र सदेवेत्यादिवाक्यसमन्वयोक्तिश्चेदानन्दमयोऽभ्यासादितिवत् सदीक्षतेरिति सूत्रं स्यात्। प्रधानस्याशाब्दत्वनिरासमात्रं चेदिदमधिकरणं तन्निरासके चतुर्थपादे स्यात्, इति चन्द्रिकोक्तं दूषणमपि न साधु' इति प्रजल्प्य यदुक्तम् 'अशब्दशब्दितं प्रधानम्, न जगत्कारणतया वेदान्तप्रतिपाद्यम्, अशब्दत्वात्= कारणत्व-ज्ञानाबाध्यत्वरूपसत्त्व-स्वातन्त्र्यादिधर्मिनिर्देशकवैदिकसद्विद्यादिगतसदादिशब्दप्रतिपाद्यत्वाभावात्, इत्येकानुमानेनाभिहिते, 'तदसिद्धम्, सद्विद्यायामेव जगत्कारणतया प्रतिपाद्यं प्रधानमित्यवगमात्' इति शङ्कानिरासाय 'सद्विद्यायां जगत्कारणतया प्रतिपाद्यमानं न प्रधानम्, ईक्षतेः' इति पूर्वानुमानोक्तसामान्याभाव-[1]साधकविशेषाभावरूपहेतुसाधकमनुमानम्, इत्येतादृशानुमानद्वस्य विवक्षितस्य 'सदीक्षतेः' इति विन्यासेनालाभात्'' (पु.२८७) इति तदपि न साधु। अशब्दमित्यतः 'न विद्यते शब्दः वाचकतया यस्य' इति व्युत्पत्त्या शब्दवाच्यत्वसामान्याभावस्यैव बोधिततयोक्तविशेषाभावकूटस्य कथमप्यप्रतीतेः। अस्तु वाऽशब्दशब्देनोक्तविशेषाभाव-

१. प्रथमानुमानेन प्रधानस्य कारणत्वेन वेदान्तप्रतिपाद्यत्वाभावरूपः सामान्याभावः सिद्ध्यति। द्वितीयानुमाने तत्साधकः सद्विद्याप्रतिपाद्यत्वाभावरूपः विशेषाभावः सिद्ध्यति।

कूटस्य कथञ्चित् प्रतीतिः । तथापि 'सद्विद्यायां जगत्कारणतया प्रतिपाद्यमानं न प्रधानमीक्षतेः' इति द्वितीयानुमानस्य प्रधानत्वसामान्याभावसाधकस्य, वेदान्तप्रतिपाद्यत्वसामान्याभावे हेतुतयोपात्तसदादिप्रतिपाद्यत्वाभावकूटरूपविशेषाभावकूटसाधकत्वं न विद्वत्संसदि भासते साधुतया ।

किञ्च 'जगत्कारणतया प्रतिपाद्यमानं न प्रधानमीक्षतेः' इति द्वितीयानुमानेनैव विवक्षितस्य सर्वस्याप्यर्थस्य सिद्धावजागलस्तनायितस्य पूर्वानुमानस्य वैय्यर्थ्याच्च । एवञ्च पूर्वानुमानस्य वैय्यर्थ्यात् 'कारणवाक्ये जगत्कारणतया प्रतिपाद्यं सत्, न प्रधानम्, 'ईक्षतेः' इत्यनुमानस्य सदीक्षतेरिति सूत्रविन्यासेनापि लाभसम्भवेन सदीक्षतेरिति सूत्रं स्यादित्यापत्तेर्दुर्वारत्वात् ।

(स्वमते वाच्यत्वसाधने सूत्रविन्यासानुगुण्यसमर्थनम्)

यदुक्तम् ''ईक्षणीयत्वेन वाच्यत्वसमर्थनस्यैवास्मिन् सूत्रे अभिप्रेतत्वे 'वाच्यमीक्षतेः' इति सूत्रविन्यासेनापि तत्सिद्धेः 'ईक्षतेर्नाशब्दम्' इति गुरुसूत्रविन्यासः परमते निरभिप्राय एव'' (शां.पा.भू. पु.३०४) इति तदसत् । 'विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणम्' इत्युक्तेः प्रतिपक्षनिराकरणस्यापि कर्तव्यत्वेनोक्तविन्यासादरात् । नच वाच्यत्वस्योपपादनेऽपि प्रतिपक्षावाच्यत्वस्य प्रतिक्षेपलाभात् स्वपक्षसाधनमुखेन परपक्षप्रतिक्षेपसम्भवे तद्विपरीतानुसरणस्यायुक्तत्वादिति वाच्यम् । 'द्वौ नञौ प्रकृतमर्थं सातिशयं गमयतः' इति न्यायेन प्रकृतस्य वाच्यत्वरूपार्थस्येक्षणीयत्वरूपहेतुव्यापकत्वरूपातिशयविशिष्टस्य बोधनतात्पर्येण तथा सूत्रविन्यासात् ।

नच वाच्यत्वे ईक्षणीयत्वव्यापकत्वबोधस्याप्यप्रयोजकत्वमिति वाच्यम्। ईक्षणीयत्वमस्तु वाच्यत्वं मास्त्वित्यप्रयोजकताशङ्कानिरासाय वाच्यत्वरूपसाध्ये ईक्षतिरूपहेतुव्यापकताबोधस्य सप्रयोजकत्वात्। व्यापकत्वबोधे तु व्यापकाभावे व्याप्याभावस्यावश्यकतया वाच्यत्वाभावे ईक्षणीयत्वं न स्यादिति रूपानुकूलतर्कावतारेणाप्रयोजकताशङ्कानिरासात्। नच व्याख्यानतोऽपि व्यापकत्वप्रतीतिर्भविष्यतीति वाच्यम्। अन्तरङ्गज्ञापकाभावे एव हि बहिरङ्गस्यान्वेषणीयत्वात्।

यदुक्तम् ''किञ्चात्रावाच्यत्वव्यवच्छेद एव विवक्षितश्चेत् तर्ह्यसन्देहाय, यतो वाचो निवर्तन्त इति श्रुत्यैकार्थ्याय च नावाच्यमित्येव सूत्रकारो ब्रूयात्। नच तथासूत्रेण 'अशब्दम्' इति श्रुत्यैकार्थ्यालाभ इत्येकतरानुगमे कर्तव्ये विनिगमकाभावान्नाशब्दमिति विन्यासः न दुष्यतीति वाच्यम्। 'अशब्दमस्पर्शमरूपमव्ययम्' इत्यादिश्रुतौ स्पर्शादिगुणप्रायपाठात् अशब्दमित्यस्य शब्दरूपगुणनिषेधपरताया एव स्वरसत प्रतीतेरवाच्यत्वरूपविपक्षबोधकत्वाभावात् तदनुगमानावश्यकत्वात्। 'नास्ति शब्दो वाच्यतया यस्मिन्' इति व्युत्पत्त्या शब्दावाच्यत्वस्यापि फलतस्तदर्थतासम्भवतीति चेत् तथापि श्रुतिसूत्रयोर-शब्दमित्येनन 'शब्दगुणशून्यम्, शब्दावाच्यं वोक्तम्' इति संशयान्नाशब्दमिति सूत्रेणापि न ततो वाच्यत्वनिर्णय इत्यसन्देहाय नावाच्यमिति सूत्रेणैव विनिगमकसौलभ्यात्। अशब्दमिति साधारणादपि शब्दात् व्याख्यानतोऽपि विशेषार्थप्रतिपत्तिरिति चेत् किमनेन व्याख्यानसापेक्षेण ? तथाविधसूत्रेण न कण्ठतो वाच्यत्वशब्द एव कुतो न प्रयुक्तः ? इति, न किञ्चिदेतत्'' (शां.पा.भू. पु.३०४) इति तदपि न चारु। तथाहि, प्रत्यक्षाद्यवेद्यत्वे

सतीक्षणीयत्वरूपपरिशेषानुमानेन ब्रह्मणि वाच्यत्वसाधनस्यास्मिन् सूत्रेऽभिप्रेततया हेतुशरीरे सत्यन्तोपपादकतया 'ईक्षतेर्नाशब्दम्' इति सूत्रविन्यासस्यावश्यकत्वम् ।

ननु कथमेवं सूत्रविन्यासेन सत्यन्तोपपादनमिति चेत् श्रुणु । अशब्दमित्यस्यावृत्तिः 'तत्तु' इति पूर्वसूत्रादनुवर्तते। अशब्दमित्यत्र शब्द-शब्दस्य लक्षणया पञ्चतन्मात्रपरत्वम् । 'अशब्दमस्पर्शमरूपमव्ययं तथा रसं नित्यमगन्धवच्च' इति श्रुत्यनुरोधात् । लक्ष्यतावच्छेदकं रूपरसगन्ध-स्पर्शशब्दान्यतमत्वम् । तथाचाशब्दमित्यस्य शब्दादिगुणशून्यं तद-विषयश्चेति श्रुत्यभिप्रेतार्थः। एवञ्च स्वाश्रयत्व-स्वग्राहकेन्द्रियग्राह्यत्वान्य-तरसम्बन्धेन तथाविधान्यतमशून्यमिति पर्यवसितोऽर्थः। तत्र स्वाश्रयत्व-सम्बन्धेन तथाविधान्यतमनिषेधेन शब्दादिरूपानुमापकानां लिङ्गानां निषेधः। द्वितीयवसम्बन्धेन तत्तदिन्द्रियग्राह्यत्वनिषेधः। तथाच 'अशब्द-मस्पर्शमित्यादिश्रुत्योक्तान्यतरसम्बन्धेन शब्दाद्यन्यतमशून्यं तद् ब्रह्म, ईक्षतेः= ईक्षणीयत्वात्, नाशब्दं= न विद्यते शब्दः वाच्यतयेति व्युत्पत्त्याऽशब्दं= शब्दावाच्यं न' इति सूत्रार्थः । नच मानसप्रत्यक्षा-विषयत्वस्य तेनालब्धतयोक्तार्थकेनाशब्दपदेन प्रत्यक्षविषयत्वसामान्या-भावोपपादनं न भविष्यतीति वाच्यम्। परात्मनः परेण मनसा प्रत्यक्षायोगात् ब्रह्मप्रत्यक्षं मानसं त्वसम्भावितमेव । तथाचासम्भाव्यमानसप्रत्यक्षस्य ब्रह्मणः, लिङ्गावेद्यत्वे सति पञ्चेन्द्रियागाह्यत्वोक्त्याऽनुमानावेद्यत्वं प्रत्यक्षावेद्यत्वमुपपादितमेव अशब्दपदेन । इत्येवं परिशेषानुमाने प्रत्य-क्षाद्यवेद्यत्वे सतीति सत्यन्तविशेषणोपपादनरूपप्रयोजनसद्भावेन 'ईक्षतेर्नाशब्दम्' इति सूत्रविन्यासः। 'ईक्षतेर्नावाच्यम्' इति सूत्रविन्यासे

तु परिशेषानुमाने सत्यन्तविशेषणोपपादनरूपप्रयोजनालाभादेवं सूत्रणमिति दिक्।

(अवाच्यत्वपक्षे अनवस्थापरिशीलनम्)

'यदपि चन्द्रिकायां ब्रह्मणि लक्षणया ज्ञेयत्वाङ्गीकारसिद्धान्ते सत्यादिपदानां किं लक्ष्यमिति प्रश्ने वाचकब्रह्मादिपदेनैव तत् प्रतिवक्तव्यम्। प्रतिवचनेऽपि तस्य किं लक्ष्यमिति लक्षकब्रह्मादिपदोपादानेऽनवस्थेति। तथा ब्रह्मण अवाच्यत्वे लक्ष्यत्वानुपपत्तिः। वाच्यार्थसम्बन्धित्वेन ज्ञातस्यैव लक्ष्यत्वात्। तज्ज्ञानं च न शब्दभिन्नप्रमाणेन। ब्रह्मण उपनिषन्मात्रगम्यत्वात्। नापि स्वप्रकाशतया नित्यसिद्धे। शास्त्रवैय्यर्थ्यात्। अवाच्यशब्दस्य लक्षकस्यैव वक्तव्यत्वात्। तत्रापि वाच्यसम्बन्धित्वेन ज्ञेयत्वेऽनवस्था, इति दूषणमुक्तम्' इत्यनेन चन्द्रिकोक्तदूषणमुपपाद्य 'तदपि न सत्' इति प्रजल्प्य यदुक्तम् 'ब्रह्मादिपदेनैव ब्रह्मत्वादेरुपलक्षणत्वविवक्षया, सत्यादिपदानां किं लक्ष्यमिति प्रश्नप्रतिचवनोपपत्तेः प्रथमानवस्थायाः अयोगात्' इत्यादिना, (शां.पा.भू. ३०६) तदपि न सत्। सत्यपदेन किं लक्ष्यमिति प्रश्ने ब्रह्मत्वस्योपलक्षणत्वविवक्षयापि ब्रह्मेति प्रतिवचनं दातव्यं भविष्यति। तत्रापि, ब्रह्मेत्यत्र ब्रह्मपदवाच्यमिति वोत तत्पदलक्ष्यमिति ? नाद्यः। अनङ्गीकारात्। द्वितीये ब्रह्मपदलक्ष्यमेव सत्यपदेन लक्ष्यमित्यापातम्। तथाच ब्रह्मपदेन किं लक्ष्यमिति प्रश्नेऽन्यत् तादृशमेव वक्तव्यम्। एवमेवोत्तरत्रापीत्यनवस्थायाः सम्भवेन प्रथमानवस्थाऽयोगादित्युक्तेरेवायोगः।

यदुक्तम् 'नापि द्वितीयानवस्था। वाच्यसम्बन्धित्वेन ज्ञानं हि शक्यज्ञानाधीनलक्ष्योपस्थितावेवोपयोगि। तदभावेऽपि सत्यत्वादिविशिष्ट-

शक्तसत्यादिपदेभ्य एव शुद्धोपस्थितेः अखण्डवाक्यार्थबोधहेतुभूतायाः सम्भवेन तदपेक्षाया अभावेन नोक्तानवस्था । तथाहि, अद्वितीय-शुद्धब्रह्मजिज्ञापयिषता तत्प्रमार्थं प्रवृत्तानां सत्यादिपदानां सत्यत्वादि-विशिष्टे शक्तत्वेन तेभ्यः प्रथमतः विशिष्टस्यैवानुभूतत्वेन विशिष्टस्यैव संस्कारसत्त्वेऽपि सत्यादिपदज्ञानसहकृतसंस्कारस्य तात्पर्यानुरोधेन शुद्धस्मृतिहेतुत्वं कल्प्यते' (पु. ३०६) इत्यादिना तदप्यसङ्गतम् । सत्यादिपदेभ्यः प्रथमतः विशिष्टस्यैवानुभवो यद्यङ्गीक्रियते तर्हि तथा-विधानुभवेनैव 'सत्यं ज्ञानमनन्तम्' इत्यादिवाक्यात् शाब्दबोधसम्भवे अन्तरा शुद्धोपस्थितिकल्पनायां प्रयोजनाभावः ।

नच 'सत्यं ज्ञानमनन्तम्' इत्यादिवाक्याच्छुद्धविषयकशाब्दबोधेन भाव्यम्, तथाविधशाब्दबोधस्तु सत्यादिपदाधीनशुद्धोपस्थितिं विना न निर्वहति, शुद्धस्यैवोपस्थितेः शुद्धविषयकशाब्दहेतुत्वात् । अतः शुद्ध-स्योपस्थितिकल्पनमावश्यकमिति वाच्यम् । सत्यपदाधीनविशिष्टानुभवादेव शुद्धविषयकशाब्दबोधसम्भवात् । नचैतदप्रामाणिकमिति वाच्यम् । विशिष्टानुभवस्य शुद्धस्मरणहेतुत्वस्याप्यप्रामाणिकत्वात् ।

नच शक्तिवादे दशरथादिपदाधीनशक्तिग्रहोपपादनावसरे प्रमेयवान् इत्यनुभवजन्यसंस्कारस्य दशरथादिपदज्ञानसहकृतस्यैव शुद्धदशरथादि-स्मृतिहेतुत्वमुक्तमिति नाप्रामाणिकमिति वाच्यम् । दशरथादिपदज्ञान-सहकृतात् प्रमेयवानित्यनुभवजन्यसंस्कारात् प्रमेयत्वांशप्रमोषेणानायत्या स्वरूपतो दशरथत्वाद्यवगाहिदशरथाद्युपस्थितिरेवोपपादिता । नतु दशरथत्वादिकमपि परित्यज्य सर्वथा धर्मविनिर्मोकेण दशरथादिस्मृतिरिति न त्वदङ्गीक्रियमाणधर्मसामान्यानवगाहिब्रह्मोपस्थितेः दशरथाद्युप-

स्थितिदृष्टान्तता, वैषम्यात्। तथा च सर्वथा धर्मविनिर्मोकेण धर्म्युपस्थितेः कैश्चिदपि तान्त्रिकैरनङ्गीकृतत्वेनाप्रामाणिकतया शक्त्यैव शुद्धोपस्थितिरिति त्वयुक्तम्।

यदुक्तम् 'अथवा प्राचीनतार्किक-मीमांसकमतयोरिवास्मन्मते शक्यसम्बन्धरूपलक्षणाज्ञानस्य शाब्दबोधाहेतुत्वेन शक्योपस्थितिजन्यसम्बन्ध्युपस्थितेः लक्षणात्वेन स्वरूपसत्या एव तस्याः शाब्दबोधहेतुत्वेन नोक्तविरोध इति दिक्' (शां.पा.भू. पु.३०८) इति। तदपि न। एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति रीत्या पदार्थशक्तिरूपपदार्थसम्बन्धप्रकारेण पदज्ञानस्य शक्यार्थोपस्थितिहेतुत्वमिव लक्षणारूपपदार्थसम्बन्धप्रकारेण पदज्ञानस्य लक्ष्योपस्थितिहेतुत्वस्य वक्तव्यतया शक्यसम्बन्ध्युपस्थितेः लक्षणात्वेऽपि तत्प्रकारेण पदज्ञानस्यैव लक्ष्यार्थोपस्थितिहेतुत्वस्य न्यायतः प्राप्ततया लक्ष्यार्थोपस्थितावुक्तरूपलक्षणाज्ञानस्यावश्यमपेक्षिततया स्वरूपसत्याः लक्षणायाः पदार्थोपस्थितावनुपयोगेन ज्ञाताया एव तस्याः लक्ष्यार्थोपस्थितावुपयोगितयोक्तानवस्थादूषणस्य दुर्वारत्वात्। न च पदार्थोपस्थितौ ज्ञातायाः लक्षणायाः प्रयोजकत्वेऽपि शाब्दबोधे न तथा हेतुत्वमिति वाच्यम्। पदार्थोपस्थित्यसम्भवस्यैवोक्तत्वेन तदधीनशाब्दहेतुत्वस्य स्वरूपसत्या लक्षणाया दूरोत्सारितत्वात्। तस्माद् तद्ब्रह्म प्रत्यक्षाद्यवेद्यत्वे सतीक्षणीयत्वान्नाशब्दं= नावाच्यमित्येवार्थस्त्वीक्षतिसूत्रस्य सम्यगिति सर्वं स्वच्छम्॥

अथ आनन्दमयाधिकरणम्

॥ ॐ आनन्दमयोऽभ्यासात् ॐ ॥

(परोक्तपादभेदव्यवस्थापकविमर्शः)

'तत्र ब्रह्मणि पूर्वोक्तसंशयनिरासकोपक्रमादिलिङ्गप्रमाणक-वेदान्त-तात्पर्यलक्षणसम्बन्धरूपसमन्वयपरप्रथमाध्याये स्पष्टब्रह्मलिङ्गानां वाक्यानां प्रथमपादे समन्वयः, द्वितीयतृतीययोस्त्वस्पष्टब्रह्मलिङ्गानां वाक्यानां समन्वयः, तत्रापि प्रायः सविशेषवाक्यानां द्वितीये, प्रायः निर्विशेषवाक्यानां तृतीय इति विशेषः । चतुर्थे तु त्रिपाद्युक्तसमन्वयहेतुगतिसामान्य-समर्थनद्वारोक्तसमन्वयस्यैव प्रतिपादनं स्पष्टं चेदमग्रे करिष्याम इति पादोपाधिभेद इति श्रीमद्भाष्यतदीयटीकादौ स्पष्टम्' इति स्वमतमभिधाय यत्त्वित्यारभ्य ''चन्द्रिकायाम्- अन्ये तु इत्यादिनाऽऽहुरित्यन्तेनोक्त-पादोपाधिभेदाननूद्य 'तन्न यथा प्रथमेऽन्तस्तद्धर्मोपदेशादित्यादौ 'सैव ऋक् तत्साम तद्यजुः' इति सर्वात्मत्वस्य 'सर्वेभ्यः पाप्मभ्य उदितः' इति सर्वपापराहित्यस्य च ब्रह्मलिङ्गस्य स्पष्टता तथा द्वितीये सर्वत्र प्रसिद्धोपदेशादित्यत्र 'सर्वं खल्विदं ब्रह्म' इति जीवेष्वयुक्तस्य सार्वज्ञादेः, अत्ता चराचरेत्यत्र 'अन्यत्र धर्मादन्यत्राधर्मात्' इति पुण्यपापराहित्यादेः, अन्तरित्यत्र 'एतदमृतभमयमेद् ब्रह्म' इत्यमृतत्वादेः, अन्तर्यामीत्यत्र 'एष त आत्मा अन्तर्याम्यमृतः' इत्यमृतत्वादेः, अदृश्यत्वादिगुणक इत्यादौ 'यः सर्वज्ञः' इति सार्वज्ञादेः ब्रह्मलिङ्गस्य स्पष्टत्वात् । एवं तृतीये द्युभ्वादीत्यत्र 'अमृतस्यैष सेतुः', 'यः सर्वज्ञः' इत्यमृतसेतुसार्वज्ञादेः, भूमेत्यत्र 'यत्र नान्यत्पश्यति' इत्यद्वितीयत्वादेः, अक्षरमम्बरेत्यत्र 'अदृष्टं द्रष्टृश्रुतं श्रोतृ', 'अस्थूलमनणु' इत्यदृश्यत्वास्थूलत्वानणुत्वादेः

इक्षतिकर्मेत्यादौ 'परात्परम्' इति परात्परत्वादेः, ब्रह्मलिङ्गस्य स्पष्टत्वाच्च। वाक्यान्तरे ब्रह्मधर्मतया निर्णीतत्वं वा जीवादौ स्वारस्येनानुपपद्यमानत्वं वा स्पष्टत्वम्। न त्वस्वारस्येनापि जीवादावनुपपद्यमानत्वम्, विषयवाक्ये ब्रह्मधर्मतया निर्णीतत्वं वा जीवादिप्रापकलिङ्गराहित्यं वा। पूर्वपक्षानुदयापातात्। तच्च 'सर्वं खल्विदम्' इत्यादावस्ति।

नच सर्वत्र प्रसिद्धेत्यादेः 'मनोमयः प्राणशरीरो भारूपः' इत्यादिकमुदाहरणम्। तत्र च न ब्रह्मलिङ्गं स्पष्टम्। किन्तु 'सर्वं खल्विदम्' इत्युपक्रम इति वाच्यम्। प्रथमेऽप्यन्तरित्यस्योदाहरणे 'य एषोऽन्तः' इत्यत्र सार्वात्म्यस्य, ज्योतिश्चरणेत्यस्योदाहरणे 'यदतः परो दिवो ज्योतिः' इत्यत्रामृतत्वादेः, 'प्राणस्तथा' इत्यस्योदाहरणे 'प्राणोऽस्मि प्रज्ञात्मा' इत्यत्र हिततमत्वादेः, ब्रह्मलिङ्गस्याभावात्। द्वितीयपादादावपि 'य एषोऽन्तरक्षिणि पुरुषो दृश्यते एतदमृतमभयमेतद् ब्रह्म एष त आत्मान्तर्याम्यमृतः' इत्याद्युदाहरणवाक्य एवामृतत्वादेः स्पष्टत्वाच्च। यथा द्वितीये तृतीये समवेतव्यं मनोमयत्वादिकं न ब्रह्मणि स्पष्टम्, तथा प्रथमे समन्वेतव्यमादित्यस्थत्वमाकाशप्राणशब्दादिकं न ब्रह्मणि स्पष्टमिति दूषणमुक्तम्'' इत्यन्तेन। चन्द्रिकामुपपाद्य 'तद्भाष्यकारानभिप्रेतस्वकपोलकल्पितस्पष्टत्वास्पष्टत्वनिरुक्तिमात्रनिबन्धनम्' इति प्रजल्प्य यदुक्तम् 'यतो लिङ्गानां स्पष्टत्वं सम्भाव्यमानस्वारस्यजीवलिङ्गानभिभूतत्वम्, तादृशजीवलिङ्गाभिभूतत्वं चास्पष्टत्वम्। सम्भाव्यमानस्वारस्यत्वं च निर्णेय तात्पर्यकवाक्योपक्रमगतब्रह्मलिङ्गासमभिव्याहृतत्वमित्यादिना' (शां.पा.भू. पु.३२२-२३) तत्र विचार्यते। भाष्यकाराभिप्रायज्ञस्त्वं किं वदिष्यसि ? वद। ब्रह्मलिङ्गानामस्पष्टत्वं यदोक्तरूपं तदाऽसम्भवः।

ननु कथमसम्भवः ? मनोमयत्वादिनाऽभिभूतेषु सत्यसङ्कल्पत्वादिषु लक्षणसमन्वयसम्भवात्। तथाहि, सर्वत्र प्रसिद्धोपदेशादित्यत्र 'मनोमयः प्राणशरीरो भारूपः' इत्यादौ निर्णेय तात्पर्यके विषयवाक्ये श्रूयमाणस्य मनोमयत्वादेर्जीवलिङ्गस्य उपक्रमगतब्रह्मलिङ्गसमभिव्याहाराभावेन निर्णेयतात्पर्यकवाक्योपक्रमगतब्रह्मलिङ्गासमभिव्याहृतत्वप्राप्त्या निर्णेय-तात्पर्यकवाक्योपक्रमगतब्रह्मलिङ्गासमभिव्याहृतत्वरूपसम्भाव्यमान-स्वारस्यत्वसत्त्वेन तथाविधमनोमयत्वरूपजीवलिङ्गाभिभूततत्वस्य सत्यसङ्कल्पत्वादिषु सत्त्वादिति चेन्न। 'मनोमयः प्राणशरीरो भारूपः' इत्यतः पूर्वं 'सर्वं खल्विदम्' इत्यादौ सर्वात्मकत्वरूपब्रह्मलिङ्गश्रव-णान्मनोमयत्वरूपजीवलिङ्गस्य निर्णेयतात्पर्यकवाक्योपक्रमगतब्रह्म-लिङ्गसमभिव्याहृतत्वस्यैव सत्त्वात्। नच 'सर्वं खल्विदम्' इति वाक्यस्य पूर्वोत्तरपक्षयोः सम्प्रतिपन्नार्थकतया निर्णेयतात्पर्यकवाक्यत्वाभावात् मनोमयत्वरूपलिङ्गस्य सर्वं खल्विदमिति वाक्यगतसर्वात्मकत्वलिङ्ग-समभिव्याहृतत्वेऽपि निर्णेयतात्पर्यकवाक्योपक्रमगतब्रह्मलिङ्गासमभि-व्याहृतत्वाबाध इति वाच्यम्। पूर्वं निर्णेतुं योग्यस्यैव पश्चान्निर्णीतत्व-सम्भवेन 'सर्वं खल्विदम्' इत्यादेर्निर्णेतुं योग्यत्वाभावे निर्णीतत्वस्या-सम्भवेन निर्णेतुं योग्यत्वरूपनिर्णेयत्वस्यावश्यं वक्तव्यतया वाक्ये निर्णेय-तात्पर्यकत्वरूपविशेषणेन 'सर्वं खल्विदम्' इत्यादिवाक्याव्यावृत्तेः।

न चैतत्सूत्रनिर्णेयतात्पर्यकत्वं वाक्ये विशेषणम्। तथा च 'सर्वं खल्विदम्' इत्यादेः सामान्यतः निर्णेतुं योग्यत्वेऽप्येतत्सूत्रनिर्णेयतात्पर्य-कत्वाभावात् तद्व्यावृत्तिरिति वाच्यम्। एवंसति सूत्रान्तरनिर्णेय-तात्पर्यकवाक्योपक्रमगतब्रह्मलिङ्गसमभिव्याहृतजीवलिङ्गस्यैतत्सूत्र-

निर्णेयतात्पर्यकवाक्योपक्रमगतब्रह्मलिङ्गासमभिव्याहृतत्वेन पूर्वोक्त-जीवलिङ्गस्य सम्भाव्यमानस्वारस्यत्वापत्त्या सूत्रान्तरनिर्णेयतात्पर्यक-वाक्योपक्रमगतब्रह्मलिङ्गस्यापि पूर्वोक्ततथाविधजीवलिङ्गाभिभूतत्वप्राप्त्या पूर्वोक्ततथाविधब्रह्मलिङ्गस्याप्यस्पष्टब्रह्मलिङ्गत्वापत्तेः ।

किञ्च, निर्णेयतात्पर्यक-वाक्योपक्रमगत-ब्रह्मलिङ्गासमभिव्याहृतत्व-रूप-सम्भाव्यमानस्वारस्यघटकस्य ब्रह्मलिङ्गेत्यस्याप्यर्थोपवर्णनम् अशक्यमेव । नच ब्रह्मलिङ्गमित्यस्य जीवोपस्थित्यद्वारा ब्रह्मोपस्थापकम् इत्यर्थोपवर्णनमिति वाच्यम् । विशिष्टचैतन्यमेव जीवः । तथाच विशिष्ट-चैतन्योपस्थित्यद्वारा ब्रह्मोपस्थापकमित्युक्तं स्यादनेन । एवञ्च शुद्ध-चैतन्यस्य ब्रह्मणः निर्धर्मकत्वेन शब्दानां विशिष्टचैतन्योपस्थितिद्वारा शुद्धचैतन्योपस्थापकत्वस्य स्थूलतारारुन्धतीन्यायेन त्वयाभ्युपगमात् जीवोपस्थित्यद्वारा ब्रह्मबोधकलिङ्गानामप्रसिद्धिः ।

किञ्च 'मनोमयः प्राणशरीरो भारूपः' इत्यादौ निर्णेयतात्पर्यविषयक-वाक्ये श्रूयमाणस्य मनोमयत्वादेर्जीवलिङ्गस्य निर्णेयतात्पर्यक-वाक्योप-क्रमगतब्रह्मलिङ्गासमभिव्याहृतत्वमपि दुरुपपादम् । 'मनोमयः प्राणशरीरो भारूपः' इति निर्णेयतात्पर्यकविषयवाक्यस्योपक्रमे निरुक्तब्रह्मलिङ्ग-स्यासत्त्वेन तथाविधोपक्रमगतब्रह्मलिङ्गस्याप्रसिद्ध्या तथाविधब्रह्मलिङ्ग-समभिव्याहृतत्वरूपप्रतियोगिन अप्रसिद्धत्वेनाभावस्याप्रसिद्धत्वात् । नचाप्रामाणिकप्रतियोगिकाभावस्वीकर्तृणां वेदान्तिनां प्रतियोग्य-प्रसिद्धिरभावस्य न दूषणमिति वाच्यम् । तदनङ्गीकारपक्षे तस्याः दूषणत्वात् ।

किञ्च जीवब्रह्मभेदवादिनां सर्वेषामपि त्वत्प्रतिवादितया नैय्यायि-

कानामपि प्रतिवादित्वेन प्रामाणिकप्रतियोगिकात्यन्ताभाववादिनः तान् प्रति प्रतियोगिन अप्रसिद्धावप्यभावः प्रसिद्ध्यतीति वक्तुमशक्यत्वाच्च ।

नच जीवलिङ्गे निर्णेयतात्पर्यकवाक्योपक्रमगतब्रह्मलिङ्गासमभिव्याहृतत्वं च [1]स्वगतब्रह्मलिङ्गसमभिव्याहृतत्वसम्बन्धावच्छिन्नप्रतियोगिकनिर्णेयतात्पर्यकवाक्योपक्रमाभावरूपम् । तथाच 'मनोमयः प्राणशरीरो भारूपः' इति निर्णेयवाक्योपक्रमस्यैतत्सम्बन्धस्य व्यधिकरणसम्बन्धतयैतत्सम्बन्धावच्छिन्नप्रतियोगिकतथाविधोपक्रमाभाववत्त्वं जीवलिङ्गे मनोमयत्वे सम्भवतीति वाच्यम् । ब्रह्मलिङ्गमित्यस्य जीवाद्युपस्थित्यद्वारा ब्रह्मोपस्थापकमित्यर्थ इति त्वयोक्तत्वेन सम्बन्धकोटौ ब्रह्मलिङ्गस्य तथाविधस्य निवेष्टुमशक्यत्वात् । स्वोपस्थापकत्वस्वान्यजीवोपस्थापकत्वोभयसम्बन्धेन ब्रह्मविशिष्टलिङ्गत्वं ब्रह्मलिङ्गत्वमित्यभ्युपगम्य तथाविधब्रह्मलिङ्गत्वस्य सम्बन्धकोटौ निविष्टुं शक्यत्वेऽपि वृत्त्यनियामकसम्बन्धस्याभावप्रतिसयोगितावच्छेदकत्वाभावेनैतत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावनिवेशासम्भवात् । जीवोपस्थित्यद्वारा ब्रह्मोपस्थापकलिङ्गत्वस्य स्पष्टब्रह्मलिङ्गत्वरूपे सम्भवत्येतादृशगुरुतरप्रयासवैफल्याच्च ।

किञ्च जीवलिङ्गाभिभूतत्वमप्यत्राशक्यनिर्वचनमेव । तद्धि तद्ग्रहणकृतस्वग्रहणाभावकत्वमेव भवेत् । तत्तु न सम्भवति । मनोमयत्वस्य जीवलिङ्गस्य ग्रहणेऽपि सत्यसङ्कल्पत्वादिरूपब्रह्मलिङ्गग्रहणे बाधकाभावेन ब्रह्मलिङ्गग्रहणाभावस्य जीवलिङ्गग्रहणकृतत्वासम्भवात् । नचोपक्रमे मनोमयत्व-

१. स्वं= उपक्रमवाक्यम् । प्रकृतोपक्रमवाक्ये ब्रह्मलिङ्गस्याभावेन स्वगतब्रह्मलिङ्गसमभिव्याहृतत्वसम्बन्धेन तादृशोपक्रमाभावः सुलभः । संयोगेन रूपाभाववत् ।

रूपजीवलिङ्गस्य ग्रहणे तत्समभिव्याहृतानां सत्यसङ्कल्पत्वादिलिङ्गानां न ब्रह्मणि ग्रहणं सम्भवति। उपक्रमे जीवलिङ्गस्य जीववृत्तितया ग्रहणस्य तत्प्रकरणपठितानां सत्यसङ्कल्पत्वादिलिङ्गानां ब्रह्मवृत्तितया ग्रहणे बाधकत्वादिति वाच्यम्। अन्तःकरणावच्छिन्नचैतन्यस्यैव जीवतयैकस्मिन्नेव चैतन्ये स्वरूपेण सत्यसङ्कल्पत्वादिकमन्तःकरणरूपोपाध्यवच्छेदेन मनोमयत्वादिकमिति त्वदङ्गीकृततया स्वरूपेण सत्यसङ्कल्पत्वादि-ग्रहणस्योपाध्यवच्छेदेन मनोमयत्वादेर्ग्रहणस्य च सम्भवेन मनोमयत्वादि-ग्रहणकृतस्वग्रहणाभावकत्वरूपजीवलिङ्गाभिभूतत्वस्य ब्रह्मलिङ्गसत्य-सङ्कल्पत्वादावसम्भवादिति न किञ्चिदेतत्।

''यत्तु चन्द्रिकायाम्- 'यच्च द्वितीये सविशेषं तृतीये निर्विशेषम्' इति निरुक्तपादोपाधिभेदमनूद्य 'तदपि न। द्वितीयेऽपि 'सर्वत्र' इत्यत्र 'सर्वं खल्विदं ब्रह्म' इत्यविद्यादिसर्वभ्रमाधिष्ठानत्वरूपसार्वात्म्यादेः, 'अत्ता' इत्यत्र 'अन्यत्र भूताच्च भव्याच्च' 'महतो महीयान्' इति काल-त्रयातीत्वादेः 'अन्तः' इत्यत्र 'कं ब्रह्म खं ब्रह्म' इति पूर्णसुखत्वादेः 'अन्तर्यामी' इत्यत्र 'एष त आत्मा' इति जीवतादात्म्यादेः 'अदृश्य-त्वादि' इत्यत्र 'यत्तदद्रेश्यम्' इत्यदृश्यत्वादेः सविशेषेऽनुपपत्तेः। तृतीयेऽपि 'द्युभ्वादि' इत्यत्र 'तमेवैकं जानथ' 'यदा पश्यः पश्यते रुक्मवर्णम्' इति दृश्यत्वादेः, रूपित्वादेश्च 'भूमा' इत्यत्र 'एवं पश्यन्' इति सप्रकारक-ज्ञानविषयत्वादेः 'अक्षरम्' इत्यत्र 'अदृष्टं दृष्टृश्रुतं श्रोतृ' इति द्रष्टृत्वादेः, 'ईक्षति कर्म' इत्यत्र 'पुरुषमीक्षते' इति दृश्यत्वादेः, 'दहर' इत्यादौ 'सत्यकामः सत्यसङ्कल्पः' इति कामादेः निर्विशेषेऽनुपपत्तेश्च, इति दूषणमुक्तम्' इति चन्द्रिकोक्तदूषणमुपपाद्य तदविचाररमणीयमिति

प्रजल्प्य यदुक्तं 'स्वार्थविशेषणतया विवक्षितविशेषसमर्पकवाक्यत्वमेव सविशेषवाक्यत्वं, स्वार्थविशेषणतयाऽविवक्षितविशेषसमर्पकनिर्णय-तात्पर्यकवाक्यत्वं निर्विशेषवाक्यत्वमिह विवक्षितम्' (शां.पा.भू. पु. ३३२) इत्यादिना तदसत्। त्वया सविशेषवाक्यत्वेनाभिमते 'मनोमयः प्राणशरीरो भारूपः' इत्यत्राप्यसत्त्वात्।

यदत्र सविशेषवाक्यत्वोपपादनार्थमुक्तम् ''तथाहि- सर्वत्र प्रसिद्धोप-देशादित्यत्र 'स क्रतुं कुर्वीत' 'मनोमयः प्राणशरीरो भारूपः' इत्यस्यैव निर्णयतात्पर्यकता। तस्य च मनोमयत्वादिगुणकब्रह्मोपासनपरतया मनोमयत्वादिनोपास्य ब्रह्मरूपे वाक्यार्थे मनोमयत्वादीनां विशेषणानां तद्बोध्यानां विशेषणतया विवक्षितत्वात् तत्र निरुक्तसविशेषवाक्यत्वम्' इति तन्न। ब्रह्मणि मनोमयत्वादीनां विशेषणत्वे विशिष्टस्य ब्रह्मणः तव मिथ्यात्वेन मिथ्याभूतस्योपासनायाः निष्प्रयोजनतयाऽस्य वाक्यस्य मनोमयत्वादिगुणकब्रह्मोपासनपरत्वासम्भवात्।

नच मिथ्याभूतविशिष्टब्रह्मोपासैव शुद्धब्रह्मसाक्षात्कारहेतुः। स्थूल-तारामरुन्धतीत्वेनोपदेशस्य तन्निकटवर्त्यरुन्धतीसाक्षात्कारहेतुत्वमिवेति वाच्यम्। तत्रारुन्धतीव्यतिरिक्तायाः प्रत्यक्षसिद्धायाः स्थूलतारायाः सत्त्वेन तत्र स्थूलतारायामरुन्धतीत्वेनोपदेशस्य तन्निकटवर्त्यरुन्धतीसाक्षात्कार-हेतुत्वस्य कथञ्चित् सम्भवेऽपि प्रकृते न तथा सम्भवति। ब्रह्मण्येवान्तः-करणरूपोपाध्यवच्छेदेन मनोमयत्वाद्यङ्गीकारात् मनोमयत्वेनोपदेश्य-स्यान्यस्याभावात्। पश्चात् 'नेयमरुन्धती' इत्युपदेश इव मनोमयत्वेनोप-देश्यस्य ब्रह्मणः 'नेदं ब्रह्म' इत्युपदेशस्याभावाच्च स्थूलतारारुन्धती-न्यायस्यैतद्दृष्टान्तत्वासम्भवात्।

किञ्च 'सर्वत्र प्रसिद्धोपदेशात्' इत्यस्मिन् सूत्रे 'सर्वं खल्विदं ब्रह्म' इत्यादिवाक्यानामविद्यादिसर्वभ्रमाधिष्ठानत्वरूपसर्वात्मकत्वप्रतिपादकानां विषयवाक्यत्वमस्ति न वा । आद्येऽस्मिन्नधिकरणे एतेषां वाक्यानां समन्वेतव्यतया न्यायतः प्राप्ततया सविशेषासम्भाव्यमानसार्वात्म्यादि-लिङ्गकानां 'सर्वं खल्विदं ब्रह्म' इति वाक्यानामत्र समन्वये निर्विशेषब्रह्म-परवाक्यानामेव समन्वयस्य प्राप्त्या 'द्वितीये सविशेषवाक्यानामेव समन्वयः' इत्यस्याभावात् । द्वितीये 'सर्वं खल्विदं ब्रह्म' इत्यादिवाक्यानां ब्रह्मणि समन्वयार्थमधिकरणान्तरं प्रसज्येत । न तथाऽधिकरणान्तरमस्तीति ।

किञ्चैकैकस्मिन्नधिकरणे एकैकवाक्यस्य समन्वय इत्यङ्गीकारे शास्त्रा-पर्यवसानापत्तेश्च । सूत्राणां विश्वतोमुखत्वाभावापाताच्च ।

एतेन 'मनोमयः प्राणशरीरो भारूपः' इति विषयवाक्यप्रतिपाद्ये निरुक्तवाक्यार्थे 'सर्वं खल्विदम्' इत्याद्यर्थस्य सर्वात्मत्वादेरसत्त्वेऽपि न क्षतिः । सर्वं खल्विदमित्यादिश्रुतीनां पूर्वोत्तरपक्षयोः सम्प्रतिपन्नार्थक-तया निर्णेयतात्पर्यकत्वाभावादिति च निरस्तम् । सर्वासां श्रुतीनां सूत्र-निर्णेयतया सूत्रान्तरनिर्णेयतया प्राप्तानां 'सर्वं खल्विदम्' इत्यादि-श्रुतीनामेतत्सूत्रनिर्णेयत्वस्याप्यनङ्गीकारे सूत्रनिर्णेयत्वसामान्याभावापत्तेः 'सर्वं खल्विदम्' इत्यादेः वाक्यस्य केनापि सूत्रेण निर्णेयत्वाभावे निर्णीतत्वाभावस्यैव प्राप्त्या पूर्वोत्तरपक्षयोः सम्प्रतिपन्नार्थकत्वं यदुक्तं तदसङ्गतमेव ।

किञ्च, तत्प्रतिपाद्ये निरुक्तवाक्यार्थे ब्रह्मण्येवोपाध्यवच्छेदेन मनो-मयत्वादेः, स्वरूपेण सर्वात्मतायाश्च त्वदङ्गीकृततया मनोमयत्वादिना

प्रतिपाद्ये तादृशवाक्यार्थे ब्रह्मणि सर्वात्मत्वादेरसत्त्वेऽपि न क्षतिरित्यप्यनुपपन्नमेव। एवमुत्तरत्रापि सविशेषवाक्यसमन्वयस्थले दूषणं ज्ञेयम्।

यदुक्तम् 'स्वार्थविशेषणतयाऽविवक्षितविशेषसमर्पकनिर्णेयतात्पर्यकवाक्यत्वं निर्विशेषवाक्यत्वम्' इति तदपि न। विशेषसमर्पकत्वं च विशेषविशेषणकबोधप्रयोजकत्वमेव नान्यत्। तथाच पूर्वं विशेषस्य स्वार्थविशेषणतयाऽविवक्षितत्वं प्रतिपाद्य इदानीं तथाविधविशेषणकबोधप्रयोजकत्वाङ्गीकारे व्याहतवचनत्वापत्तेः। यदि च स्वार्थविशेषणतयाऽविवक्षितविशेषसमर्पकमित्यस्य स्वार्थविशेषणतया विवक्षितविशेषसमर्पकान्यत्वमित्यर्थस्तूपवर्ण्यते। तर्हि तादृशनिर्विशेषवाक्यत्वस्य क्वाप्यसत्त्वम्। तथा हि- तृतीयेऽपि 'द्युभ्वाद्यायतनं स्वशब्दात्' इत्यत्र,

'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं सह प्राणैश्च सर्वैः।
तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथ॥'

इति विषयवाक्ये द्युभ्वाद्यायतनत्वरूपविशेषसमर्पकत्वस्यैव सत्त्वात्। नच 'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः' इत्यन्तप्रतिपाद्यस्य न विशेषणता। अपितूपलक्षणतया परिचायकतामात्रमिति वाच्यम्। यस्मिन्निति वाक्यस्योपलक्षणीभूत-द्युभ्वाद्यायतनत्वबोधे तात्पर्यमस्ति न वा। आद्ये तादृशवाक्यस्य द्युभ्वाद्यायतनत्वरूपविशेषसमर्पकत्वस्यैव प्राप्त्या स्वार्थविशेषणतया विवक्षितविशेषसमर्पकान्यत्वरूपनिर्विशेषवाक्यत्वाभावापत्तेः। द्वितीये धर्मविनिर्मोकेण धर्मिबोधस्य क्वाप्यदृष्टत्वेन यस्मिन्नित्यादिवाक्यात् द्युभ्वाद्यायतनत्वविनिर्मोकेण स्वरूपमात्रबोधस्य त्वदनुभवैकवेद्यत्वेनानादरणीयत्वात्।

(स्वाभिप्रेतपादभेदव्यवस्थापकपरिशीलनम्)

"यत्तु चन्द्रिकायाम्- 'अस्माकं नामसमन्वयपरे पादेऽन्तस्तद्धर्म इत्यत्र लिङ्गसमन्वय इन्द्राद्यनेकनामसमन्वयार्थः। तथा लिङ्गसमन्वय-परपादे वैश्वानरनाम्नः समन्वयः पाचकत्वाद्यनेकलिङ्गसमन्वयार्थ इति टीकायामेव वक्ष्यत इत्युक्तम्'' इति चन्द्रिकामुपपाद्य तदसदिति प्रजल्प्य यदुक्तम् 'टीकायामेव वक्ष्यत इत्येतस्मादेव पादोपाधिसाङ्कर्यानिवारणात्' इति। तत्तु श्रीमच्चन्द्रिकाचार्यश्रीमच्चरणेषु विद्वेषमूलमेव। तथाहि। इन्द्राद्यनेकनामसमन्वयप्रयोजनकसमन्वयप्रतियोग्यन्तस्थत्वरूपलिङ्गकत्वे सति नामसमन्वयपरत्वं नामपादोपाधिः। पाचकत्वाद्यनेकलिङ्गसम-न्वयप्रयोजनकवैश्वानरनामसमन्वयकत्वे सति लिङ्गसमन्वयपरपादत्वं लिङ्गपादोपाधिः। अयं विशेषः टीकावाक्यसरण्या स्वारस्येनैव प्रती-यते। अत एव टीकायामेव वक्ष्यत इत्युक्तं चन्द्रिकाचार्यैः। एवञ्च न नामपादलिङ्गपादोपाध्योः साङ्कर्यमिति।

यत्तु "चन्द्रिकायाम् 'यच्चोक्तं परैः, प्रधानाद्येव कारणतया सर्ववेदान्तार्थ इति लक्षणाऽसम्भवशङ्कायास्त्रिपाद्यां निरासः। चतुर्थपादे तु प्रधानमपि कारणतया वेदान्तैकदेशार्थ इत्यतिव्याप्तिशङ्कायाः निरासः' इत्युक्तार्थम् अनूद्य तन्न। आनुमानिकमित्यादौ पूर्वपक्षिणा यस्य 'महतः परमव्यक्तम्' 'अजामेकाम्' इत्यादेः प्रधानपरत्वं शङ्कितं तस्यैकदेशस्य सिद्धान्तेऽप्य-विद्यादिपरत्वेन ब्रह्मपरत्वाभावात्। अविद्यापरत्वे च ब्रह्मलक्षणस्य प्रधानातिव्याप्तिपरिहारेऽप्यविद्यायामतिव्याप्त्यपरिहारात्। तस्मात् परमते पादोपाधिभेदो न युक्तः।

नापि तत्क्रमः। सुबोधस्य प्राथम्ये, आनन्दमयादौ निर्विशेषविचारा-

योगात् । दुर्बोधस्य प्राथम्ये तु, स्पष्टब्रह्मलिङ्गानां प्राथम्यायोगात् । निर्विशेषस्य तृतीये निरूपणायोगाच्च । ईक्षत्यधिकरणोक्ताशब्दत्वस्य विक्षिप्य चतुर्थपादे व्युत्पादने हेत्वभावाच्च' इत्यनेन दूषणमुक्तम्'' इत्यनेन चन्द्रिकोक्तं दूषणमुपपाद्य तदसदिति प्रजल्प्य यदुक्तम् 'महतः परमित्यंशस्यास्मन्मते निर्विकारस्वरूपस्य परमात्मनो जगत्कर्तृत्वे सति जगदुपादानत्वरूपाभिन्ननिमित्तोपादानत्वनिर्वाहकाविद्यादिरूपौपाधिकानृतविकारनिर्वाहाय अवश्येष्यमाणानिर्वचनीयेश्वराय तत्कल्पितजगत्प्रागवस्थाश्रयाविद्या-मायाशक्त्यादिशब्दवाच्यार्थपरत्वेन साङ्ख्यमतसिद्धस्वतन्त्रप्रधानपरत्वाभावात्' (शां.पा.भू. पु. ३३६) इत्यादिना तदसत् । परमात्मनः जगत्कर्तृत्वे निर्दुष्टे लक्षणे सम्भवति जगदुपादानत्वस्य लक्षणशरीरे निवेशे प्रयोजनाभावः । लक्षणे तान्येव विशेषणान्युपादेयानि यैरतिव्याप्त्यसम्भवादयो दोषाः निराक्रियन्त इत्यत अप्रयोजनविशेषणघटितस्य लक्षणत्वायोगात् । नच अविद्यायामतिव्याप्तिः । सङ्कल्पपूर्वककामयितृत्वनियतकर्तृत्वलक्षणस्य अविद्यायामसम्भवस्य त्वयैवाङ्गीकृतत्वात् । जगदुपादानत्वविशेषणेनावरणाच्च ।

परमात्मनः जगत्कर्तृत्वे सति जगदुपादानत्वरूपाभिन्ननिमित्तोपादानत्वोक्तिरप्यसङ्गतैव । यस्य यन्निरूपितनिमित्तकारणत्वं तस्य तन्निरूपितोपादानकारणत्वस्य कैश्चिदपि तान्त्रिकैरनङ्गीकृतत्वात् । नचाविद्यादुर्घटघटनाचतुरेति तद्बलात् परमात्मनः जगत्प्रति निमित्तकारणत्वमुपादानत्वं च सम्भवतीति वाच्यम् । त्वन्मते तदसम्भवस्य पूर्वम् असकृदुक्तत्वात् ।

किञ्च तथाविधलक्षणस्याविद्याकल्पितत्वे मिथ्यात्वप्राप्त्या मिथ्या-

भूतलक्षणाभिधानस्याप्रयोजनत्वात्। नच स्थूलतारारुन्धतीन्यायेन तथाविधलक्षणाभिधानस्य सप्रयोजनत्वमिति वाच्यम्। पश्चात् 'नेयमरुन्धती' इत्युपदेश इव 'नेदं जगत्कारणम्' इत्युपदेशस्याभावेन स्थूलतारारुन्धतीन्यायेन लक्षणाभिधानप्रयोजनस्य वक्तुमशक्यत्वात्। मुख्यतः मायागतमेव जगत्कारणत्वं ब्रह्मण्युपचर्यत इत्यङ्गीकृत्य जगत्कारणत्वं ब्रह्मणः तटस्थलक्षणमिति वदता त्वया तथाविधलक्षणस्य मायाशब्दवाच्याविद्याऽवृत्तित्वस्याङ्गीकर्तुमशक्यत्वाच्च ।

किञ्च, जगत्कर्तृत्वे सति जगदुपादानत्वरूपलक्षणस्यापि त्वन्मतेऽविद्योपादानकतया कार्यस्योपादानाश्रितत्वेन तथाविधलक्षणस्याविद्याश्रितत्वस्य न्यायतः प्राप्ततया तथाविधब्रह्मलक्षणस्याविद्यायाम् अतिव्याप्तिरूपदुरात्मनः दुष्परिहरत्वात्। एतेन 'सङ्कल्पपूर्वककामयितृत्वनियतकर्तृत्वघटितलक्षणस्य तादृशार्थेऽतिव्याप्तिप्रसक्तचभावात्' इत्यनेन तादृशलक्षणस्याविद्यातिव्याप्तिवारणं निरस्तम् ।

यदुक्तम् 'प्रथमपादे जन्माद्यस्य यत इत्याकाशादेः समस्तस्य जगतः जन्मादिकारणं ब्रह्मेत्युक्तं तस्य समस्तजगत्कारणस्य ब्रह्मणः व्यापित्वं नित्यत्वं सर्वज्ञत्वं सर्वशक्तिमत्त्वं सर्वात्मत्वमित्येवमादिजातीयका धर्मा उक्ता एव' इति भाष्यम्। तत्रोक्ता एवेत्यस्योक्ता इवेत्यर्थः। तथाच, कण्ठत अनुक्ता अप्यधिकरणसिद्धान्तन्यायेनोपक्षिप्ता एवेति फलितोऽर्थः। यत्सिद्धावर्थादन्यसिद्धिः सोऽधिकरणसिद्धान्तन्यायः। जगत्कर्तृत्वसिद्धौ सार्वज्ञ्यादिसिद्धिः तार्किकाणामपि सम्मतैव' इति। तदप्यनुपपन्नम्। जकत्करणत्वलक्षणस्य मायागतत्वाङ्गीकारात्। नहि मायागतेन जगत्कारणत्वेन ब्रह्मणः व्यापित्वनित्यत्वसर्वज्ञत्वसर्वशक्तित्वादयो धर्माः सिध्यन्ति। अतस्त्वदीयभाष्यस्य फलितार्थवर्णनमसङ्गतमिति ।

किञ्च, ब्रह्मणि जगत्कर्तृत्वस्याप्यज्ञानकल्पिततया मिथ्यात्वेन ब्रह्मणि मिथ्याभूतजगत्कर्तृत्वसिद्धौ सार्वज्ञादिसिद्धेरसम्भाच्च । यदस्मिन् विषये तार्किकाणां सम्मतिप्रदर्शनं तदपि न सङ्गच्छते । तार्किकाणां सार्वज्ञ्यस्य जगत्कर्तृत्वस्य च सत्यत्वेन सत्येन जगत्कर्तृत्वेन ब्रह्मणि सार्वज्ञसिद्धावपि तव मते न तथा सम्भवति । ब्रह्मणि जगत्कर्तृत्वस्य मिथ्यात्वात् ।

एतेन, यदुक्तम् 'तथाच प्रथपपादप्रतिपाद्यैः जगत्कारणत्वसार्वज्ञादिभिः द्वितीयतृतीयपादयोस्तेषां सिद्धवदुपन्यासेन सिद्धान्तकरणात् । द्वितीय-तृतीयपादयोः प्रथमपादस्योपजीव्यतया तयोश्च पूर्वापरीभावः सङ्गतिश्च । उपजीव्यस्य प्राथम्यमुपजीवकस्यानन्तर्यं च तन्त्रान्तरे सुप्रसिद्धमेवे-त्यस्मन्मतानुयायिभाष्यतदीयटीकाकारादिसम्मतम्' (शां.पा.भू. पु. ३३७) इति । तदपि निरस्तम् ।

किञ्च, प्रथमपादद्वितीयपादयोः पूर्वापरीभावनियामकप्रश्नस्य तयो-रुपजीव्योपजीवकभावसङ्गतिप्रदर्शनस्यानुत्तरत्वात् । नचोपजीव्यस्य प्राथम्यमुपजीवकस्यानन्त्यं तन्त्रान्तरे सुप्रसिद्धमेवेत्यनेनोपजीव्यत्वस्य प्राथम्यनियामकत्वमुपजीवकत्वस्यानन्तर्यनियामकत्वमुक्तमेवेति न प्रथमपादद्वितीयपादयोः पूर्वापरीभावनियामकप्रश्नस्योत्तरानभिधानमिति वाच्यम्। तर्कप्रकाशेऽनुमानपरिच्छेदे श्रीकण्ठेन 'उपजीवकं निरूप्याप्युप-जीव्यनिरूपणादुपजीवकत्वस्यानन्तर्यानियामकत्वेऽपि स्वतन्त्रेच्छस्येति न्यायेन पौर्वापर्यनियम इति ध्येयम्' इत्यनेनोपजीवकत्वस्यानन्तर्य-नियामकत्वं खण्डितमेवेति न तेनोपजीवकत्वेनात्र द्वितीयतृतीयपाद-योरानन्तर्यं तन्त्रान्तरसम्मत्या वक्तुं शक्यमिति । तथाच सुबोधस्य प्राथम्येत्यादि चन्द्रिकाचार्योक्तदूषणावकाशे महति सत्यपि नावकाश इति तु चन्द्रिकाचार्येषु विद्वेषमूलकं जल्पनमेव ।

यदुक्तम् ''जगत्कारणस्येक्षितृत्वश्रवणात् कर्तृत्वांशे प्रधानस्याशब्दत्वस्येक्षत्यधिकरणेन सिद्धावप्युपादानत्वं प्रधानस्यैव भविष्यतीति प्रधानस्याशब्दत्वमसिद्धमिति शङ्कायां तदंशेऽपि ब्रह्मणि गतिसामान्यप्रपञ्चनाय पुनरपि प्रकृत्यधिकरणे ब्रह्मण एवोपादानत्वमिति व्यवस्थापनेन प्रधानाशब्दत्वं व्युत्पाद्यत इति 'ईक्षत्यधिकरणोक्ताशब्दत्वस्य[1]' इत्यादिदूषणानवकाश इति दिक्'' (शां.पा.भू. पु.३३७) इति तन्न। एवंविधशङ्कोत्पत्तौ बीजाभावात्।

नच ब्रह्मण उपादानतानिर्वाहकविकारशून्यतया न तस्योपादानत्वम्। प्रधानस्य तु तत्सम्भवेन तस्यैवोपादानत्वं भविष्यतीति शङ्का सम्भवतीति वाच्यम्। ब्रह्मणः निर्धर्मिकत्वेनेक्षितृत्वरूपधर्माभावात्, कर्तृत्वरूपधर्माभावाच्च तस्य कर्तृत्वं सिद्धवत्कृत्योपादानत्वमात्रासम्भवशङ्काया अनौचित्यात्। नच ब्रह्मण ईक्षितृत्वम्, तत्साध्यं कर्तृत्वं चाविद्याकल्पितं सम्भवतीति वाच्यम्। तथासत्युपादानतानिर्वाहकविकारस्य तन्निर्वाह्योपादानत्वस्य चाविद्याकल्पितस्य सम्भवेन पूर्वमेव त्वयाऽङ्गीकृतत्वेन च ब्रह्मण उपादानत्वासम्भवशङ्काया एवानुत्थानात्। कथञ्चित् तदुत्थितावपीक्षत्यधिकरणानन्तरमव्यवधानेनैवैतच्छङ्कानिरासपूर्वकं ब्रह्मण उपादानत्वस्य प्रधानस्याशब्दत्वस्य व्युत्पादनीयतया व्यवधानेन चतुर्थपादे एवं व्युत्पादने बीजाभावेन विक्षिप्य चतुर्थपादे व्युत्पादने हेत्वभावाच्चेति चन्द्रिकोक्तदूषणस्य वज्रलेपायितत्वात्।

(शब्दचातुर्विध्यसमर्थनम्)

''यदपि वैदिकाः शब्दाः तावच्चतुर्विधाः। अन्यत्रैव प्रसिद्धाः, उभयत्र

१. ईक्षत्यधिकरणोक्ताशाब्दत्वस्य विक्षिप्य चतुर्थपादे व्युत्पादने हेत्वाभावाच्च।
-चन्द्रिका

प्रसिद्धाः, अन्यत्रप्रसिद्धाः, तत्र प्रसिद्धा इति। सर्वेऽपि नामलिङ्गात्मकतया प्रत्येकं द्विविधाः। तत्र नामात्मकानामन्यत्रप्रसिद्धानां शब्दानां प्रथमपादे समवन्यः। लिङ्गात्मकानामन्यत्रप्रसिद्धशब्दानां द्वितीयपादे समन्वयः। उभयत्रप्रसिद्धानां शब्दानां तृतीयपादे समन्वयः। अन्यत्रैव प्रसिद्धानां शब्दानां चतुर्थपादे समन्वय इति वैदिकशब्दचातुर्विध्योक्तिपुरःसरमुक्त-रीत्या आनन्दतीर्थीयानां पादभेदोपाधिवर्णनम्' इत्यनेन श्रीमदानन्द-तीर्थीयानां पादभेदोपाधिभेदमुपवर्ण्य तदप्यसदिति प्रजल्प्य यदुक्तम् 'अन्यत्रैव प्रसिद्धवत् तत्रैव प्रसिद्धानां पृथक् वक्तव्यतया चातुर्विध्योक्त्य-योगात्। नच तत्रेत्यनेन तत्रैवेति विवक्षितम्। अन्यथा तत्रापीति विवक्षा-यामुभयत्र प्रसिद्धेष्वन्तर्भावः स्यात्। अत एव 'तत्र प्रसिद्धाः ब्रह्मण्येव प्रसिद्धाः' इति सुधायामुक्तमिति वाच्यम्। तथासति, उक्तयुक्त्यैवान्यत्रैव प्रसिद्धानां पार्थिक्यायोगेन त्रैविध्यस्यैवापत्तेः'' (शां.पा.भू. पु.३६८) इत्यादिना तदसत्। तत्र प्रसिद्धानामित्यस्य तत्रैव प्रसिद्धानामित्यर्थविवक्षया शब्दानां चातुर्विध्योक्त्ययोगादित्यापत्तेरसम्भवात्। यदस्मिन् पक्षे, अन्यत्र प्रसिद्धेष्वप्येवं वक्तुं शक्यतयाऽन्यत्रप्रसिद्धानां पार्थक्यायोगेन वैदिक-शब्दानां त्रैविध्यस्यैवापत्तेरिति दूषणमुक्तं तन्मन्दम्, अन्यत्र प्रसिद्ध-शब्दानां लक्षणत अन्यत्रैव प्रसिद्धशब्दानां लक्षणस्य भेदात्। तथाहि। येषां विषयवाक्ये आपाततोऽन्यत्रमात्रोपस्थापकत्वं तत्वम्, येषां ब्रह्मणि समन्वयस्यान्योपस्थिति-ब्रह्मानुपस्थितिभ्यामेवातिप्रतिबन्धः तत्वं वाऽन्यत्र प्रसिद्धशब्दलक्षणम्। वर्तते चेदं लक्षणद्वयमानन्दमयनाम्नि 'तस्माद्वा एतस्माद्विज्ञानमयादन्योन्तर आत्मानन्दमयः' इत्यारभ्य 'ब्रह्मपुच्छं प्रतिष्ठा' इत्यस्मिन् विषयवाक्ये आपाततः विकारार्थकमयट्शब्द-

घटितत्वभ्रान्त्या प्रकृत्यादिरूपान्यत्रमात्रोपस्थापकत्वात्, आनन्दमयादिशब्दानां ब्रह्मणि समन्वयस्यान्योपस्थिति-ब्रह्मानुपस्थितिभ्यामेवातिप्रतिबन्धस्य सत्त्वाच्च । येषां विषयवाक्ये आपातत अत्यन्तमन्यमात्रोपस्थापकत्वं तत्वम्, येषां ब्रह्मणि समन्वयस्यान्योपस्थिति-ब्रह्मानुपस्थितिब्रह्मपरत्वविशेष्यकात्यशक्यकल्पनत्वशङ्का, एतत्त्रितयेनातितरां प्रतिबन्धस्तत्वं वाऽन्यत्रैव प्रसिद्धानां शब्दानां लक्षणम् । अव्यक्तादिशब्दानामवरत्वादिलिङ्गैर्भगवति विरुद्धतयाऽत्यन्तं प्रधानादिरूपान्यमात्रोपस्थाकपकत्वात् तेषां ब्रह्मणि समन्वयस्यान्योपस्थिति-ब्रह्मानुपस्थिति-ब्रह्मपरत्वविशेष्यकात्यशक्यकल्पनत्वशङ्का, एतत्त्रयेणातितरां प्रतिबन्धस्यापि सत्त्वाद् अन्यत्रैव प्रसिद्धेष्वव्यक्तादिशब्देषु लक्षणसमन्वयः। तथाचान्यत्र प्रसिद्धानां शब्दानामन्यत्रैव प्रसिद्धशब्देभ्यो पार्थिक्येन, शब्दानां त्रैविध्यस्यैवापत्तेरिति दूषणानवकाशात् ।

एतेन 'किश्चान्यत्र प्रसिद्धा इत्यस्य पादभेदोपाधेरवधारणगर्भत्वे चतुर्थपादोपाध्यन्तर्भावः,आनन्दमयशब्देऽन्यत्रैव प्रसिद्धिर्दुरुपपादा च । मयटो विकार इव प्राचुर्येऽपि प्रयोगाविशेषात् । प्रसिद्धिर्हि प्रयोगप्राचुर्यम् । तच्चाविशिष्टम् । तदगर्भत्वे हि तृतीयपादोपध्यन्तर्भाव इति कथं पादोपधिवैजात्यम्, इति' (शां.पा.भू. पु.३६८) इति निरस्तम् । अन्यत्र प्रसिद्धानामन्यत्रैव प्रसिद्धानां शब्दानां लक्षणभेदेन पादोपाधिवैजात्यस्य सम्भवात् ।

इदमुक्तं भवति- स्वप्रयोज्यान्योपस्थिति-ब्रह्मानुपस्थिति-प्रतिबद्धब्रह्मसमन्वयकशब्दसमन्वयपादत्वमन्यत्र प्रसिद्धपादत्वम् । स्वप्रयोज्यान्योपस्थिति-ब्रह्मानुपस्थिति-ब्रह्मपरत्वविशेष्यकात्यशक्यकल्पनत्वशङ्का,

एतत्त्रितयप्रतिबद्धब्रह्मानुयोगिकसमन्वयकशब्दसमन्वयपादत्वमन्त्रैव प्रसिद्धपादत्वमिति पादोपाधिवैजात्यसम्भवेन, 'कथं पादोपाधिवैजात्यम्' इत्याक्षेपासम्भव इति ।

यदुक्तम् 'किञ्च, इन्द्राकाशप्राणादिशब्दानां प्रथमपादीयानाम्, अव्यक्तजीवादिशब्दानां चतुर्थपादीयानां चान्यत्रैव प्रसिध्यविशेषे कुतो वैजात्यम् ? कथञ्चित् कल्पनेऽपि वा तत्र प्रसिद्धेऽपि तथाविधवैजात्यस्य कल्पनया द्वैविध्यसम्भवात् पाञ्चविध्ये वक्तव्ये चातुर्विध्योक्तिरयुक्ता' इति । तदपि न । पृथक्पृथक् लक्षणोपेतानां पदार्थानामन्तः वैजात्यस्य लोकप्रसिद्धतयाऽत्रापि, अन्यत्रप्रसिद्धानाम् अन्यत्रैव प्रसिद्धानां पृथक्पृथक् लक्षणवत्तया वैजात्यस्य न्यायतः प्राप्ततया 'अन्यत्र प्रसिद्धानामन्यत्रैव प्रसिद्धानां कुतो वैजात्यम्' इति प्रश्नस्यानवकाशात् । तत्र प्रसिद्ध-शब्देष्वेवंरीत्या वैजात्यस्य कल्पयितुमशक्यतया शब्दानां पाञ्चविध्या-सम्भवाच्चतुर्विधत्वोक्तेरेव युक्ततया 'शब्दानां पाञ्चविध्ये वक्तव्ये चातुर्विध्योक्तिरयुक्ता' इति जल्पनमप्यसङ्गतमेव ।

(पराभिमतसूत्रार्थपरिशीलनम्)

यदपि ''स एव प्रपञ्च आरभ्यते आनन्दमयोऽभ्यासादिति । तत्र प्रथमान्तानन्दमयपदोपलक्षितम् 'तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आनन्दमयः' इत्युपक्रम्याम्नातं ब्रह्मपुच्छं.प्रतिष्ठेत्यन्तवाक्यजातं विषयः। तत्किमन्यशेषतया ब्रह्म प्रतिपादयत्युत स्वप्राधान्येनेति संशयः। 'असन्नेव स भवति' इति श्लोकस्थाभ्यस्यमानब्रह्मण आनन्दमयविषयत्वपुच्छ-विषयत्वानिर्णयश्च तद्बीजम् । तत्र पूर्वपक्षे- आनन्दमयपदोदितम् अहमित्युपलभ्यमानं भोक्तारं जीवं प्रति शेषत्वेनैव ब्रह्म प्रतिपाद्यते, न

प्राधान्येन । पूर्वपूर्वपर्यायेषु पुच्छतया निर्दिष्टानामन्यशेषत्वदर्शनात् । तस्मादानन्दमयो जीव एव स्वप्राधान्येनोपास्यतया विवक्षित इति प्राप्तेऽभिधीयत 'आनन्दमयोभ्यासात्' इति ।

अत्रानन्दमयपदं तदुपलक्षितवाक्यविशेषपरम् । ब्रह्मपरमिति साध्यमध्याहार्यम् । तथाचानन्दमयपदघटितवाक्यविशेषः स्वप्रधानब्रह्मपरः, अभ्यासात्= अभ्यस्यमानब्रह्मपदघटितवाक्यैकवाक्यतापन्नत्वादिति सूत्रार्थः ।

यद्वाऽऽनन्दमयपदं तत्तात्पर्यविषयपरम् । पूर्वसूत्रादनुषक्तं तत्पदं साध्यसमर्पकम् । वाक्यस्य पदसमुदायरूपत्वात् तस्य यत्परत्वं तद्घटकपदानामपि तत्परत्वमविरुद्धमिति 'आनन्दमयपद-परमतात्पर्यविषयः तत्' इति प्रतिज्ञायां सूत्राक्षरानुगुण्यम् । अभ्यासादिति हेतुपदोपपादनमुक्तरीत्योभयोः सममेव'' (शां.पा.भू. पु.३९३) इति तदपि न सत् । आनन्दमयो जीव एव स्वप्राध्यान्येनोपास्यतया विवक्षित इति पूर्वपक्षे प्राप्ते आनन्दमयो न जीवः, किन्तु ब्रह्मैवेति तस्यैव स्वप्राधान्येनोपास्यत्वं सम्भवतीति सिद्धान्तेन भाव्यम् । न तथा सिद्धान्तितं त्वया । सिद्धान्तेऽपि जीवस्यैवानन्दमयत्वमङ्गीकृत्य ब्रह्मणः तत्पुच्छत्वस्यैव स्वीकृतत्वात् । नहि जीवस्यैवानन्दमयत्वमिति पूर्वपक्षं प्रापय्य जीवस्यैवानन्दमयत्वमिति सिद्धान्तः केनापि प्रेक्षावता क्रियते । नचानन्दमयपदस्य जीववाचकत्वेऽप्यानन्दमयपरमतात्पर्यं ब्रह्मण्येवेत्यानन्दमयपदपरमतात्पर्यविषयः तदिति सिद्धान्ते कृते आनन्दमयपदवाच्यत्वविशिष्टचैतन्यस्य स्वप्राधान्येनोपास्यत्वपूर्वपक्षेण तत्पदपरमतात्पर्यविषयस्य शुद्धचैतन्यस्य स्वप्राधान्येनोपास्यत्वेन सिद्धान्तः सम्भवतीति वाच्यम् । ब्रह्मशब्दाभ्यासेना-

नन्दमयपदपरमतात्पर्यविषयत्वविशिष्टे तदिति ब्रह्माभेदसाधनस्याभिप्रेतत्वात् विशिष्टस्यैवोपास्यत्वप्राप्त्या शुद्धचैतन्यस्य स्वप्राधान्येनोपास्यत्वसिद्धान्तासम्भव एव । यदि च, आनन्दमयपदपरमतात्पर्यविषय इति तु शुद्धञ्चैतन्यस्य परिचायकमात्रम्, न त्वानन्दमयपदतात्पर्यविषयत्वस्य पक्षांशे भानमिति विभाव्यते । तर्हि शुद्धचैतन्याभेदसाधनपर्यवासनेन तस्य सिद्धतया सिद्धसाधनमेव । यदुक्तम् 'अभ्यासादिति हेतूपपादनमुभयोः समम्' इति तदपि न । अभ्यस्यमानब्रह्मशब्दस्य वाच्यतासम्बन्धेनास्मन्मते हेतुत्वाङ्गीकारेण त्वन्मते ब्रह्मण अवाच्यतया तथाऽङ्गीकर्तुमशक्यतया हेतूपपादनस्योभयोः साम्याभावात् ।

एतेन, यदुक्तम् ''अपि च 'सुषुप्तिस्थानैकीभूतः प्राज्ञानघन एवानन्दमयो ह्यानन्दभुक्' इति सुषुप्तिलिङ्गात् जीव एवानन्दमयः, न ब्रह्म । अत एव 'अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुद्धयन्ताम्'' इति श्रूयते । शुद्धिर्हि प्रागशुद्धस्य सतोऽवगम्यते । अतः शुद्धयन्तामिति शुद्धिप्रार्थनयाऽशुद्धेर्जीवधर्मभूतायाः द्योतनान्न ब्रह्मानन्दमयः । अपि तु पञ्चापि कोशा एव'' (शां.पा.भू. पु. ३९८) इति निरस्तम् । आनन्दमयः जीव एव न ब्रह्मेति पूर्वपक्षेणानन्दमयो जीव एवेति सिद्धान्तकरणायोगस्य तथाऽऽनन्दमयपदतात्पर्यविषये तदिति ब्रह्माभेदसाधनसिद्धान्तायोगस्य च पूर्वमुक्तत्वात् ।

(स्वमते बाधकपरिहारः)

'यत्तु चन्द्रिकायामन्ये त्वित्यादिनोक्तमस्मन्मतमनूद्य तन्नेत्युक्त्वा, उक्तम्-

एकत्रापि न मुख्यार्थोल्लङ्घनं मामके मते ।
सर्वत्रापि मुख्यार्थोल्लङ्घनं तावके मते ॥

तथाहि । आनन्दमयपुच्छयोः द्वयोरपि पूर्णत्वेन ब्रह्मशब्दस्तावन्मुख्यः । पूर्णत्वं हि ब्रह्मशब्दस्य मुख्यार्थः । यथा धर्मान्तरेष्वदृष्टमपि जातिसमवायादौ धर्मिताधिकदेशवृत्तित्वम्, यथा वा परिच्छिन्नेनाव्रियमाणसम्बन्धिनाऽवृत्तेष्वदृष्टमपि परिच्छिन्नाज्ञानावृते निरंशचैतन्येऽपरिच्छिन्नत्वम्, यथा वाऽऽनन्दान्तरेष्वदृष्टमपि ब्रह्मानन्दस्य पूर्णत्वादिकं तथाऽन्यत्राद्दृगमप्यवयवस्य पूर्णत्वं विचित्रशक्तियुक्तब्रह्मावयवे अस्तु । उक्तं च 'विश्वतश्चक्षुः, पूर्णमदः पूर्णमिदम्' इत्यादिश्रुत्या 'सर्वतः पाणिपादं तत्' इति स्मृत्या चावयवस्य पूर्णत्वम् । तथा कृष्णकेशात्मनः कृष्णस्य 'व्याप्तं त्वयैकेन दिशश्च सर्वाः' इति पूर्णतोक्ता । तदुक्तमनुव्याख्याने-

'ब्रह्मतावयवेऽपि स्यात् तथाऽवयविनि स्वतः ।
यथैव कृष्णकेशस्य कृष्णस्य ब्रह्मताखिला ।
दर्शिता चैव पार्थाय निःसीमाः शक्तयोऽस्य हि ॥' इति ।

युक्तं चानवस्थापरिहाराय क्वचित् सम्बन्ध्यादेरेव सम्बन्धत्ववदस्मिन्नेव प्रकरणे 'आनन्दं ब्रह्मणः' इति श्रुतेरानन्दात्मकस्यैव ब्रह्मण आनन्दित्ववच्च, विशेषबलात् शक्तिव्यक्तिभावात् 'स शिरः स दक्षिणः पक्षः' इति श्रुत्याऽवयविन एवावयवत्वम् । तदुक्तं न्यायविवरणे-

'न चावयवत्वविरोधः । नेह नानास्ति किञ्चनेति श्रुतेरवयवाद्यभेदात्'

इत्यन्नमयादावपि प्राचुर्यार्थत्वस्य भाष्य एवोक्तत्वान्न प्रायपाठपरित्यागः । प्राचुर्यस्य प्रतियोग्यल्पत्वापेक्षत्वेऽपि न प्रतियोगिनः सामानाधिकरण्यनियमः । यतः प्राचुर्यस्य विजातीयसमानाधिकरणाल्पं यथा

निरूपकं तथा सजातीयविभिन्नाधिकरणाल्पं निरूपकम् । दृश्यते हि 'ब्राह्मणप्रचुरो ग्रामः' इत्यादौ समानाधिकरणस्य विजातीयशूद्रादेरल्पत्वेनेव 'प्रचुरप्रकाशः सविता' इत्यादौ व्यधिकरणस्य सजातीयस्य नक्षत्रादिप्रकाशस्याल्पत्वेनापि । प्रकृते 'सैषानन्दस्य' इत्यादिश्रुत्यैव व्यधिकरणस्य सजातीयस्य जीवानन्दस्यैवाल्पत्वमुक्ता ब्रह्मानन्दस्य 'यतो वाचः' इति महत्वमुक्तम्'' इत्यनेन चन्द्रिकामुपपाद्य तदविचाररमणीयमित्युपेक्ष्यमेवेत्यभिधाय यदुक्तम् ''तथाहि- यद्वादि अवयवावयविनोर्द्वयोरपि पूर्णत्वेन ब्रह्मशब्दस्तावन्मुख्य इति, नैतद्युक्तम् । विभुत्वे द्वयोरवयवावयविभावानुपपत्तेः । श्रूयते ब्रह्मणः 'नित्यं विभुं सर्वगतम्' 'आकाशवत्सर्वगतश्च' इत्यादिश्रुतिषु विभुत्वम् । न च तुल्यपरिमाणयोर्द्वयोरवयवावयविभावो दृष्टो युक्तो वा'' (शां.पा.भू. पु.४००) इत्यनेन तदपि न सत् । प्रमेयव्यवस्थितेः प्रमाणाधीनतया 'स शिरः स दक्षिणः पक्षः' इति श्रुत्याऽवयविनो भगवत अवयवत्वस्य प्रतिपादिततया ब्रह्मणः 'नित्यं विभुं सर्वगतम्' इति श्रुत्या विभुत्वस्यापि प्रतिपादिततया तुल्यपरिमाणयोर्द्वयोरवयवावयविभावस्यान्यत्रादृष्टत्वेऽपि भगवत्तदवयवयोर्द्वयोर्विभुत्वेऽपि प्रमाणबलादवयवावयविभावाङ्गीकारे बाधकाभावः । विभुत्वेन तुल्यपरिमाणयोर्भगवत्तदवयवयोः, अवयवावयविभावस्यावयवपूर्णत्वस्य च 'विचित्रशक्तिः पुरुषः पुराणः' इत्यादिश्रुत्यनुकूलविचित्रशक्तित्वरूप-युक्तिसिद्धतया 'न च युक्ता वा' इत्यस्यानवकाशात् ।

यच्चोक्तम्, धर्मान्तरेष्वदृष्टमित्यादि तदसदिति प्रजल्प्य 'भूतलादिगतेऽत्यन्ताभावेऽन्योन्याभावे च धर्मिताधिकदेशवृत्तितायाः दृष्टत्वात्' इत्यनेन तदपि मन्दम् । धर्मान्तरेष्वित्यस्य स्वसजातीयधर्मान्तरेष्वि-

त्यर्थः। साजात्यं च भावत्वेन। तथा च जातिसमवायादौ भावत्वेन स्व-सजातीयेषु, तत्तद्व्यक्तित्वादिषु तथा शुक्लनीलादिरूपेष्वदृष्टं धर्मिताधिक-देशवृत्तित्वमित्यर्थस्याभिप्रेततया भूतलादिगतात्यन्ताभावमादायोक्त-दूषणानवकाशात्।

यदुक्तम् ''वस्त्रादिकर्तृकमावरणमावरकापेक्षयाऽऽव्रियमाणस्य न्यून-परिमाणापेक्षमिति युक्तम्। सम्पूर्णावरणस्योपरितनसर्वावयवसंयोग-साध्यतयाऽऽवारकस्य न्यूनपरिमाणत्वे तदयोगात्। अविद्यकमावरणं च तदीयविषयताविशेषरूपं नाव्रीयमाणगतं परिच्छिन्नत्वमपेक्षते। 'अस्ति, भाति' इत्यादिव्यवहाराभावप्रयोजकतामात्रेणैव तत्रावरणव्यपदेश इति विषमो दृष्टान्त इति बालेनापि सुबोधम्'' (शां.पा.भू. पु.४००) इति तदपि न सत्। अज्ञानविषयताया आवरणस्वरूपत्वेऽपि तादृशावरणवत अपरिच्छिन्नत्वं लोकादृष्टमेवेति नायं दृष्टान्तो विषमः।

किञ्च लोके आवरणस्योपरितनसर्वावयवसंयोगसाध्यतायाः दृष्ट-तयाऽज्ञानरूपमावरणमुपरितनसर्वावयवसंयोगसाध्यविलक्षणमावरणम् इत्यपि लोकेऽदृष्टमेव। अस्ति भातीत्यादिव्यवहाराभावप्रयोजकता-मात्रेणैव तत्रावरणव्यपदेश इत्यपि न सत्। घटोऽस्ति भातीत्यादिव्यवहार-प्रतिबन्धकस्य तथाविधव्यवहाराभावप्रयोजकस्यादृष्टविशेषस्य घटावरण-व्यपदेशप्रसङ्गात्। बालेनापि सुबोधमित्यप्यसङ्गतमेव। नहि सर्वथा शास्त्रसंस्पर्शशून्य अव्युत्पन्नो बालस्त्वयं दृष्टान्तो विषमः सम इति वा जानाति। अतः बालेनापि सुबोधमिति वचनं तु स्वस्याकौशल्य-प्रकटप्रयोजनकमेव।

(ब्रह्मावयवानामपि पूर्णत्वसमर्थनम्)

'आनन्ददृष्टान्तोऽपि विषम एव' इत्युक्त्वा यदुक्तम् 'अन्यत्रादृष्टस्यापि परममहत्परिमाण-परमाणुपरिमाणगततारतम्यविश्रामस्य तत्र दर्शन-मात्रेणान्यत्र वक्तुमशक्यत्वात् । प्रमाणाधीनत्वाद् व्यवस्थायाः' इति तन्नास्मत्प्रतिकूलम् । तथाहि, अनेनेदमुक्तं भवति 'अणोरणीयान् महतो महीयान्' इति श्रुत्या महत्परिमाणतारतम्यस्य अणुपरिमाणतारतम्यस्य च ब्रह्मणि विश्रामदर्शनमात्रेण तदतिरिक्तस्थले तथाविधविश्रामकल्पक-प्रमाणाभावेनान्यत्र तस्य वक्तुमशक्यत्वमिवात्रापि ब्रह्मानन्दपूर्णत्व-प्रापकप्रमाणसद्भावेनान्यत्रानन्देऽदृष्टमपि पूर्णत्वं कल्पयितुं शक्यमिति । तत्र पूर्णत्वदर्शनमात्रेणान्यत्रावयवादौ पूर्णत्वस्य वक्तुमशक्यत्वमेवेति चेत् तत्रोच्यते । प्रमेयव्यवस्थितेः प्रमाणाधीनत्वस्य त्वयैवाङ्गीकृततया ब्रह्मानन्दस्य पूर्णताप्रापकप्रमाणसद्भाव इव तदवयवस्यापि पूर्णता-समर्पकाणां 'विश्वतश्चक्षुः, पूर्णमदः पूर्णमिदम्, सर्वतः पाणिपादम्, व्याप्तं त्वयैकेन दिशश्च सर्वाः' इत्यादिप्रमाणानां सद्भावात् । यत्तु सार्वात्म्य-सिद्ध्यर्थं विश्वतो= विश्वानि चक्षूंषि यस्य इति व्युत्पत्त्या प्रमाणान्तर-सिद्धाखिलचक्षुष्मत्ताया एव तत्र बाधनादिति । तदपि न । तथाविध-व्युत्पत्तिस्वीकारेऽपि विश्वशब्दस्य पूर्णवाचकतया चक्षुषां पूर्णत्व-लाभात् । नचान्यत्र चक्षुष्यदृष्टपूर्णत्वमत्र विरुद्धमिति शङ्क्यम् । प्रमाणानामेव विरोधशामकत्वात् ।

एतेन ''यत्तु 'कृष्णकेशः कृष्णः' इति भागवते प्रतिपादनात् तस्य च गीतायां पूर्णताया उक्तत्वादवयवस्यापि पूर्णत्वम्'' इत्यनेनावयवस्य पूर्णत्वं प्रतिपाद्य, तदसदित्यभिधाय यदुक्तम् ''तत्र तावत् केशत्वोक्तिर्न वास्तव-

केशत्वाभिप्रायेण। किन्तु यस्य 'निःश्वसितं वेदः' इत्यत्रेव तदवयवकार्यम् अत्यनायाससाध्यमिति द्योतनाय। अन्यथा तत्र सितकृष्णकेशयोर्विभुत्वे-

'एवं संस्तूयमानस्तु भगवान् पुरुषोत्तमः।
उत्पपाटात्मनः केशौ सितकृष्णौ तदा मुने।
उवाच च सुरानेतौ मत्केशौ वसुधातले।
अवतीर्य भुवो भारं क्लेशहानिं करिष्यतः॥'

इति विष्णुपुराणे तयोरुत्पाटनाभिधानासङ्गतेः'' (शां.पा.भू. पु.४०१) इति तदपि निरस्तम्।

किञ्च, कृष्णस्य कृष्णकेशत्वोक्तेर्वास्तवकृष्णकेशत्वाभिप्रायाभावेऽपि त्वया कृष्णस्य ब्रह्मावयवत्वमङ्गीकृतं न वा। नेतिपक्षे तदवयवकार्यमत्यनायाससाध्यमिति द्योतनायेत्युक्तिरसङ्गता स्यात्। आद्ये तदवयवकार्यस्यात्यनायससाध्यत्वमवयवस्य पूर्णत्वं विनाऽनुपपद्यमानं स्यात्। अपूर्णकार्यस्यात्यनायाससाध्यत्वादर्शनात्। अतः अवयवस्यात्यनायाससाध्यकार्यकारित्वान्यथानुपपत्त्याऽपि तस्य पूर्णत्वं सिद्ध्यति। एवञ्च कृष्णस्य ब्रह्मावयवत्वमङ्गीकृतम्। अत्यनायाससाध्यकार्यकारित्वान्यथानुपपत्तिलब्धं पूर्णत्वमपि। तथाच किमपराद्धं कृष्णस्य कृष्णकेशत्वोक्तेर्वास्तवकेशत्वाभिप्रायकत्वे ?

यदुक्तम् 'उत्पाटनं विभुत्वं चैकत्र विरुद्धमित्यभिप्रायेण सितकृष्णकेशयोर्विभुत्वे उत्पाटनाभिधानासङ्गतेः' इति तदपि न। अन्यत्र विरुद्धत्वेन दृष्टानामपि धर्माणां भगवति 'यस्मिन् विरुद्धगतयोप्यनिशं पतन्ति' इत्यादिप्रमाणबलेन समावेशसम्भवात्।

यदुक्तम् 'युक्तं[१]चेत्याद्यपि न युक्तम्। परमाण्वादीनां सांशत्वमिच्छता त्वयाऽनवस्थाप्रयुक्तदोषक्षतेस्त्यक्तत्वात्' इति तदपि न। प्रामाणिक-परम्पराया अनवस्थादोषत्वाभावेऽप्यप्रामाणिकपरम्पराया अनवस्थात्वेन दोषत्वस्याङ्गीकृततयाऽनवस्थापरिहारायेत्युक्तं युक्तमेव।

(परेणापि विशेषस्याङ्गीकार्यत्वसमर्थनम्)

यदुक्तम् "यदपि विशेषबलादवयविन एवावयवत्वम्। यथास्मिन् प्रकरणे 'आनन्दं ब्रह्मणो विद्वान्' इति श्रुतेरानन्दात्मकस्यैव ब्रह्मण आनन्दित्वमिति। तदपि न" इत्यभिधाय विशेषबलादित्यस्य विचारा-सहत्वात्। तथाहि। धर्म्येव धर्मः। धर्मितन्मात्रमिति यावत्। उत धर्मो धर्मी चेति व्यक्तिद्वयम्। तयोर्भेदः परं नाङ्गीक्रियते। किन्तु विशेष इति। नाद्यः। अपसिद्धान्तापातात्। ज्ञानानन्दादिशब्दानां पर्यायता-प्रसङ्गात्। तुल्यन्यायेन ज्ञानत्वानन्दत्वादेरपि धर्मितन्मात्रत्वात्। न द्वितीयः। भेदाद्विशेषस्याविशेषात्। भेदस्य विशेषसञ्ज्ञाकृतेत्येव पर्यव-सानात्। भेदं निषिध्य विशेषं व्यवस्थापयन्त्याः श्रुतेः फलादर्शनात्" इत्यनेन तदप्यसमञ्जसम्। तथाहि यदुक्तम्, विशेषबलादित्यस्य विचारासहत्वादिति। तन्न। विशेषस्य त्वयाऽप्यवश्यमङ्गीकर्तव्यत्वात्। तथाहि। तत्वमसीत्यादिमहावाक्यप्रतिपाद्यमैक्यमवान्तरवाक्यप्रतिपाद्यं सत्यत्वादिकं च ब्रह्मणाऽभिन्नमेव। 'एकधैवानुद्रष्टव्यम्' इत्याद्येकरस-प्रतिपादकश्रुतेः। यतो भेदहीनेऽपि वस्तुन्यस्तिकश्चिच्छक्तिविशेषः। येन प्रकाशमात्रमप्यैक्य-सत्यत्वादिकं न प्रकाशते" इत्यादि युज्यते। स विशेषोऽनयैवार्थापत्त्या गम्यत इत्येव त्वयाऽङ्गीकार्यम्।

---

१. पूर्वम् 'युक्तं च क्वचित् सम्बन्धादेः' इति चन्द्रिकानुवादः कृतः। सोऽत्र निरा-क्रियते।

नचाङ्गीकृतेऽपि विशेषे नानुपपत्तिशान्तिः । स विशेषः यदि वस्तुनो भिन्नस्तर्हि भेदानवस्थादिदोषः । अभिन्नत्वे च विशेषतद्वद्भावानुपपत्तितादवस्त्यमिति वाच्यम् । विशेषविशेषिणोश्चाभेदमङ्गीकृत्य विशेषबलादेव विशेषतद्वद्भावस्याप्युपपादनीयत्वात् । नच विशेषपरम्परयाऽनवस्था शङ्क्या । स एव विशेषः विशेषान्तरमन्तरेण विशेषतद्वद्भावं घटयतीति तस्य स्वनिर्वाहकत्वाभ्युपगमात् । एकस्यैव निर्वाह्यनिर्वाकत्वं च तद्बलादेव सिद्ध्यतीत्यप्यवश्यमङ्गीकारणीयमेव ।

अयमत्र समुदितार्थः । जीवब्रह्मैक्यादीनामेकधैवेत्यादिश्रुत्या चैतन्यस्वरूपमात्रत्वं प्रतीयते । चैतन्ये स्वप्रकाशतया सिद्धेऽप्यसिद्धिः, अपर्यायशब्दवेद्यत्वं चैतन्यप्रकाशस्य नाविद्यानिवर्तकत्वम्, अद्वैतज्ञानस्य तन्निवर्तकत्वम्, चैतन्यमेकं सत्यत्वादीनि अनेकानीति सङ्ख्यावैलक्षण्यम् इत्यादि भेदकार्याणि चावगम्यन्ते । एतदुभयान्यथानुपपत्त्या भेदरहितेऽपि चैतन्ये भेदप्रतिनिधिः, तत्कार्यकारी कश्चित् विशेषोऽस्तीति कल्प्यम्, गत्यन्तराभावात् । तथाचार्थापत्त्या स्वरूपग्राहिण्या भेदकार्यनिर्वाहक एवासौ विशेषः सिद्ध इति किं तत्र प्रमाणान्तरान्वेषणेनेति । नच वास्तवस्य भेदस्याभावेऽप्याविद्यकभेदबलादेव सर्वव्यवहारोपपत्तौ न कृत्यम् अक्लृप्तविशेषाङ्गीकारेणेति वाच्यम् । त्वन्मतेऽविद्याऽसम्भवस्यासकृदुक्तत्वाद् ।

किञ्च, आविद्यकभेदो नाम मिथ्याभेद एवेत्युक्तं स्यात् । तथाच भेदस्य मिथ्यात्वे धर्माणां भगवता साकमभेदस्यैव प्राप्त्या पूर्वोक्तदोषानिवारणात् । नच व्यावहारिकभेदाङ्गीकारे नेयमनुपपत्तिरिति वाच्यम् । स किं बाध्यो वोताबाध्यः । आद्ये पूर्वोक्तदोषानिवृत्तेः । द्वितीये

भगवद्धर्माणां भगवतः सकाशात् भेदं निन्दयन्त्या 'एवं धर्मान् पृथक् पश्यन्' इत्यादिश्रुतेर्विरोधात् । प्रपञ्चितं चैतत् श्रीमन्न्यायसुधायां जयतीर्थश्रीमच्चरणैः-

'अभिन्नेऽपि विशेषोऽयं बलादापतति ह्यतः ।'

इत्यनुव्याख्यानव्याख्यानावसरे । विस्तरभयान्नेह विशेषो लिख्यत इति सर्वं समञ्जसमिति ।

(आनन्दप्राचुर्ये आनन्दाल्पत्वाक्षेपपरिहारः)

यदपि 'प्राचुर्यस्य प्रतियोग्यल्पत्वापेक्षत्वेऽपि न प्रतियोगिनः सामानाधिकरण्यनियमः' इत्यादीत्यनेन चन्द्रिकामनूद्य यच्चोक्तम् ''तत्रोक्तं कल्पतरौ- प्राचुर्यस्य विशेषणत्वे प्रतियोगिन ईषदनुवृत्तिनियमाभावेऽपि तस्य विशेष्यत्वेन तन्नियमोऽस्त्येव । 'ब्राह्मणप्रचुरो ग्रामः' इति प्रयोगे तद्दर्शनात् । आनन्दमय इत्यत्र प्रत्ययार्थप्राधान्यानुरोधेन प्राचुर्यस्य विशेष्यत्वात्'' इत्यनेन । तन्न । तथाहि । [1]यदर्थनिष्ठप्रकारतानिरूपितविशेष्यत्वावच्छिन्नप्राचुर्यनिष्ठप्रकारतानिरूपितविशेष्यताश्रयत्वं यस्य तस्मिन् तदर्थसमानाधिकरणविजातीयस्याल्पस्य प्रतीतिरिति नियम

---

१. यदर्थनिष्ठेति ।। यथा 'ब्राह्मणप्रचुरो ग्रामः' इत्यत्र यत्पदेन ब्राह्मणाः ग्राह्याः । ते च प्राचुर्ये विशेषणत्वेन भासन्ते । प्राचुर्यं ब्राह्मणांशे विशेष्यम्, ग्रामांशे च विशेषणम् । अतः प्राचुर्ये विशेष्यता प्रकारता च अस्ति । समानाधिकरणयोः तयोः अवच्छेद्यावच्छेदकभावः । तथा च ब्राह्मणनिष्ठप्रकारतानिरूपितप्राचुर्यनिष्ठविशेष्यत्वावच्छिन्नप्रकारतानिरूपितविशेष्यता ग्रामेऽस्ति । अतः ग्रामे, तदर्थसमानाधिकरण= ब्राह्मणसमानाधिकरणविजातीयाः= शूद्राः, तेषाम् अल्पत्वं ज्ञायते । तस्मिन्नेव ग्रामे शूद्राः अल्पाः सन्ति इति ज्ञायते, इत्यर्थः ।

इत्युक्तं भवत्यनेनेति प्रतीयते। तादृशनियमोऽपि न सम्भवति 'प्रकाशप्रचुरः सविता' इत्युक्तेऽपि सवितर्यन्धकारलेशाप्रतीतेः। अस्तु वा तादृशनियमः। तथापि नियमशरीरे यदर्थनिष्ठप्रकारतानिरूपितविशेष्यतेत्यत्र विशेष्यतायां प्रचुरपदप्रयोज्यत्वं निवेशनीयम्। तथाच ब्राह्मणप्रचुरो ग्राम इत्यत्र प्राचुर्यनिष्ठविशेष्यतायाः प्रचुरपदप्रयोज्यत्वेन ब्राह्मणपदार्थनिष्ठप्रकारतानिरूपितप्रचुरपदप्रयोज्यप्राचुर्यनिष्ठविशेष्यत्वावच्छिन्नप्राचुर्यनिष्ठप्रकारतानिरूपितविशेष्यताश्रयत्वं ग्रामस्य प्राप्तमिति तत्र ब्राह्मणतद्विजातीयस्य शूद्रादेरल्पस्य प्रतीतावपि 'आनन्दमयो ब्रह्म' इत्यत्रानन्दप्रकारतानिरूपितप्राचुर्यनिष्टविशेष्यताया मयट्प्रत्ययप्रयोज्यतयाऽऽनन्दप्रकारतानिरूपितप्रचुरपदप्रयोज्यप्राचुर्यनिष्टविशेष्यत्वावच्छिन्नप्रकारतानिरूपितविशेष्यताश्रयत्वस्य ब्रह्मण्यभावेन तत्रानन्दसमानाधिकरणतद्विजातीयस्य अनानन्दादेरल्पत्वस्य प्रतीतेरनवकाशात्।

नच 'ब्राह्मणमयोऽयं ग्रामः' इत्यत्र ब्राह्मणसमानाधिकरणस्वविजातीयस्य शूद्रादेः ग्रामे प्रतीतिसत्त्वेन तत्र प्राचुर्यनिष्ठविशेष्यतायाः मयट्प्रत्ययप्रयोज्यत्वेन प्रचुरपदाप्रोज्यत्वात् व्यभिचार इति वाच्यम्। अभिप्रायानवगमात्। नहि वयं तदर्थसमानाधिकरणविजातीयाल्पप्रतीतेर्व्याप्यत्वमङ्गीकर्तुमुद्यताः येन तत्र व्यभिचारोद्भावनं सङ्गच्छेत। अपि तु तदर्थनिष्टप्रकारतानिरूपितप्रचुरपदप्रयोज्यविशेष्यत्वावच्छिन्नप्राचुर्यनिष्ठप्रकारतानिरूपितविशेष्यत्वस्यैव व्याप्यत्वमिति नोक्तव्यभिचारावकाशः। निरुक्तव्याप्यस्योक्तव्यापकाव्यभिचारित्वात्। नहि व्यापकवति व्याप्यादर्शने व्यभिचारः शङ्क्यते। तथासति वह्निमत्ययो-

गोलके धूमादर्शनेन धूमस्यापि वह्निव्यभिचारः शङ्क्येत । अतो नोक्त-व्यभिचारोद्भावनं सम्यगिति ।

तथाच प्राचुर्यस्यानन्दविशेष्यत्वेऽपि तादृशविशेष्यतायाः प्रचुर-पदाप्रयोज्यत्वेन ब्रह्मण्यानन्दनिष्टप्रकारतानिरूपितप्रचुरपदप्रयोज्य-प्राचुर्यनिष्टविशेष्यत्वावच्छिन्नप्रकारतानिरूपितविशेष्यताश्रयत्वरूप-व्याप्याभावेन तत्रानन्दसमानाधिकरणस्य तद्विजातीयस्यानानन्द-स्येषदनुवृत्तिप्रतीतिरूपव्यापकप्रसक्तेरनवकाशात् । नहि त्वदीयग्रन्थ-स्यापि तदर्थसमानाधिकरणविजातीयाल्पप्रतीतेर्व्याप्यत्वमभिप्रेतम् । तथासति ब्रह्मण आनन्दविशेष्यप्राचुर्यविशेष्यत्वेन तस्मिन्नानन्दसमा-नाधिकरण आनन्दविजातीयानानन्दादिप्रतीत्यापादानपरस्य त्वदीय-ग्रन्थस्यासङ्गत्यापत्तेरिति दिक् ।

यदप्युक्तम् " 'सैषानन्दस्य मीमांसा भवति । यदेष आकाश आनन्दो न स्यात्' इत्यादिवाक्येष्वानन्दपदान्यानन्दपराण्येव । न प्राचुर्यलक्षकाणि, इति तत् स्वसिद्धान्तविरुद्धम्" इत्यभिधाय यदुक्तम् "तद्धेतुव्यपदेशादिति सूत्रे 'यदेष आकाश आनन्दो न स्यात्' इति वाक्यस्थानन्दपदस्य प्राचुर्य-घटितार्थकतायास्त्वदीयैर्दर्शितत्वात् । तथाहि- तत्वप्रकाशिकायाम् 'एवञ्च प्रचुरानन्दत्वेनानन्दमयपदवाच्यो विष्णुरेव । ब्रह्मशब्दाभ्यासादित्यु-क्तम् । तदेव हेत्वन्तरेण प्रतिपादयत् सूत्रमुपन्यस्य तदुपात्तश्रुतिमुदा-हरति- तद्धेत्विति ॥ आसमन्तात् काशमानो विष्णुर्यदि पूर्णानन्दो न स्यात् तदाऽसौ लोकं न प्रवर्तयेत् । आनन्दोद्रेकमन्तरेण तत्प्रवृत्तौ कारणा-भावात्' इति 'यदेष आकाश आनन्दो न स्यात्' इति वाक्यस्थानन्द-पदस्य पूर्णानन्दार्थकत्वमुक्तं तदानन्दपदस्यानन्दसामान्ये शक्तस्य लक्षणां

विना न निर्वहतीति स्पष्टमेव'' (शां.पा.भू. पु.४०४) इति तन्न । शब्दास्तावन्मुख्यार्थमेव बोधयन्ति । मुख्यार्थबोधबाधके सत्यमुख्यार्थमित्यतः शब्दानां मुख्यार्थे एव शक्ततयाऽऽनन्दानां मध्ये पूर्णानन्दस्यैव मुख्यतयाऽसति बाधके आनन्दपदस्य पूर्णानन्दबोधकत्वस्यैव शक्त्या प्राप्त्या तत्वप्रकाशिकाया अप्येतदभिप्रायकतयाऽऽनन्दपदस्य प्रचुरानन्दत्वावच्छिन्नवाचकतया आनन्दपदानि न प्राचुर्यलक्षकाणीत्यस्य स्वसिद्धान्तविरोधाभावात् ।

(स्वाभिमतपूर्वपक्षे परोक्ताक्षेपपरिहारः)

'यदुक्तमवयविजिज्ञासां विनाऽवयवजिज्ञासा न सम्भवतीति तन्न सर्वसम्मतम्' (शां.पा.भू. पु.४२३) इत्यभिधाय यदुक्तम् 'तथा श्रुतिवाक्यस्य क्वाप्यनाम्नात् । नहि घटजिज्ञासां विना कपालजिज्ञासा सम्भवतीति त्वदुक्तिमात्रस्याश्रद्धेयत्वात्' इति तन्न । नह्यवयविजिज्ञासाया अवयवजिज्ञासां प्रति कारणत्वं वक्तुमुद्यमः । येन घटजिज्ञासां विनेत्याद्युपपादनं सङ्गच्छेत । अपितु मोक्षप्रापकजिज्ञासायाः प्रस्तुतत्वेनावयवावयविनोर्मध्येऽवयविनः मुख्यतया मुख्यस्यैव जिज्ञासायाः मोक्षप्रापकतया मोक्षरूपप्रयोजनसाधनावयविजिज्ञासां परित्यज्य मोक्षाप्रापकामुख्यावयवजिज्ञासया न कृत्यम् । अतः ब्रह्मण आनन्दमयस्य पुच्छाख्यावयवतयाऽवयवावयविनोर्भेदसत्त्वेन पुच्छस्य ब्रह्मणः न जिज्ञासा विहितेति जिज्ञासा सूत्रोक्तं ब्रह्मणः जिज्ञास्यत्वं न सम्भवतीति प्राप्तेऽवयवावयविनोरभेदेनानन्दमयस्यैव ब्रह्मतया तज्जिज्ञासायाः मोक्षसाधनत्वेन कर्तव्यताप्राप्त्या जिज्ञासासूत्रोक्तं ब्रह्मणः जिज्ञास्यत्वं सम्भवतीति सिद्धान्तयितुमानन्दमयोऽभ्यासादिति सूत्रं प्रसक्तमित्यभिप्रायः ।

श्रीमदानन्दतीर्थश्रीमच्चरणैरपि 'न ह्यवयविनं विनाऽवयवमात्रस्य ज्ञेयता' इति पूर्वपक्षभाष्येणायमर्थः सूचितः । तथाहि । ज्ञेयतेत्यत्र प्रत्ययार्थः सफलत्वं विषयत्वं च । सफलत्वस्य ज्ञानेऽन्वयः । तस्य विषयत्वेऽन्वयः। तथा चावयवमात्रस्य ज्ञेयतेत्यनेन अवयवमात्रस्य सफलज्ञानविषयतेत्यर्थलाभसम्भवात् ।

"नाप्यानन्दमयो न विष्णुः । किन्तु चतुर्मुखादिः । ब्रह्मशब्दस्य रूढ्यादिना तन्निष्ठस्य 'असद् ब्रह्मेति वेद चेत्' इत्यादिवाक्ये श्रवणादिति पूर्वपक्षोऽपि युक्तः" इत्यभिधाय यदुक्तम् "जिज्ञासासूत्रे 'तद्विजिज्ञासस्व तद्ब्रह्म' इति वाक्यस्थब्रह्मशब्दस्य यौगिकत्वेन जीवाद् भेदकत्वोक्तेः, जन्मादिसूत्रे तस्मिन्नेव वाक्ये ब्रह्मशब्दस्य कारणत्वादिना जीवादौ रूढिं बाधित्वा योगस्य ब्रह्मणि व्यवस्थापनाच्च पुनः रूढ्याश्रयणेन पूर्वपक्षानुत्थितेः" (शां.पा.भू. पु.४२१) इति तन्न । केवलयोगापक्षया केवलरूढेः प्राबल्यम् । केवलयोगापेक्षया केवलरूढ्यापेक्षया च योगरूढेः प्राबल्यम् । अतः योगरूढेर्बाधकमस्ति यत्र तत्र केवलरूढिराश्रयणीयेति 'तद्विजिज्ञासस्व तद्ब्रह्म' इति वाक्यस्थब्रह्मशब्दस्य योगरूढ्या गुणपूर्णभगवद्वाचकत्वे बाधकाभावात् तस्मिन्नेव वाक्ये जगत्कारणत्वादिरूपसाधकश्रवणाच्च ब्रह्मशब्दस्य योगरूढ्या गुणपूर्णभगवद्वाचकत्वम् आदृत्य तस्य जीवाद्भेदकत्वं पूर्वमुक्तम् । आनन्दमयवाक्ये तु ब्रह्मशब्दस्य योगरूढ्या गुणपूर्ण भगवद्वाचकत्वे विकारार्थकमयट्शब्दश्रवणरूपबाधकसत्त्वेन योगरूढिपरिहारेण केवलरूढिमाश्रित्य पुनः पूर्वपक्षोदयस्य न्यायप्राप्तत्वात् ।

नचानन्दमयवाक्ये ब्रह्मशब्दस्य चतुर्मुखस्वीकारपक्षेऽप्यानन्द-

मयमधिकृत्य प्रवृत्तेन 'को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्' इति वाक्योक्तजगत्प्राणनादिहेतुत्वाद्यनुपपत्तिबाधकसत्त्वात् केवलरूढ्या चतुर्मुखस्वीकारोऽपि न सम्भवतीति वाच्यम्। जगत्प्राण-नादिहेतुत्वस्य चतुर्मुखे यथासम्भवं स्वीकारसम्भवान्न चतुर्मुखस्वीकारे बाधकमस्ति। आनन्दमयवाक्ये भगवत्स्वीकारपक्षे तस्मिन् मयट्-प्रत्ययार्थस्य विकारस्य कथमपि सङ्गमयितुमशक्यतया मयट्प्रत्ययेन योगरूढ्या भगवद्वाचकत्वं ब्रह्मशब्दस्य परिहर्तुं शक्यमेवेति।

यदुक्तम् 'विकारबोधकमयट्शब्दस्य प्राचुर्यार्थतयाऽन्यथासिद्धत्वात् सन्दिग्धत्वाच्च' इति तन्न। तावतापि मयट्शब्दः प्राचुर्यार्थः, उत विकारार्थ इति सन्देहे आनन्दमयस्य ब्रह्मत्वसंशय एव स्यान्नानन्दमयस्य ब्रह्मत्वनिर्णय इति तादृशसंशयनिरासेनानान्दमयस्य ब्रह्मत्वनिर्णयार्थ-मानन्दमयाधिकरणस्य प्रवृत्तिरिति वक्तुं शक्यत्वात्।

यदुक्तम् 'आनन्दमये ब्रह्मशब्दाभ्यासात् आनन्दमयो विष्णुरेवेति सिद्धान्तोऽप्ययुक्तः। आनन्दमये ब्रह्मशब्दाभ्यासासिद्धेः। तस्य पुच्छब्रह्मविषयत्वात्। न हि तदनभिधायकेन शब्देन तदभ्यासोऽस्ति' (शां.पा.भू. पु.४२६) इति तदपि न युक्तम्। अस्तु वा पुच्छ एव ब्रह्म-शब्दाभ्यासविषयत्वम्। तावतापि बाधकाभावः। आनन्दमये पक्षे स्व-विषयावयवैक्यसम्बन्धेन विद्यमानेन ब्रह्मशब्दाभ्यासेन हेतुना ब्रह्मत्व-साधनसम्भवात्। नच पक्षे उक्तहेतुतावच्छेदकसम्बन्धेन हेत्वसिद्धिः शङ्क्या। भगवदवयवानां भगवता साकमभेदस्य 'स शिरः' इति श्रुति-सिद्धत्वात्।

यदुक्तम् ''नाम ब्रह्मेत्युपासीतेत्यत्र नामेति प्रथमावचनं 'वसन्तो

मारुतः' इतिवत् सप्तम्यर्थ इत्यभिधाय नाम्नि ब्रह्मेत्युपासीतेत्यर्थोपवर्णनम् इव 'येऽन्नं ब्रह्मोपसते' इत्यत्राप्यन्नमिति प्रथमावचनं सप्तम्यर्थ इत्यादृत्यान्ने ब्रह्मेत्युपासीतेत्यर्थोपवर्णनस्य सम्भवेन नान्नस्य ब्रह्मत्वसिद्धिः'' (शां. पा.भू. पु. ४३५) इति तदपि न। सर्वकारणत्वलिङ्गादन्नस्य ब्रह्मता। नामादौ तदभावान्न तस्य ब्रह्मत्वमिति। न च 'अन्नात् पुरुषः, ओषधीभ्योऽन्नम्' इति जन्यत्वलिङ्गेन नान्नस्य ब्रह्मत्वमिति वाच्यम्।

'भूतं भूताभिमानी च तद्देहोऽन्तर्नियामकः।'

इत्याद्यनुव्याख्यानव्याख्यावसरे हरिजनैः प्रादुर्भावपरतया व्याख्यातत्वात्।

(सत्यं भिदेत्यादिश्रुत्यर्थः)

यदपि 'सत्य आत्मा सत्यो जीवः सत्यं भिदा सत्यं भिदा' इत्यस्यां श्रुतौ सत्य आत्मेत्यात्मनः त्रिकालाबाध्यत्वमाह। किं तर्हि जीवत्वमपि वास्तवं नेत्याह- **असत्यो जीव इति**॥ भावप्रधाननिर्देश जीवत्वमिति यावत्। विशिष्टनिषेधस्य विशेष्ये बाधे विशेषणोपसङ्क्रमात्। द्विविधे पदविभागे सम्भवत्यपि बह्वभेदश्रुतिवाक्यानुरोधेनोक्तन्यायेन चात्रासत्य इति पदच्छेद एवोचितः' (शां.पा.भू. पु. ४५२) इति तन्न। सत्य आत्मेति वाक्यं त्रिकालाबाध्यत्वरूपं सत्यत्वमात्मत्वविशिष्टस्य प्रतिपादयत्युत तदुपलक्षितस्य। नाद्यः। आत्मत्वरूपधर्मस्यापि त्रिकालाबाध्यत्वप्राप्त्या ब्रह्मणि पारमार्थिकधर्माभाववादिनस्तवापसिद्धान्तः। न द्वितीयः। यदाकादाचित् तत्सम्बन्धिनस्तदुपलक्षिततयाऽऽत्मत्वरूपधर्मस्य कदाचिदपि शुद्धचैतन्यासम्बन्धेन शुद्धचैतन्यस्य तदुपलक्षितत्वायोगात्। त्वन्मतेऽविद्याया असम्भवेनाविद्यकसम्बन्धस्य निरस्तत्वात्।

किञ्चैकस्मिन्नेव ब्रह्मण्यात्मत्वजीवत्वादिधर्माणामौपाधिकानां त्वयाऽङ्गीकृततया जीवत्वविशिष्टस्येवात्मत्वविशिष्टस्य च मिथ्यात्वेन 'सत्य आत्मा' इत्यत्रात्मत्वविशिष्टस्य सत्यत्वप्रतिपादनं विहायात्मत्वोपलक्षिते सत्यत्वप्रतिपादनमिव जीवत्वविशिष्टस्य मिथ्यात्वेऽपि जीवत्वोपलक्षितस्य सत्यतया जीवत्वोपलक्षिते सत्यत्वबोधने बाधकाभावेनासत्य इति पदच्छेदप्रयासे बीजाभावः । असत्य इति पदच्छेदाभावे जीव इत्यस्य भावप्रधाननिर्देशाभावेन जीव इत्यस्य मुख्यार्थतापि सङ्गच्छते ।

नच जीव इत्यस्य भवितृप्राधान्यमेव । तथापि जीवत्वविशिष्टेऽसत्य इत्यनेन सत्यत्वाभावबोधनान्न जीवपदस्यामुख्यार्थतेति वाच्यम् । तथा सत्यपि विशेष्ये सत्यत्वाभावबाधेन विशिष्टे प्राप्तस्य निषेधस्य विशेषणोपसङ्क्रमणस्याङ्गीकर्तव्यतया गौणस्यैवाङ्गीकर्तव्यतापातात् । पदस्य रीत्यन्तरेण मुख्यार्थासम्भवे हि गौणार्थाङ्गीकारस्य न्यायप्राप्ततयोक्तरीत्या मुख्यार्थसम्भवे सति गौणकल्पनाया अन्यायत्वात् ।

यदुक्तम् 'सजातीयभेदं निराकृत्य विजातीयभेदं निराकरोति- सत्यं भिदा सत्यं भिदेति । सत्यपदेन पञ्चभूतात्मकं जगत् प्रतिपाद्यते । सच्च त्यच्चाभवदिति श्रुतेः । तत्र सदिति पृथिव्यप्तेजांसि । त्यदिति वाय्वाकाशौ । तदेव भिद्यत इति भिदा । असत्यमनिर्वचनीयम् । तस्य दार्ढ्याय पुनरुक्तिः । 'भिदाऽसत्यं भिदा' इति काकाक्षिगोलकन्यायेन असत्यम् इत्यस्योभयत्रानुषङ्गः । स्मृतिरपि भेदमपवदति-

विभेदजनके ज्ञाने नाशमात्यन्तिके गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ।। इति ।

'द्वा सुपर्णा' इत्यादिश्रुतीनामपि भेदपरत्वं निरस्तं प्राक् आकरे चातिविस्तरेणेति दिक्' (शां.पा.भू. पु.४५३) इत्यनेन तदपि न । अस्याः श्रुतेः ब्रह्मणः विजातीयपञ्चभूतादिभेदनिराकणपरत्वे ब्रह्मणः विजातीयपञ्चभूतात्मकत्वापत्तेः । असत्यमित्यस्यानिर्वचनीयमित्यर्थोऽपि दुर्वचः । असत्यमित्यनेनानिर्वचनीयमित्यस्य कथमप्यप्रतीतेः ।

किञ्चानिर्वचनीयत्वं नाम सद्विलक्षणत्वम् उतासद्विलक्षणत्वम् आहोस्वित् सदसद्विलक्षणत्वम् । आद्ये शशविषाणादीनामत्यासताम् अनिर्वचनीत्वापत्तिः । द्वितीये ब्रह्मणोऽप्यनिर्वचनीयत्वापातः । तृतीयं तु विरुद्धमित्यादिदूषणबलेन निरस्तत्वाच्च । एवञ्चोक्तश्रुतेः भेदनिराकरणपरत्वाभावे प्राप्ते सति श्रुत्यनुसारेणैव स्मृत्यर्थस्य कल्पनीयतयोक्तस्मृतेः 'विभेदजनके= भगवद्रूपाणां मिथो विभेदज्ञानजनके ज्ञाने नाशमात्यतिकं गते सत्यात्मनः= स्वस्वरूपस्य रामकृष्णादेः ब्रह्मणः सकाशाद् भेदं कः करिष्यति' इत्यर्थस्यैवोपगन्तव्यतया नास्याः स्मृतेः ब्रह्मणि जीवजडात्मकप्रपञ्चभेदबाधकत्वम् । 'द्वा सुपार्णा' इत्यादिश्रुतीनां च भेदपरत्वमेव साधितं प्रागिति सर्वमवदातम् ॥

आनन्दादिगुणैः पूर्णं जगत्कारणमञ्जसा ।
ऋगादिशास्त्रसंवेद्यं वन्दे जिज्ञास्यमच्युतम् ॥

॥ ॐ अन्तस्तद्धर्मोपदेशात् ॐ ॥

(श्रुत्युक्तकप्यासपदस्य अर्थजिज्ञासा)

यदत्रोक्तम् परेण,

'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते । हिरण्यश्मश्रुः हिरण्यकेश आप्रणखात् सर्व एव सुवर्णः । तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी । तस्योदिति नाम । स एष सर्वेभ्यः पाप्मभ्य उदित उदेति हि वै सर्वेभ्यः पाप्मभ्यः य एवं वेद इत्यधिदैवतम् । अथाध्यात्मं य एषोऽन्तरक्षिणि पुरुषो दृश्यते' इत्यादि ।

आप्रणखात् प्रणखो= नखाग्रम्, तदभिव्याप्य **तस्य यथा कप्यासं पुण्डरीकम्** इत्यत्र कप्यासशब्दः लक्षणया तत्सदृशपरः । **आस्ते** उपविशत्यनेनेति **आसः** । **कपेः** मर्कटस्य **आसः** गुदभागः । तत्सदृशं रक्तवर्णमिति पर्यवसितोऽर्थः।' इति स्वमतरीत्या कप्यासशब्दस्यार्थमुपवर्ण्य, 'अन्यैस्तु, अस्मिन्नर्थे कप्यासपदे लक्षणा, कप्यासपदस्योक्तरीत्या मर्कटगुदपरत्वे हीनोपमा च स्यादिति मत्वा कम्= जलम्, किरणद्वारा पिबतीति **कपिः** सूर्यः । तेनासितं विकसितं कप्यासम् । यद्वा कं जलं पिबतीति **कपिः** पद्मनालः । तत्रास्त इति कप्यासमिति पुण्डरीविशेषणे बहुव्युत्पत्तयो दर्शिताः' इत्यनेन कप्यासशब्दस्यार्थमनूद्य 'तत्र योगाद् रूढिर्बलीयसीति न्यायेन कपिशब्दस्य रूढ्यर्थग्रहणसम्भवे योगाश्रयणं न न्याय्यम्' (शां.पा.भू. पु.४५६) इति बाधकमभिधाय 'अत्रादित्याक्ष्णोरन्तःस्थत्वेन प्रतीयमानः विद्याकर्मातिशयवशात् प्राप्तोत्कर्षः कश्चिदादित्यपुरुषरूपदेवताविशेषरूपो जीवः, आहोस्वित् परमात्मेति

संशयः। ऐश्वर्यमर्यादाधारत्व-रूपवत्त्वाद्यनीश्वरधर्माणां सर्वपाप्मोदित-त्वादीश्वरधर्माणां च बलाबलानवधारणात्। तत्रादित्यान्तस्थः तावत् परमेश्वरो न भवितुम् अर्हति। 'य एषोऽन्तरादित्ये' इत्याधारश्रवणा-दपरिच्छिन्नस्य स्वमहिमप्रतिष्ठितस्य निराधारस्य च तस्याधारायोगात्। 'स्वे महिम्नि प्रतिष्ठितः' इति श्रुतेः। 'स एष ये चामुष्मात् परांचो लोकास्तेषां चेष्टे देवकामानाम्' इति ऐश्वर्यमर्यादाश्रवणाच्च। 'एष सर्वेश्वरः' इति श्रुत्या परमेश्वरस्य निरङ्कुशैश्वर्यावगतेः हिरण्यश्मश्रुरिति रूपश्रव-णाच्च। 'अशब्दमस्पर्शमरूपमव्ययम्' इति श्रुत्या ब्रह्मणो नीरूपत्वाव-गमात्। एवमक्षिस्थोऽपि न परमेश्वरः, चक्षुषीत्याधारश्रवणात्। 'ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां च' इत्यैश्वर्यमर्यादाश्रव-णात्। 'तस्यैतस्य तदेव रूपं यदमुष्य रूपम्' इत्यतिदेशेनाक्षिस्थेऽपि रूपश्रवणादादित्यपुरुषरूपदेवतात्मा जीव एवेहान्तस्थ इति प्रतिपत्तुं युक्तम्। तादृशजीवविशेषस्य विद्याकर्मातिशयवशात् प्राप्तोत्कर्षस्य सर्वमेतद्युक्तमिति पूर्वपक्षे सिद्धान्तः- 'अन्तस्तद्धर्मोपदेशात्'। अन्तरिति शब्द आदित्येऽक्षिणि चान्तर्विद्यमानपुरुषोपस्थापकः। ब्रह्मपदं चात्र सम्बध्यते। आदित्यान्तस्थः तावत् परमेश्वर एव। **तस्य** परस्य ब्रह्मणो ये धर्माः 'य आत्मा अपहतपाप्मा, इदं सर्वं यदयमात्मा' इति श्रुत्यन्तरे परमात्मधर्मतया निर्णीताः सर्वपाप्मोदितत्व-सार्वात्म्यादयः तेषामुप-देशादित्यादिना' (शां.पा.भू. पु. ४५८) तत्रोच्यते-

यदुक्तम्, 'योगाद्रूढिर्बलीयसीति न्यायेन कपिशब्दस्य रूढ्यर्थग्रहण-सम्भवे योगाश्रयणं न न्याय्यम्' इति तन्न। असति बाधके तथा। सति बाधके रूढिपरित्यागेन योगाश्रयणस्यैव न्यायत्वात्। प्रकृते हीनोपमैव

बाधकम् । यदत्रोक्तम्- 'माघकाव्ये सायङ्कालो वर्ण्यमानश्रीकृष्णस्य उपमानत्वेन निबद्ध इति न हीनोपमानस्य बाधकत्वम्' (शां.पा.भू. पु. ४५७) इति तन्न । सायङ्कालस्य कपिगुदवन्नीचत्वाभावात् । किञ्च कविवर्णनप्रकरणे तथा सम्भवेऽपि प्रकृते न तथा सम्भवति । अस्य ब्रह्मोपासनाप्रकरणत्वात् । तथैव त्वयाऽङ्गीकृतत्वात् । प्रसादार्थं ब्रह्मोपासना हीनोपमानोपसनया ब्रह्मकोप एव स्यान्न तु तत्प्रसादः । लोके तथा दर्शनात् । नच हीनोपमानपुण्डरीकोपमानत्वमात्रेण चक्षुषि हीनोपमाप्रसक्तिरिति वाच्यम् । हीनसदृशसादृश्योक्तौ हीनसादृश्यस्याप्युक्तत्वेन प्राप्ततया हीनोपमाप्रसक्तेरनिवारणात् ।

किञ्च, कविवर्णनप्रकरणेऽपि कैश्चित्कविभिरक्ष्णोः विकसितकमलसादृश्यं विना मर्कटगुदभागसदृशम्, पुण्डरीकसादृश्यं नह्युपवर्णितम् । किञ्चात्र कपिपदस्य रूढेरङ्गीकारे कप्यासपदस्य तत्सदृशे लक्षणा च स्यात् । नच कपिपदस्य सूर्यवाचकत्वे योगाङ्गीकरणं प्राप्तमिति रूढ्यपेक्षया जघन्यवृत्तिस्वीकारे साम्यमिति वाच्यम् । योगतोऽपि लक्षणायाः जघन्यवृत्तित्वात् ।

तत्रादित्याद्यन्तस्थस्तावन्न परमेश्वरो भवितुमर्हति । किन्तु जीव एवेति पूर्वपक्षो न युक्तः । तथाहि, स किं जीवब्रह्मणोर्भेदमवलम्ब्योताभेदम् । नान्त्यः । आदित्याद्यन्तः जीव एव न परमेश्वर इति पूर्वपक्षानुत्थितेः, तयोरभेदात् । नाद्यः । जीवब्रह्मणोर्भेदमवलम्ब्य पूर्वपक्षे जीवब्रह्मणोरभेदावलम्बिना सिद्धान्तेन भाव्यम् । न तथा सिद्धान्तः कृतः त्वया । आदित्यान्तस्थः परमेश्वर एव न जीव इति सिद्धान्तकरणात् । तथा सिद्धान्तकरणेऽपसिद्धान्तश्च । त्वया जीवब्रह्मणोरभेदाङ्गीकारात् ।

नचौपाधिकभेदमादाय सिद्धान्तोपपत्तिरिति वाच्यम् । पूर्वमुपाधिनिराकरणेन तस्य दूषितत्वात् ।

किञ्च सिद्धान्ते ये मरमात्मधर्मतया निर्णीताः सर्वपाप्मोदितत्वसार्वात्म्यादयस्तेषामुपदेशादित्यपि न । त्वया ब्रह्मणो निर्धर्मिकत्वाङ्गीकारात् ।

(परोक्ताधिकरणार्थविमर्शः)

''यत्तु चन्द्रिकायाम्- अन्येत्वित्यादिना निरुक्तपूर्वपक्षसिद्धान्तावनूद्य 'नीरूपे ब्रह्मणि रूपादि यद्युपासनार्थमुच्यते जीवेऽपि पाप्माभावादि तर्हि उपास्त्यर्थमुच्यताम् । त्वन्मते उपास्य नामवागादौ ब्रह्मत्वधेनुत्वादेः प्रातीतिकत्वनियमेनात्रापि तथैव वक्तुं युक्तत्वात् जीवे पाप्माभावादेर्व्यावहारिकस्यासम्भवेऽपि न क्षतिः । त्वन्मते उपासनावाक्यस्य तत्कर्तव्यतामात्रपरत्वेन स्वार्थपरत्वाभावात् । कर्तव्यतायां च व्यावहारिकप्रातिभासिकविभागानपेक्षणात् । श्रुतौ श्रद्धालुना श्रुत्योः विषयभेदेन तात्विकविषयत्वस्यैव वक्तव्यतापाताच्च ।

किञ्च, ब्रह्मणि हिरण्यश्मश्रुत्वादेर्मानान्तराप्राप्ततया तद्वाक्यस्यानुवादकत्वाभावेन तद्वाक्यं तत्परमेव वाच्यम् । तथाच तस्य तात्विकत्वं दुर्वारमेव । यच्चोपादानं ब्रह्म कार्यकारणयोरभेदात् कार्यधर्मैर्व्यपदिश्यत इत्युक्तं तन्न । स्वर्णे कटकत्वादेरिव, कटकादावपि स्वर्णत्वव्यवहारेण ब्रह्मधर्मैः कार्येऽपि व्यपदेशापातात्' इति दूषणमुक्तम्'' इत्यनेन चन्द्रिकोक्तदूषणमुद्भाव्य तत्रोच्यत इत्यभिधाय यदुक्तम्- 'यद्यपि नाम ब्रह्मेत्युपासीत, वाचं धेनुमुपासीतेत्यादावुपास्यस्य प्रातिभासिकत्वम् अस्ति । तथापि न सर्वत्रापि तथैव वाच्यमित्यस्ति नियमः, माना-

भावात्। परन्तु मनोवृत्तीनां प्रामाण्यस्यौत्सर्गिकतया तत्सम्भवे विषयस्याबाध्यत्वमेव, तत्र त्रिकालाबाध्यत्वं शुद्धस्यैव ब्रह्मण इति तद्विषयकज्ञानध्यानादीनामेव मुख्यं प्रामाण्यम्। यत्र च प्रमाणान्तरेण बलवता विरोधात् न त्रिकालाबाध्यत्वं विषयस्य सम्भवति, तस्मादर्थक्रियादिकं च दृश्यते, न दृश्यते च व्यवहारदशायां बाधः, तत्र तद्विषयकज्ञानध्यानादीनां व्यवहारकालाबाध्यविषयकत्वलक्षणव्यावहारिकप्रामाण्यमेव। यत्र व्यवहारकाल एव विषयस्य बाधः तत्र तद्विषयकज्ञानध्यानादीनां द्विविधस्यापि यथार्थत्वापरपर्यायस्य प्रामाण्यस्यासम्भवादयथार्थत्वमेव' (शां. पा.भू. पु. ४६३) इत्यादिना। तत्रोच्यते- तत्सम्भवे विषयस्याबाध्यत्वमेवेत्यनेन ज्ञाने प्रामाण्यसम्भवे विषयगतत्रिकालाबाध्यत्वस्य यन्निमित्तत्वोपादानं तन्न। विषयगतत्रिकालाबाध्यत्वरूपसत्यतायाः मानगतप्रामाण्याधीनतया ज्ञाने प्रामाण्यसत्त्वे विषये त्रिकालाबाध्यत्वलक्षणं सत्यत्वम्, विषये त्रिकालाबाध्यत्वसत्त्वे ज्ञाने प्रामाण्यमिति प्राप्त्याऽन्योन्याश्रयात्।

किञ्च त्रिकालाबाध्यत्वं च त्रैकालिकनिषेधाप्रतियोगित्वम्। तच्च कुत्रापि नास्ति। न च शुद्धे ब्रह्मण्येव तत्प्रसिद्धमिति वाच्यम्। तस्यापि व्यावहारिकत्वेन त्रैकालिकनिषेधप्रतियोगित्वात्। नच पारमार्थिकत्वेन त्रैकालिकनिषेधाप्रतियोगित्वं त्रिकालाबाध्यत्वम्। शुद्धस्य ब्रह्मणः व्यावहारिकत्वेन त्रैकालिकनिषेधप्रतियोगित्वसत्त्वेऽपि तस्य पारमार्थिकतया पारमार्थिकत्वेनोक्तनिषेधप्रतियोगित्वाभावात् त्रिकालाबाध्यत्वं शुद्धस्याक्षतमिति वाच्यम्। धर्मसामान्यविधुरे ब्रह्मणि पारमार्थिकत्वरूपधर्मस्याप्यभावेन तस्य पारमार्थिकत्वेनोक्तनिषेध-

प्रतियोगित्वस्य प्राप्त्या शुद्धस्यापि त्रिकालाबाध्यत्वायोगात् । धर्माणां ब्रह्मण्यङ्गीकारे च 'सत्यं ज्ञानमनन्तम्' इत्यत्र सत्यत्वादीनां ब्रह्मलक्षणत्वं विहाय लक्ष्यलक्षणयोः काल्पनिकं भेदमादाय सत्यादीनां ब्रह्मलक्षणत्वोक्तिस्त्वदीया व्याहन्येत । सत्यत्वादीनामेव ब्रह्मलक्षणत्वसम्भवात् ।

किञ्च, पारमार्थिकत्वस्योक्तत्रिकालाबाध्यत्वरूपतया तत्रोक्तरीत्या पारमार्थिकत्वस्य प्रवेशापत्त्या तादृशपारमार्थिकत्वस्योक्तनिषेधाप्रतियोगित्वरूपत्रिकालाबाध्यत्वरूपतया पुनश्च तत्र पारमार्थिकत्वस्य प्रवेशतापत्त्याऽनवस्थापातात् ।

किञ्च, व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेन पारमार्थिकत्वावच्छिन्नजगत्प्रतियोगिकाभावासत्त्वेन पारमार्थिकत्वावच्छिन्ननिषेधप्रतियोगित्वाभावस्य जगति सम्भवेन तस्यापि त्रिकालाबाध्यत्वापत्तिः । व्यधिकरणधर्मावच्छिन्नाभावाभ्युपगमे चोक्तनिषेधप्रतियागित्वस्य पारमार्थिकत्वेनाभावः जगत्यक्षत इति तत्र त्रिकालाबाध्यत्वापत्तिर्दुर्वारैव । जगत्युक्तनिषेधप्रतियोगित्वस्यापि ब्रह्मातिरिक्तत्वेन व्यावहारिकतया पारमार्थिकत्वस्योक्तनिषेधप्रतियोगित्वनिष्ठप्रतियोगिताव्यधिकरणत्वात् । उक्तनिषेधप्रतियोगित्वत्वावच्छिन्नाभावनिवेशेऽपि तथाविधप्रतियोगित्वत्वेन घटाभावमादायोक्तदोषो दुर्वार एव । उक्तनिषेधप्रतियागित्वत्वावच्छिन्नोक्तनिषेधप्रतियोगित्वनिष्ठप्रतियोगिताकाभावनिवेशेऽपि तादृशप्रतियागित्वत्वेन तादृशप्रतियोगित्वघटोभायाभावमादाय पूर्वोक्तदोषतादवस्थ्यम् । व्यधिकरणधर्मावच्छिन्नाभावस्य तन्त्रान्तरे खण्डितत्वाच्च । त्रिकालाबाध्यत्वस्य पारमार्थिकत्वेन त्रैकालिकनिषेधाप्रतियोगित्वरूपतायाः वक्तुमशक्यतया स्वरूपेण त्रैकालिकनिषेधाप्रति-

योगित्वस्यैव त्रिकालाबाध्यतारूपतायाः वक्तव्यतया तादृशत्रिकाला-बाध्यत्वस्य जगत्यपि सम्भवेन त्रिकालाबाध्यत्वं शुद्धस्यैव ब्रह्मण इत्यनुपपन्नम् ।

यदुक्तम्, व्यवहारकालाबाध्यविषयकत्वलक्षणं व्यावहारिकप्रामाण्यम इति तदपि न। शुद्धस्य ब्रह्मणः त्रिकालाबाध्यतया व्यवहारकालाबाध्यत्व-स्यापि सत्त्वेन शुद्धज्ञानाध्यासादीनां व्यवहारकालाबाध्यविषयकत्वप्राप्त्या तेषामपि व्यावहारिकप्रामाण्यापत्तेः । नच व्यवहारकालाबाध्यबाध्य-विषयकत्वात् जगज्ज्ञानानां प्रामाण्यं व्यावहारिकम्। शुद्धस्य व्यवहार-कालाबाध्यत्वेऽपि बाध्यत्वाभावान्न शुद्धज्ञानानां व्यावहारिकप्रामाण्या-पत्तिरिति वाच्यम्। बाध्यत्वस्य प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगि-त्वरूपतया तत्र त्रैकालिकनिषेधः पारमार्थिकत्वेनोत स्वरूपेणेति विकल्प्य तत्र तत्र दोषमुद्भाव्य तव बाध्यत्वदुर्वचत्वस्योक्तत्वात् व्यवहारकालाबाध्य-बाध्यविषयकत्वलक्षणं व्यावहारिकं प्रामाण्यमित्यङ्गीकर्तुमशक्यत्वात् ।

किञ्च, शुक्ताविदं रजतमिति प्रातिभासिकज्ञानस्यापि व्यावहारिक-प्रामाण्यापत्तिः । इदमंशस्य व्यवहारकालाबाध्यतया ब्रह्मज्ञानबाध्यतया च तथाविधज्ञानस्य व्यवहारकालाबाध्यबाध्यशुक्तिविषयकत्वात् । 'यत्र व्यवहारकाल एव विषयस्य बाधः' इत्यादिना यत्तवाभिप्रेतं व्यवहारकाल एव प्रतिपन्नोपाधौ निषेधप्रतियोगित्वज्ञानं बाधः, तद्विषयत्वं बाध्यत्वम्, तादृशबाध्यत्वाश्रयविषयकत्वमप्रामाण्यमिति तदपि न। असञ्जातबाध-ज्ञानभ्रमस्याप्रामाण्यानापत्तेः । तदुत्तरं बाधज्ञानानवतारेण तादृशभ्रम-विषयस्योक्तबाध्यत्वाप्राप्त्या तादृशभ्रमस्य व्यवहारकालबाध्य-विषयकत्वाभावात् ।

नच प्रतिपन्नोपाधौ व्यवहारकालावच्छेदेन निषेधप्रतियागित्वमेव बाध्यत्वम्। तच्च बाधज्ञानानवतारेऽप्येतादृशं बाध्यत्वं तादृशभ्रमविषयस्याक्षतमिति नोक्तभ्रमस्य प्रामाण्यानापत्तिरिति वाच्यम्। शुक्तिरजतेऽपि व्यवहारकाले प्रातिभासिकस्वरूपस्य त्वयाऽङ्गीकृततया तस्मिन् स्वरूपेण निषेधप्रतियागित्वासम्भवात्। व्यावहारिकत्वेनोक्तनिषेधप्रतियोगित्वविवक्षायां तु शुद्धस्य व्यावहारिकत्वाभावेन व्यावहारिकत्वेनोक्तनिषेधप्रतियोगित्वस्य शुद्धे ब्रह्मण्यपि सम्भवेन शुद्धज्ञानध्यानादीनामप्येतादृशबाध्यार्थविषयकत्वेनाप्रामाण्यापत्तेः।

यच्चोक्तम् 'नापि श्रुतिद्वयस्य विषयभेदेन तात्विकविषयकत्वकल्पनं युक्तम्' इत्यभिधाय 'श्रुतिद्वये समानबलत्व एव तत्कल्पनाप्रसरात्। प्रकृते च न तथा। अद्वैतश्रुतेरुपक्रमादितात्पर्यसचिवत्वेन बलवत्त्वात्। रूपवत्त्वादिबोधकश्रुतेश्च ध्येयध्यानाङ्गगुणसमर्पकतया तद्वैशिष्ट्ये तात्पर्याभावात्' (शां.पा.भू. पु.४६४) इत्यनेन तदपि न। उपक्रमादितात्पर्यसचिवतयाऽद्वैतश्रुतेः प्राबल्येऽपि रूपवत्त्वादिबोधकश्रुतेः रूपवत्त्वादिवैशिष्ट्ये तात्पर्ये बीजाभावः। नचोक्तरीत्याऽद्वैतश्रुतेः प्रबलतया, तस्याः स्वार्थे तात्पर्याभावस्य वक्तुमशक्यतया, स्वार्थस्याद्वैतस्य तु रूपवत्त्वादीनां मिथ्यात्वं विनाऽसम्भवात्। अतः प्रबलाद्वैतश्रुतिविरोधेन रूपवत्त्वादिबोधकश्रुतीनां रूपवत्त्वादिवैशिष्ट्ये तात्पर्याभावः कल्पनीय इति वाच्यम्। भेदप्रतिपादकबह्वागमविरोधेन श्रुतीनामद्वैतपरताया एव वक्तुमशक्यत्वात्।

किञ्च 'स आत्मा तत्वमसि' इत्यत्र 'अतत् त्वमसि' इति पदच्छेदस्यापि सम्भवेनाद्वैतश्रुतेरभावाच्च। किञ्च,

'न तादृशी प्रीतिरीड्यस्य विष्णोः गुणोत्कर्षज्ञातरि यादृशी स्यात्' इत्यादिप्रमाणैः ब्रह्मणि गुणपूर्णसमर्पणेनैवोपासनायाः भगवत्प्रसाद-साधनत्वावगमात् रूपवत्त्वादिबोधकश्रुतीनां स्वार्थे तात्पर्याभावस्य वक्तुमशक्यत्वाच्च ।

किञ्च, ब्रह्मणि रूपवत्त्वादीनां मिथ्यात्वे हि रूपवत्त्वादिबोधकश्रुतीनां स्वार्थे तात्पर्याभावकल्पना । न तदस्ति ।

'यदा पश्यः पश्यते रुग्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्' इत्यादिश्रुत्या ब्रह्मणि रूपस्य सिद्धतया बादरायणेन 'रूपोपन्यासाच्च' इति सूत्रेण साधिततया ब्रह्मणि रूपस्य सत्यत्वाच्च । नच श्रुतिसूत्र-योर्मिथ्याभूतं रूपं प्रतिपाद्यत इति वाच्यम् । तथासति मिथ्याभूतरूप-प्रतिपादकतया श्रुतिसूत्रयोरप्रामाण्यापातात् । नच व्यावहारिकसत्यं रूपादिकं ब्रह्मण्यस्ति । तत्प्रतिपादकतया हिरण्यश्मश्रुरित्यादेः प्रामाण्यं सम्भवतीति वाच्यम् । त्वन्मते उपास्यनामवागादौ ब्रह्मत्व-धेनुत्वादेः प्रातीतिकत्वनियमेन तत्र प्रातिभासिकत्वमिवात्राप्युपास्यवस्तुगतरूपादेः प्रातिभासिकत्वेन तत्प्रतिपादकहिरण्यश्मश्रुरित्यादेः प्रामाण्या-सम्भवात् ।

नच ध्येयस्य ब्रह्मतया तत्र ध्यानाङ्गरूपादीनामारोपिततया ब्रह्मण्या-रोपितत्वमात्रेण रूपादीनां व्यावहारिकत्वं सम्भवति । ब्रह्मण्यारोपितस्य व्यावहारिकत्वादिति वाच्यम् । नहि ब्रह्मण्यारोपितं सर्वं व्यावहारिकमिति नियमः । ब्रह्मण्यारोपितस्य क्षणिकत्वादेस्त्वया प्रातिभासिकत्वाङ्गी-कारात् ।

किञ्च, ब्रह्मणः वाङ्मनोऽगोचरत्वस्य त्वयाऽङ्गीकृततया ध्येयस्य वस्तुनः ब्रह्मत्वासम्भवेन ध्येयवस्तुप्रतीतरूपादीनां ब्रह्मण्यारोपितत्वाभावाच्च ।

'यच्च स्वर्णे कटकत्वादेरिव कटकादौ स्वर्णत्वव्यवहारेण ब्रह्मधर्मैः कार्य एव व्यपदेशापातात्' (शां.पा.भू. पु. ४६५) इति दूषणमुक्तमित्यनेन चन्द्रिकोक्त-दूषणमुपपाद्य तदप्यविचाररमणीयमिति प्रजल्प्य यदुक्तम् 'कार्यकारणयोरभेदात् क्वचित् केनचित् कारणधर्मेण कार्यव्यपदेशोऽपि न सर्वैरेव कारणधर्मैः कार्यं व्यपदिश्यत इति वक्तुं शक्यम् । किन्तु यत्र यत्र बाधकानुपलम्भस्तेन तेनैव । तथाच सर्वकार्यसाधारणयत्किञ्चित्-सत्त्वादिब्रह्मधर्मेण कार्यव्यपदेशोपि सर्वपाप्मोदितत्व-इन्द्राद्यात्मक-त्वोपलक्षितसर्वतादात्म्यादिनापि नादित्यव्यपदेशः सम्भवति । सशरीरत्व-नियतपापादिमत्वासार्वात्म्यादिविरुद्धधर्मोपलम्भात् । सर्वात्मके ब्रह्मणि च सर्वधर्मवत्त्वस्याविरोधात्' (शां.पा.भू. पु. ४६५) इत्यादिना । तदपि न । विरुद्धधर्मोपलम्भादित्यत्र धर्मेषु किं परस्परविरहरूपत्वमुत परस्परविरहव्याप्यत्वम् । नाद्यः । पापादिमत्त्वस्य सर्वतादात्म्यादेः परस्परविरहरूपत्वाभावात् । न द्वितीयः । एकस्मिन्नेव ब्रह्मचैतन्येऽन्तः-करणाद्युपाध्यवच्छेदेन पापादिमत्त्वस्य स्वरूपेण सर्वात्मकतायाश्च त्वयाऽङ्गीकृततया तयोः परस्परविरहव्याप्यत्वस्यासम्भवात् ।

एतेन, असामानाधिकरण्यरूपविरोधोऽपि परास्तः । नचैककाला-वच्छिन्नासामानाधिकरण्यं विरोधः । एकस्मिन्नेव चैतन्ये व्यवहारकाले पापादिमत्त्वस्य मुक्तिकाले सर्वात्मकतायाश्चाङ्गीकृततया पापादिमत्त्व-सर्वतादात्म्ययोस्तूक्तविरोधः सुलभ इति वाच्यम् । विस्मृतकण्ठमणिन्यायेन जीवस्य ब्रह्मभावरूपमुक्तिमभिधास्यता त्वया व्यवहारकालेऽविद्यमाना

सर्वात्मता मुक्तिकाले उत्पन्नेति वक्तुमशक्यतया ब्रह्मचैतन्ये व्यवहार-काल एवान्तःकरणाद्युपाध्यवच्छेदेन पापादिमत्तायाः, स्वरूपेण सर्व-तादात्म्यस्य चाङ्गीकर्तव्यतया पापादिमत्त्वसर्वतादात्म्ययोरेककाला-वच्छिन्नसामानाधिकरण्यसम्भवेन तयोरेककालावच्छिन्नासामानाधि-करण्यरूपविरोधस्याप्यसम्भवात् । तस्मात् पापादिमत्त्वसर्वात्मकत्वा-दीनां परस्परविरोधस्यासम्भवदुक्तिततया सर्वात्मकत्वादिब्रह्मधर्मैः कार्ये जीवे व्यपदेशस्य विरुद्धधर्मोपलम्भरूपबाधकाभावात् सर्वात्मकत्वादि-ब्रह्मधर्मैः कार्य एव व्यपदेशापातादिति दूषणं चन्द्रिकोक्तमतीव रमणीयमिति दिक् ।

'यत्तु चन्द्रिकायाम्- सविशेषनिरूपणं मोक्षसाधननिर्विशेषज्ञानार्थम् इत्यनेनोक्तार्थमनूद्य तन्न निर्विशेषशब्देन विशेषाभावविशिष्टस्योक्तौ त्वन्मते विशिष्टज्ञानस्य मोक्षाहेतुत्वात् तदभावोपलक्षितस्योक्तौ काकेन गृहसंस्थानविशेषस्येव विशेषाभावेनोपलक्ष्यान्तरस्यैवाभावात् । विशेष्य-स्यैवोपलक्ष्यत्वे तस्य विशिष्टग्राहिणा ज्ञानेन प्रागेव ज्ञातत्वात्' इत्यादिना चन्द्रिकोक्तं दूषणमुपपाद्य तदसदिति प्रजल्प्य यदुक्तम्- 'निर्विशेष-शब्देन सकलविशेषाभावोपलक्षितं ब्रह्मैव विवक्षितम् । तेन विशिष्टात्म-ज्ञानस्य मोक्षहेतुत्वाभावेऽपि न क्षतिः । यदुपस्थितधर्मान्तरवत्तया ज्ञात एव विधेयस्य विधेयवदन्यव्यावृत्तेर्वा बोधः तस्योपलक्षणत्वमिति नियमस्य काकादिरूपोपलक्षणोपस्थितोत्तृणत्वादिधर्मान्तरवत्तया ज्ञात एव देवदत्तगृहत्वस्य देवदत्तगृहेतरव्यावृत्तेर्देवदत्तगृहे बोधात् । नानाव्यक्ति-गतकाकादिरूपोपलक्षणधर्मे धर्मान्तरोपस्थापकतानियमदर्शनेन सम्भवेऽप्येकव्यक्तिमात्रगतोपलक्षणे न तादृशनियमसम्भवः । तथाहि-

देहसंस्थानविशेषविशिष्टेदमर्थस्य तदन्यव्यावृत्तेश्च प्रत्यक्षसिद्धतया सोऽयमित्यादिवाक्येन तद्बोधने तादृशवाक्यवैय्यर्थ्यात्, सोऽयमित्यादि-वाक्यात् तत्तादिरूपैकव्यक्तिमात्रगतोपलक्षणोपस्थितदेहसंस्थान-रूपधर्मान्तरवतीदमर्थस्य तद्व्यावृत्तेर्वा धियोऽसम्भवापातात् तत्र तादृश-नियमस्य वक्तुमशक्यत्वात् । तस्मात् धर्मस्य धर्मिणो वोपस्थितिद्वारा स्वाविषयकं स्वाश्रयविषयकं ज्ञानं येन जन्यते तस्मिन् स्वाश्रयज्ञानस्योप-लक्षणत्वमिति सर्वोपलक्षणसाधारणनियमस्य वाच्यतया तादृशोप-लक्षणत्वस्य धर्मान्तरानुपस्थापके विशेषाभावेऽपि सम्भवात्' (शां.पा. भू. पु. ४६७) इत्यादिना तदसत् । तथाहि, यत्र नानाव्यक्तिगतमुपलक्षणं तत्र धर्मान्तरोपस्थितिद्वारा लक्ष्योपस्थापकम् । यत्रैकव्यक्तिमात्रगत-मुपलक्षणं तत्र न पूर्वोक्तनियमः । किन्तु धर्मान्तरोपस्थितिमन्तरा तस्योपस्थाकमिति । तथाच नानाव्यक्तिगतकाकादिरूपोपलक्षण-स्थले तथा नियमसत्त्वेऽपि ब्रह्मणि विशेषाभावरूपोपलक्षणेन न तादृश-नियमः । तत्तादिरूपैकव्यक्तिमात्रगतेनोपलक्षणेन धर्मान्तरानुपस्थित्या देवदत्तरूपलक्ष्योपस्थितेरिव ब्रह्मण्यपि विशेषाभावरूपोपलक्षणस्य धर्मान्तरोपस्थितिमन्तरा लक्ष्यब्रह्मोपस्थापकत्वं सम्भवतीत्युक्तं भवत्यनेन ।

अत्रोच्यते । काकादिरूपोपलक्षणस्यापि देवदत्तगृहगतोत्तृणत्वादिरूप-धर्मोपस्थाकत्वम्, देवदत्तगृहत्वरूपविधेयोपस्थाकत्वम्, तथाविधग्रहे इतरव्यावृत्तिबोधकत्वं वा लिङ्गविधयैव वाच्यम् । इत्थञ्च काकादिस्ता-वदुक्तधर्मोपस्थापकः न काकत्वेन लिङ्गविधया । काकस्य कालान्तरे देवदत्तगृहातिरिक्तवृत्तितया तत्र देवदत्तगृहगतोत्तृणत्वस्य देवदत्तगृहत्व-

रूपविधेयस्य वाऽभावात् । अत एतत्कालावच्छिन्नकाकस्यैतत्काला-वच्छिन्नकाकसम्बन्धस्य वा लिङ्गविधयोक्तधर्मोपस्थाकता वक्तव्या । एवञ्चैतत्कालावच्छिन्नकाकस्य तथाविधकाकसम्बन्धस्य वा लिङ्गस्य देवदत्तगृहातिरिक्ते न सत्त्वम्, काकस्य केवलगृहान्तरे सत्त्वेऽपि तस्य कालान्तरावच्छेदेनैव गृहान्तरे विद्यमानतया एतत्कालावच्छिन्नकाकस्य तत्सम्बन्धस्य वैतत्कालरूपविशेषणाभावेन विशिष्टस्य तत्रावृत्तितया गृहान्तरे हेतोरभावेन तत्र साध्याभावेऽप्युक्तव्यभिचारानवकाशात् । तथाचोक्तविशेषणविशिष्टकाकरूपोपलक्षणस्य देवदत्तगृहमात्रवृत्तेरपि धर्मान्तरोपस्थितिद्वारा देवदत्तगृहत्वरूपविधेयोपस्थितिसम्भवेनैक-मात्रगतोपलक्षणेन तादृशनियमसम्भवः इत्यनुपपन्नम् ।

नानाव्यक्तिगतकाकादिरूपोलक्षणधर्मे धर्मान्तरोपस्थाकतानियम-दर्शनेन तादृशनियमस्य सम्भवेऽपीत्यनुपन्नम् । नानाव्यक्तिगतकाकादेः लिङ्गविधया देवदत्तगृहमात्रवृत्तिधर्मान्तरोपस्थाकत्वस्य व्यभिचारेणा-सम्भवस्योक्तत्वात् ।

तत्तादिरूपैकमात्रगतोपलक्षणोपस्थितदेहसंस्थानरूपधर्मवतीदमर्थस्य तद्व्यावृत्तेर्वा धियः सम्भवापातादित्यपि न सत्, इष्टापत्तेः । तत्र देवदत्त-गततत्तायाः देवदत्तगतसंस्थानविशेषसामानाधिकरण्येनैव पूर्वमनुभूततया संस्कारोद्बोधे सति तत्तोपस्थितौ ततः देवदत्तदेहगतसंस्थानविशेषोपस्थित्या देवदत्ते इदमर्थस्य तद्व्यावृत्तेर्वा धियः सम्भवात् । यदुक्तं 'तस्मात् धर्मस्य धर्मिणो वोपस्थितिद्वारा स्वाविषयकस्वाश्रयविषयकं यत् ज्ञानं येन जन्यते तस्मिन् स्वाश्रयज्ञाने तस्योपलक्षणत्वमिति सर्वोपलक्षणसाधारण-नियमस्य वाच्यतया' इति तदप्यसङ्गतम् । ब्रह्मणि विशेषाभावरूपधर्म-

स्योपलक्षणत्वाभावपत्तेः। ब्रह्मणः निर्धर्मिकत्वेन तस्य धर्मोपस्थितिद्वारा स्वाश्रयविषयकज्ञानजनकत्वाभावस्य त्वयाऽङ्गीकृतत्वात्।

किञ्च 'सोऽयं देवदत्तः' इत्यत्र तत्तायाश्चोपलक्षणत्वाभावापत्तेः। 'सोऽयं देवदत्तः' इत्यतः तत्ताविषयकस्यैव ज्ञानस्य जननात्। अन्यथा 'सोऽयं देवदत्तः' इति वाक्याधीनबोधस्य 'देवदत्तः स न वा' इति संशयप्रतिबन्धकत्वं न स्यात्। तद्धर्मिणि तदभावबुद्धौ तद्धर्मिणि तदवगाहिनिश्चयस्य विरोधित्वात्।

'किञ्च सविशेषज्ञानं निर्विशेषज्ञानस्य न तावत् दृष्टद्वारा हेतुः। तद्विशिष्टज्ञानजन्येनाज्ञानध्वंसेन[1] वा चित्तवशीकरणेन वा तदभावविशिष्टज्ञानस्य, तदुपलक्षितज्ञानस्य वा क्वाप्यदर्शनात्' इत्यादिना चन्द्रिकोक्तं दूषणमुद्भाव्य 'एतेन तन्निरस्तम्' (शां.पा.भू. पु. ४७३) इत्यभिधाय यदुक्तम् 'उक्तरीत्या सविशेषज्ञानस्योपासनासाध्य-चित्तवशीकरणद्वारा निर्विशेषात्मविज्ञानहेतुत्वस्योक्तश्रुतिस्मृतिप्रमाणसिद्धतया 'क्वाप्यदर्शनात्' इत्युक्तेस्तदनालोचननिमित्तत्वस्य स्पष्टत्वात्' इत्यनेन तदसङ्गतम्। सविशेषज्ञानस्य निर्विशेषात्मविज्ञानहेतुत्वस्य स्थूलतारारुन्धतीन्यायेनैव त्वया वक्तव्यतयोक्तन्यायेन सविशेषज्ञानस्य निर्विशेषज्ञानहेतुतायाः पूर्वं निराकृतत्वात्। नापि सविशेषज्ञानं निर्विशेषज्ञानस्यादृष्टद्वारा हेतुः। अदृष्टस्य विहितक्रियाजन्यत्वेन सविशेषज्ञानजन्यत्वाभावात्। नापि ज्ञानप्रतिबन्धकदुरितनिवृत्तिद्वारा। तस्य नित्यं कर्तव्ययज्ञदानादिकर्मणैव निवृत्तेः।

---

१. विशिष्टज्ञानेन तदज्ञानं नश्यति। अथवा चित्तप्रावण्यं सम्पद्यते। तद्द्वारा विशेषणाभावविशिष्टशुद्धज्ञानं न क्वापि जायते।

एतेन ''किञ्च,

[१]'आद्यसूत्रे धर्मशब्दात् द्वितीये भेदशब्दतः ।
निर्धर्मिकत्वमैक्यं च निरस्तं परवस्तुनः ।
धर्मो भेदश्च मिथ्या चेत् श्रुतिसूत्राप्रमाणता ।
व्याख्याव्याजेन चोक्तत्वात् त्वया सौगतसौहृदात् ॥'

इति चन्द्रिक्तोक्तप्रलाप उन्मत्तप्रलाप एवेत्युपेक्षणीयः'' (शां.पा.भू. पु. ४७८) इति प्रजल्प्य 'भ्रमसिद्धमर्थं भ्रमसिद्धत्वेन बोधयतां श्रुतिसूत्राणामप्रमाणत्वासम्भवस्य चिज्ञासाधिकरण एवोक्तत्वात्' (शां.पा.भू. पु.४७८) इत्यनेन यदुक्तं तदसङ्गतम् । श्रुतिसूत्रयोः स्वविषयस्य भ्रमसिद्धत्वज्ञापकशब्दाभावाद् उन्मत्तप्रलाप इत्युक्तिः अतीव मूर्खत्वद्योतिका ।

किञ्च 'अन्तस्तद्धर्मोपदेशात्' इत्यत्र तद्धर्माणामपहतपाप्मत्वसर्वात्मकत्वादीनामीश्वरधर्माणां भ्रमसिद्धत्वाङ्गीकारे मिथ्याभूतैः तथाविधधर्मैरन्तस्थः ईश्वर एवेति सिद्धान्तकरणस्यानुपपन्नत्वाच्च । मिथ्याभूतानां तथाविधापहतपाप्मत्वादिधर्माणां जीवेऽपि सम्भवेन तेषां जीवपूर्वपक्षानिरासकत्वाच्च । नहि मिथ्याभूतैः धर्मैः सिद्धान्तः क्रियते केनचित् प्रेक्षावतेति दिक् ।

'यदपि, चन्द्रिकायामिन्द्राद्यनेकप्रापक-श्रुतिलिङ्गादिसत्त्वेन इन्द्रादिषु निर्धारित एक एवान्तस्थ इति पूर्वपक्षमाक्षिप्योक्तरीत्या तं पक्षं समर्थ्य 'अनिर्धारितो यः कश्चिदिति पूर्वपक्षो वाऽस्तु । नच सन्देहादविशेषः । अन्तस्थो विष्णुरन्यो वेति सन्देहेऽन्य एवेत्येवकारेण प्रवृत्तपूर्वपक्षे सन्देहात् विशेषसद्भावात्' इत्यनेन चन्द्रिकोक्तमुद्भाव्य तदप्यसदित्यभिधाय

---

१. 'अन्तस्तद्धर्मोपदेशात्' इत्याद्यं सूत्रम् ।

यदुक्तम् 'वरुणादिप्रापकलिङ्गादिवत् विष्णुलिङ्गानामपि सत्त्वेनान्य एवेत्यवधारणे गमकाभावात्। विष्णुलिङ्गानां भूयस्त्वेन यज्ञश्रुत्यभ्यासेन विष्णुरेवेति निर्धारणापत्तेश्च' (शां.पा.भू. पु. ५०१) इत्यादिना तदप्यसत्। समुद्रस्थत्वादृश्यत्वेशृतृत्वादीनां विष्णुलिङ्गानां यथासम्भवं वरुणादिष्वपि सम्भवेन तेषां सावकाशतया वरुणादिप्रापकलिङ्गबलात् 'अन्य एव' इत्यत्र गमकप्राप्त्या 'अन्तःस्थोऽन्य एव' इति पूर्वपक्षोपपत्तेः।

एतेन, विष्णुलिङ्गानां भूयस्त्वेन विष्णुरेवेति निर्धारणापत्तिश्चेति निरस्तम्। तेषां समुद्रस्थत्वादृश्यत्वेशतृत्वादीनां भूयस्त्वेऽपि यथासम्भवं वरुणादौ सावकाशत्वेन विष्णुरेवान्तस्थ इति निर्धारणासम्भवात्।

'यच्च चन्द्रिकायाम्- नच विष्णुलिङ्गानां निरवकाशत्वम् समुद्रस्थत्वादेर्वरुणेऽपि सम्भवादित्युक्तपूर्वपक्षोपपादनायायेक्तम्' इत्यनेन चन्द्रिकोक्तमुपपाद्य, तदपि न सदिति प्रजलप्य, यदुक्तम् 'वरुणस्य समुद्रपतित्वेऽपि समुद्रस्थत्वासिद्धेः' (शां.पा.भू. पु. ५०२) इत्यनेन तदप्यसत्। वरुणस्य समुद्राभिमानितयाऽभिमानिन अभिमन्यमानस्थितेः न्यायतः प्राप्ततया वरुणस्य समुद्रस्थत्वस्य प्राप्तत्वेन समुद्रस्थत्वासिद्धेरसम्भवात्।

''यदपि चन्द्रिकायाम्- लिङ्गस्य निरवकाशत्वेऽपि प्रलबश्रुत्या बाधोऽस्तु। नहि निरवकाशः शशशावकः मृगेन्द्रेण न बाध्यते। नच निरवकाशम् 'इदं रूप्यम्' इति ज्ञानं 'नेदं रूप्यम्' इति ज्ञानेन न बाध्यत इत्युक्तपूर्वपक्षसमर्थनायोक्तम्'' इत्यनेन चन्द्रिकोक्तमुपपाद्य तदविचाररमणीयमित्युक्त्वा यदुक्तम् 'निरवकाशत्वमनन्यथा-

सिद्धप्रामाण्यकत्वम् । नह्येतादृशनिवकाशत्वं शशशावकस्य, इदं रूप्यमिति ज्ञानस्य चास्ति । तयोः प्रमाणबहिर्भूतत्वात्' (शां.पा.भू. पु. ५०२) इत्यादिना तदपि न। निरवकाशत्वमत्र दृष्टकारणासाध्यत्वेन [1]प्रतीतस्वशक्तिनाशकत्वम् । प्रतीतत्वान्तं नाशविशेषणम् । अस्ति चेदं निवकाशत्वं शशशावके, अन्येन केनचिदपि नाशो मा भूदिति बुद्ध्या केनचिद्रक्षितस्य शशशावकस्य । अत एव दृष्टकारणासाध्यत्वेन प्रतीतस्वशक्तिनाशस्य दैवान्मृगेन्द्रे सन्निहिते शक्तिनाशदर्शनात् । इदं रूप्यमिति ज्ञानस्यापि नेदं रजतमिति ज्ञानेन प्रवृत्तिजनकशक्तेर्नाशो दृष्टः । एवमेव श्रुत्या लिङ्गस्य प्रमाजननशक्तिनाश इति नाश्यत्वरूपं बाध्यत्वमप्युपपन्नमिति ॥

---

१. प्रतीतः स्वशक्तिनाशः यस्यासौ प्रतीतस्वशक्तिनाशकः ।

अथ आकाशाधिकरणम्

॥ ॐ आकाशस्तल्लिङ्गात् ॐ ॥

यदत्रोक्तं परेण 'शालावत्य-दाल्भ्य-जैबलयः त्रयः होद्गीथे कुशला बभूवुः । ते होचुः- उद्गीथे वै कुशलाः स्मो हन्त त उद्गीथे कथां वदामः- इत्युपक्रम्य दालभ्यं प्रति 'का साम्नो गतिः' इति शालावत्यप्रश्नमवतार्य 'साम्नो गतिः स्वरः' इत्युत्तरिते- (गतिः कारणम् ।) ततः दाल्भ्य-निरूपिता सामगतिविश्रान्तिभूमिः स्वर्गलोकरूपा 'अन्तवद्वै किल दाल्भ्य साम' इति शालावत्येनान्तवत्वदोषेण दूषिता । ततः दाल्भ्यस्य प्रश्नः 'अमुष्य लोकस्य का गतिः' इति । 'अयं लोक इति होवाच' इत्यु-त्तरम् । ततः शालावत्येन स्वर्गतित्वेन निरूपिते पृथिवीलोके 'अन्तवद्वै किल ते शालावत्य' इत्यनेन पूर्ववद्दूषिते शालावत्यस्य जैबिलिं प्रति प्रश्नः- 'अस्य लोकस्य का गतिः' इति ।

> 'आकाश इति होवाच, सर्वाणि हवा इमानि भूतानि आकाशादेव समुत्पद्यन्ते । आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवेभ्यो ज्यायान् आकाशः परायणम् '

इत्युत्तरमाम्नायते । तत्स्थ आकाशपदं किं भूताकाशपरमुत परमात्मपर-मिति पूर्वोत्तरपक्षयुक्तिभ्यां संशये पूर्वपक्षः- इदमाकाशपदं भूताकाश-परमेव । तत्र तस्य रूढत्वेन मुख्यत्वात् । क्वाचित्को ब्रह्मणि तत्प्रयोगश्च व्यापकत्वादिगुणयोगात् गौणः । अन्यथा अनेकार्थत्वप्रसङ्गात् । कोशादेः विनिगमकस्य भूताकाश एव सत्त्वात् । नच 'अस्य लोकस्य का गतिः' इति सर्वकारणे पृष्टे भूताकाशविषयोत्तरासङ्गतिः शङ्क्या । अस्येति

सर्वनाम्नोऽव्यवहितपृथिवीमात्रपरामर्शकत्वात्। 'नच सर्वाणि हवा इमानि भूतानि' इति वाक्यशेषानुपपत्तिः शङ्क्या। अभ्यस्यमानानुपसञ्जात-विरोधि-श्रुत्यनुसारेण तस्य वाय्वादिकारणतामात्रपरत्वेन नेयत्वात्। एवं ज्यायस्त्वमनन्तत्वमपि भूतान्तरापेक्षया नेयमिति।

सिद्धान्तस्तु- इदमाकाशपदं ब्रह्मपरमेव। कुतः ? तल्लिङ्गात्- तस्य ब्रह्मणः असाधारणधर्मरूपलिङ्गान्वितार्थकत्वात्। तथाहि, 'सर्वाणि हवा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' इति श्रूयमाणमसङ्कुचित-सर्वकारणत्वं परस्यैव ब्रह्मणः लिङ्गम्। नचेदं भूताकाशे सम्भवति। एवमनवधिकज्यायस्त्व-परायणत्वेऽपि। न चाभ्यस्तासञ्जातविरोध्या-काशश्रुतिविरोधेन न सर्वाणीत्यादेः सङ्कोचो युक्त इति पूर्वपक्ष्युक्तं युक्तम्। 'अन्तवद्वै किल ते शालावत्य-साम' इति निन्दया, गतित्वेन वक्तव्यस्यानन्त्यावगमात्। तस्य चोपक्रमोपसंहारानुगतस्य श्रुतितो बलवत्तरत्वात्।

तथा चानन्तस्यैव गतित्वेन वक्तव्यतया प्राधान्यमिति तदनुरोधेन चरमश्रुताकाशपदमेवान्यथा नेयम्। नह्युपसञ्जातविरोधिन अनन्त्यस्योप-क्रमोपसंहारस्पर्शिनः सङ्कोचो युक्तः। अत एव प्रश्नोऽपि सर्वकारणविषय एव। अन्यथाऽनन्त्यानुपपत्तेः। एवञ्च प्रश्नप्रतिवचनयोरेकार्थबोधजनन-सामर्थ्याल्लिङ्गादप्याकाशपदस्य ब्रह्मपरत्वं सिद्ध्यति' (शां.पा.भू. पृ. ५१६) इत्यादिना।

तत्रोच्यते- 'सर्वाणि ह्वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' इति श्रुतिस्तावदसङ्कुचितसर्वकारणत्वं प्रतिपादयत्युत सङ्कुचितसर्वकारण-

त्वम् । आद्ये पूर्वपक्षानुक्षितिः । तथाविधकारणत्वस्य भूताकाशावृत्तित्वात् । द्वितीयेऽनया श्रुत्याऽऽकाशपदं ब्रह्मपरमेव न भूताकाशपरमिति सिद्धान्तकरणायोगः । सङ्कुचितसर्वकारणत्वस्य भूताकाशसाधारण्यात् । नचेयं श्रुतिः पूर्वपक्षे सङ्कुचितसर्वकारणत्वं प्रतिपादयति, सिद्धान्ते त्वसङ्कुचितसर्वकारणत्वमिति पूर्वपक्षः सिद्धान्तश्च सङ्गच्छत इति वाच्यम् । श्रुतिरियं पूर्वपक्षे असङ्कुचितसर्वकारणत्वप्रतिपादनं हित्वा सिद्धान्ते त्वसङ्कुचितसर्वकारणत्वं प्रतिपादयति इत्यत्र विशेषबीजाभावात् । नच 'अन्तवद्वै किल ते शालावत्य साम' इति निन्दाया गतित्वेन वक्तव्यस्यानन्त्यावगमात् तस्यानन्त्यस्य प्राधान्यादसङ्कुचितसर्वकारणत्वप्रतिपादनं सिद्धान्ते श्रुतेरिति वाच्यम् । 'अन्तवद्वै किल ते शालावत्य साम' इति निन्दया गतित्वेन वक्तव्यस्यानन्त्यावगमरूपासङ्कुचितसर्वकारणत्वप्रतिपादनबीजस्य पूर्वपक्षेऽपि साम्यात् । तस्मादेतच्छ्रुतेरसङ्कुचितसर्वकारणत्वप्रतिपादकत्वे पूर्वपक्षानुत्थितिः । सङ्कुचितसर्वकारणत्वप्रतिपादकत्वे सिद्धान्तायोग इति ।

किञ्च, कारणत्वं मायागतमिति त्वयाऽङ्गीकृततयाऽसङ्कुचितसर्वकारणत्वस्यापि शुद्धब्रह्मावृत्तितया श्रुतिस्थाकाशपदस्य ब्रह्मासाधारणधर्मरूपलिङ्गान्वितार्थकत्वाभावेन 'इदमाकाशपदं ब्रह्मपरमेव ब्रह्मासाधारणलिङ्गान्वितार्थकत्वात्' इति सिद्धान्तस्यासङ्गतिरेव । नहि तदवृत्तिधर्मेण तदिति सिद्धान्तः क्रियते केनचित् कुशलेनेति ।

'किञ्च सूत्रोक्तं लिङ्गं न तावत् ब्रह्मणि तत्वतोऽस्ति ।

यदि चारोपितं लिङ्गं तत्साध्या ब्रह्मतापि हि ।

आरोपिता स्यात् एवञ्च पूर्वपक्षः स्थिरो भवेत् ॥

इति दूषणमुक्तम्' (पु. ५२०) इत्यनेन चन्द्रिकोक्तं दूषणमुपपाद्य तदसारमेवेति प्रजल्प्य यदुक्तम् 'आरोपितस्याप्यसाधारणस्य स्वव्यापकसाधकतायाः निष्प्रत्यूहत्वात्। नह्यारोपितरजततादात्म्येन साध्यो रजतभेदोऽप्यरारोपित इति शक्यं सचेतसा' (शां.पा.भू.पु.५२२) इति तदयुक्तम्। तथाहि, तदारोपितस्य तदसाधारणधर्मत्वाभावात्। अन्यथा गोभिन्नमहिष्यादावारोपितस्य सास्नादेः महिष्याद्यसाधारणधर्मत्वापत्तेः। नहि महिष्यादौ सास्नारोपमात्रेण सास्नावत्त्वं महिष्यसाधारणधर्म इति व्यवह्रियते कैश्चित् प्रेक्षावद्भिः लोके। अत आरोपितस्याप्यसाधारणस्येत्यसङ्गतम्। आरोपितस्याप्यसाधारणस्य स्वव्यापकसाधकतायाः निष्प्रत्यूहत्वादित्यपि न। सत एव साधकत्वदर्शनेनारोपितस्य साधकत्वायोगात्।

(सत्त्रैविध्यभङ्गः)

नच मयाऽऽरोपितस्य यथासम्भवं व्यावहारिकसत्ता-प्रातिभासिकसत्तान्यतरमङ्गीक्रियते। अतो नोक्तदोष इति वाच्यम्। पारमार्थिकसद्-व्यावहारिकसत्-प्रातिभासिकसदिति त्रैविध्ये मानाभावात्। नच 'सच्चेन्न बाध्येत असच्चेन्न प्रतीयेत' इत्यस्य सत्त्वात् जगतः ब्रह्मज्ञानबाध्यत्वस्य सत्त्वेन तदन्यथानुपपत्त्या जगतः पारमार्थिकविलक्षणत्वमङ्गीकर्तव्यतया प्राप्तम्। प्रतीयते च जगदिति प्रतीतत्वान्यथानुपपत्त्या जगत्यसद्विलक्षणत्वमपि। तथा प्रातिभासिकस्य, ब्रह्मज्ञानेतरमानबाध्यतयाऽव्यावहारिकस्य, सुतरामपारमार्थिकस्य शुक्तिरजतादेः ब्रह्मज्ञानेतरज्ञानबाध्यत्वान्यथानुपपत्त्या प्रातिभासिकस्य पारमार्थिकव्यावहारिकविलक्षणत्वम्। तथा प्रतीतत्वान्यथानुपपत्त्याऽसद्विलक्षणत्वं च प्राप्तम्। ब्रह्म तु सर्वथाऽबाध्यमिति पारमार्थिकम्। जगत् व्यावहारिकं शुक्ति-

रजतादिकं प्रातिभासिकमिति न्यायतः प्राप्ततया कथं सत्त्वैविध्ये मानाभाव इति वाच्यम् । 'सच्चेन्न बाध्येत' इत्यत्र बाध्यत्वं किं ज्ञाननिवर्त्यत्वम् उतान्यथाविज्ञातस्य सम्यग्ज्ञानविषयत्वम् । विभुवृत्तियोग्यविशेषगुणानां स्वानन्तरोत्पन्नविशेषगुणनाश्यतया उत्तरज्ञाननिवर्त्यपूर्वज्ञाने सत्यत्वस्येव जगतोऽपि सत्यत्वेनापि ज्ञाननिवर्त्यत्वोपपत्त्या, तथा पारमार्थिकतयाऽङ्गीकृते शुद्धब्रह्मणि सगुणत्वादिनाऽन्यथा विज्ञातस्य निर्गुणत्वादिना सम्यग्ज्ञानविषयत्वरूपबाध्यत्वसत्त्वेन तद्वत् जगतः पारमार्थिकत्वेऽप्युक्तबाध्यत्वोपपत्त्या उभयोः पक्षयोरप्यन्यथानुपपत्तेरभावात् ।

नच ज्ञानत्वावच्छिन्ननिवर्तकतानिरूपितनिवर्त्यताश्रयत्वं ज्ञानबाध्यत्वमिह विवक्षितम् । ज्ञानादेस्तु स्वोत्तरोत्पन्नविशेषगुणत्वावच्छिन्ननिवर्तकतानिरूपितनिवर्त्यताशालित्वेऽपि ज्ञानत्वावच्छिन्ननिरूपितनिवर्त्यत्वाभावेनैवंरूपं बाध्यत्वं मिथ्यात्वमन्तरा अनुपपन्नमित्येतादृशबाध्यत्वान्यथानुपपत्त्या जगन्मिथ्यात्वसिद्धिरिति वाच्यम् । जगत्यप्येतादृशबाध्यत्वस्य तवासिद्धेः । जगतस्त्वया ब्रह्मविषयकनिर्विकल्पकसाक्षात्कारत्वावच्छिन्ननिवर्त्यत्वाङ्गीकारेण ज्ञानत्वावच्छिन्ननिवर्त्यत्वाभावात् । नच ज्ञानत्वव्याप्यधर्मावच्छिन्ननिवर्त्यत्वं ज्ञाननिवर्त्यत्वमिह विवक्षितम् । ब्रह्मविषयकसाक्षात्कारत्वावच्छिन्ननिवर्त्यत्वेऽपि जगतः ज्ञानत्वव्याप्योक्तसाक्षात्कारत्वरूपधर्मावच्छिन्ननिवर्त्यत्वरूपज्ञानबाध्यत्वसत्त्वेन नोक्तदोष इति वाच्यम् । ज्ञानत्वव्याप्यभ्रमरध्यानत्वावच्छिन्ननिवर्त्यकीटत्वे सत्यत्वमिव जगत्यपि ज्ञानत्वव्याप्यधर्मावच्छिन्ननिवर्त्यत्वं सत्यत्वेनाप्युपपन्नम् इत्येतादृशबाध्यत्वविवक्षणेऽप्यन्यथानुपपत्तेरभावात् ।

अपि च सत्यस्य विषस्य गरुडध्यानेन निवृत्तिदर्शनाच्च नोक्तरूपं ज्ञानत्वव्याप्यधर्मावच्छिन्ननिवर्त्यरूपं ज्ञानबाध्यत्वं मिथ्यात्वं विनाऽनुपपन्नमिति। नच कीटत्वं विषं च मम मिथ्येति वाच्यम्। ज्ञानबाध्यत्वान्यथानुपपत्त्या जगन्मिथ्यात्वमभिलषता त्वया 'जगत् मिथ्या ज्ञानबाध्यत्वात्' इत्युक्तं भवेत्। तत्रोक्तं ज्ञानबाध्यत्वमुक्तरीत्या जगतः मिथ्यात्वं विना सत्यत्वेनाप्युपपन्नमित्यर्थान्तरतेत्यभिप्रायात्। नच ज्ञाननिवर्त्यत्वं साक्षात्कारत्वावच्छिन्ननिवर्त्यत्वम्। तथा च कीटत्वविषादेः ज्ञानत्वव्याप्यध्यानत्वरूपधर्मावच्छिन्ननिवर्त्यत्वेऽपि साक्षात्कारत्वावच्छिन्ननिवर्त्यत्वाभावेन साक्षात्कारत्वावच्छिन्ननिवर्त्यत्वस्य जगति मिथ्यात्वं विनाऽनुपपद्यमानतया नोक्तार्थान्तरतावकाश इति वाच्यम्। सत्यस्य निगडबन्धस्य राजदर्शनान्निवृत्तिदर्शनात् साक्षात्कारत्वावच्छिन्ननिवर्त्यत्वस्य ज्ञानबाध्यत्वरूपत्वेऽप्यर्थान्तरस्य दुर्वारत्वात्।

'असच्चेन्न प्रतीयेत' इत्यत्राप्यसद्विलक्षणत्वसाधकतयोपन्यस्तं प्रतीत्वं किं परोक्षप्रतीतिविषयत्वमभिप्रेतमुतापरोक्षप्रतीतिविषयत्वम्। नाद्यः। शशविषशणमस्तीति वाक्याभासात् शशविषाणज्ञानसम्भवेन असतोऽपि शशविषाणस्य परोक्षज्ञानविषयत्वप्राप्त्याऽपरोक्षप्रतीतिविषयत्वस्यासद्वैलक्षण्यसाधकत्वाभावात्।

किञ्च, भेदज्ञाने प्रतियोगितावच्छेदकप्रकारेण प्रतियागिज्ञानस्य हेतुतयाऽसज्ज्ञानाभावेऽसद्वैलक्षण्यज्ञानानुपपत्तेश्चासतः ज्ञानविषयत्वस्यावश्यकत्वात्। न द्वितीयः। 'इदं रजतम्' इत्यपरोक्षभ्रमे रजते प्रातिभासिकवैलक्षण्याभाने ततः प्रवृत्त्यनुपपत्त्या रजते प्रातिभासिकवैलक्षण्यस्यावश्यं ज्ञातव्यतया रजते प्रातिभासिकवैलक्षण्यस्य तवासत्य-

तयाऽसतोऽपि रजते प्रातिभासिकवैलक्षण्यस्यापरोक्षतः ज्ञाततप्राप्त्या अपरोक्षप्रतीतिविषयत्वस्यापि असद्वैलक्षण्यसाधकत्वाभावात् । तस्मान्न परमते सत्त्रैविध्ये मानमस्तीति दिक् ।

'नह्यारोपितरजततादात्म्येन साध्यो रजतभेदोऽप्यारोपित इति शक्यं सचेतसा वक्तुम्' (शां.पा.भू. पु.५२२) इत्यप्यसङ्गतम् । तथाहि, रजतभेदसाधकतयोपन्यस्तारोपितरजततादात्म्यस्य रजततादात्म्यत्वेन हेतुता आरोपितरजततादात्म्यत्वेन । नाद्यः, सत्यरजते रजततादात्म्यसत्त्वेन हेतुमति तत्र रजतभेदरूपसाध्याभावात् व्यभिचारः । न द्वितीयः । आरोपितरजततादात्म्यवति प्रातिभासिकरजते सामान्यतः रजतभेदरूपसाध्याभावात् व्यभिचार एव । तत्र प्रातिभासिकस्य रजतत्वस्य सत्त्वेन रजतसामान्यभेदासम्भवात् । नचारोपितरजततादात्म्येन सत्यरजतभेदसाधनस्याभिप्रेततया नोक्तव्यभिचार इति वाच्यम् । तथासति तद्वदत्राप्यारोपितसर्वकारणतादात्म्येन ब्रह्मणि सर्वकारणभेदसिद्ध्या सर्वकारणत्वलिङ्गेनाकाशस्य ब्रह्मतासिद्धान्तासम्भवः ।

किञ्च, आरोपिततल्लिङ्गेन तद्भेदसाधनस्य कथञ्चित्सम्भवेऽप्यारोपिततल्लिङ्गेन तदात्मकतासाधनमदृष्टाश्रुतपूर्वमेव । अन्यथाऽऽरोपितवह्निमल्लिङ्गेन धूमेन ह्रदस्यानारोपितवह्निमदात्मकत्वं सिद्ध्येत् । तथा न भवति । आरोपिततल्लिङ्गेन सिद्ध्यदारोपित्ततदात्मकत्वमेवेति वक्तव्यतया ब्रह्मणि यदिचारोपितं तल्लिङ्गं तत्साध्या ब्रह्मताप्यारोपिता स्यादिति तु सूक्तमेव । एवं स्थितेऽपि सूक्तेऽसूक्तत्वं बुद्ध्वा विकत्थमानस्य 'सचेतसा' इत्यादिजल्पनं चन्द्रिकाचार्येषु विद्वेषमूलकं स्वस्योन्मत्तत्वख्यापनप्रयोजनं वा नान्यत्प्रयोजनकं पश्याम इत्यलं बहुना ।

(परमते आकाशाधिकरणानुत्थितिः)

किञ्चैतदधिकरणस्य त्वन्मते चोत्थितिर्न सम्भवति। पूर्वाधिकरणे 'अन्तस्तद्धर्मोपदेशात्' इत्यत्रोक्तरीत्याऽपहतपाप्मत्वादीश्वरधर्मोपदेशाद् अन्तस्थस्य परमेश्वरत्वनिश्चय इवात्रापि सर्वकारणत्वरूपेश्वरधर्मोपदेशादाकाशपदस्येश्वरपरत्वनिश्चयोपपत्तेः। नच पूर्वाधिकरणे विषयवाक्ये आकाशशब्दस्य कण्ठतोऽनुक्तेः, एतस्यारम्भ इति वाच्यम्। समानन्यायविषयेऽप्यधिकरणान्तरारम्भे शास्त्रस्यापर्यवसानप्रसङ्गः। अतस्त्वन्मते त्विदमधिकरणमनारम्भणीयं भविष्यति।

ननु भवन्मतेऽप्यानन्दमयाधिकरणेनान्तस्थाधिकरणस्य गतार्थता प्राप्नोति। तथाहि, आनन्दमयाधिकरणे तावत् शब्दानां भगवद्विषयरूढियोगापेक्षया अन्यविषयरूढियोगयोर्दुर्बलत्वेन शब्दप्रवृत्तिनिमित्तधर्माणां भगवति निरवधिकत्वात् अपरायत्तत्वात्, अन्यत्र तदभावादित्याद्युपपादितमेव। अत्रेन्द्रादिशब्दानां भगवदन्यपुरन्दरादिविषयरूढियोगावाश्रित्य पूर्वपक्षस्त्वानेयः। नच तस्यावकाशः सम्भवति। अतस्त्वन्मतेऽन्तस्थाधिकरणमनारम्भणीयं प्राप्नोतीति चेन्न। अस्मन्मते अभ्यधिकाशङ्कयाऽन्तस्थाधिकरणारम्भोपपत्तेः। तथाहि, 'अन्तःप्रविष्टं कर्तारम्' इति वाक्ये किमयमन्तःप्रविष्टः परमात्मा, उत अन्य इति संशये प्राप्ते अन्तःप्रविष्ट अन्य एवेति पूर्वपक्षः प्राप्तः। 'इन्द्रो राजा जगतो य ईशः' इत्यादावन्तस्थे इन्द्रादिशब्दानां श्रवणात्। नच पूर्वमेव शब्दानां सर्वेषां भगवतोऽन्यत्रामुख्यवृत्तिरित्युक्तमिति वाच्यम्। इन्द्रादिशब्दातिरिक्तानामन्नौषध्यादिशब्दानां तथा सम्भवेऽपीन्द्रादिशब्दानां पुरन्दरादिषु मुख्यत्वमेव। कुतः? इन्द्रादिदेवानामप्रतिहतशक्तित्वेन

तत्रेन्द्रादिशब्दप्रवृत्तिनिमित्तस्य परमैश्वर्यस्यानवधिकस्यापरायत्तस्य सत्त्वेन मुख्ययोगोपपत्तेः । 'इन्द्रस्य तु वीर्याणि प्रावोचम्' इत्यादौ मन्त्रेषु बहुलप्रयोगदर्शनेन रूढिरपि विद्वत्सम्बन्धिनी मुख्यैव ।

नचोभयोः स्वतन्त्रानवधिकमैश्वर्यं विरुद्धमिति वाच्यम् । वाक्यशाबल्या-न्यथानुपपत्त्या इन्द्रादीनां परमेश्वरत्वाङ्गीकारात् । तस्मादिन्द्रादय एवान्तःप्रविष्टत्वेन प्रतिपाद्यन्त इति प्राप्तम् । अतस्तद्धर्मोपदेशादिति सूत्रं प्रसक्तम् ।

अनेनेदमुक्तं भवति । अन्तःप्रविष्टो विष्णुरेव । विष्णुधर्मत्वेन श्रुतिस्मृतिसिद्धानां समुद्रान्तःस्थितत्व-ब्रह्माण्डवीर्यत्व-ब्रह्मतपो-लभ्यत्वादीनां तस्मिन्नन्तःप्रविष्टे उपदेशात् । नचेन्द्रादिश्रुतिविरोधः । निरवकाशलिङ्गबलेन तद्बाधोपपत्तेः । पुरन्दरादिगतैश्वर्यादेः अल्पता परमेश्वराधीनता श्रुतिपुराणादिप्रसिद्धा । तच्छक्तेरस्मदाद्यपेक्षयाऽऽधिक्य-मेव । न तु निरवधिकता । इन्द्रादीनामीश्वरात्मकत्वेन निरवधिकैश्वर्या-दिकं सम्भवतीत्येतन्निवारयामास 'भेदव्यपदेशाच्चान्यः' इति सूत्रेण बादरायणाचार्य, इति ।

नन्वानन्दमयाधिकरणेन अन्तःस्थाधिकरणस्य गतार्थतापरिहारेऽ-प्यन्तस्थाधिकरणेन आकाशाधिकरणस्य गतार्थता प्राप्नोति । तथाहि । 'अन्तस्तद्धर्मोपदेशात्' इत्यत्रोक्तरीत्या इन्द्रादिशब्दवदाकाशशब्दस्यापि भूताकाशे अमुख्यवृत्त्या प्रवृत्तस्य महायोगरूढिभ्यामीश्वरवाचकत्वस्यैव न्यायत्वात् । नचान्तस्थाधिकरणविषयवाक्ये 'अन्तःप्रविष्टम्' इत्यत्रा-काशशब्दस्य कण्ठतोऽनुक्तेरेतस्यारम्भ इति वाच्यम् । समानन्याय-

विषयेऽप्यधिकरणान्तरारम्भे शास्त्रस्यापर्यवसानप्रसङ्गात् । न च काचिदभ्यधिकाशङ्काऽस्तीत्यतो अनारम्भणीयमिदमाकाशाधिकरणमिति चेन्न । अत्राभ्यधिकाशङ्कयैव एतदधिकरणारम्भोपपत्तेः । तथाहि । ऐश्वर्यं हि वर्षण-शासन-पालनादिरूपाचेतनसम्बन्धिनी चेष्टा । तस्याश्चागन्तुक-ज्ञानेच्छारूपकारणाधीनत्वात् स्वयमागन्तुकत्वाच्च कारणद्वारा स्वरू-पतश्च परमेश्वरप्रसादाधीनत्वाद्युज्यत इन्द्रादिशब्दानां पुरन्दरादिष्व-मुख्यत्वम् । नाकाशशब्दस्य भूतेऽमुख्यत्वम् । कुतः ? प्रवृत्तिनिमित्त-स्यावकाशत्वस्य भूते निरवधिकत्वात् । अचेतनाश्रितत्वेन परमेश्वरा-नायत्तत्वाच्च । तस्मादाकाशशब्दवाच्यं भूतमेवेति प्राप्ते 'नभो ददाति श्वसतां मार्गं यन्नियमाद्दः' इत्यादिप्रमाणैराकाशशब्दप्रवृत्ति-निमित्तस्यावकाशदातृत्वस्यापीश्वराधीनत्वेन निरुपचरितसर्वोत्तमत्वरूप-परोवरीयस्त्वादिलिङ्गेन चाकाशशब्दवाच्यो मुख्यतो हरिरेव । न भूताकाश इति सिद्धान्तितम् 'आकाशस्तल्लिङ्गात्' इति सूत्रेण बादरायणाचार्येणेति सर्वमनवद्यम् ॥

अथ प्राणाधिकरणम्

॥ ॐ अत एव प्राणः ॐ ॥

(परोक्तपूर्वपक्षसिद्धान्तपरिशीलनम्)

'सर्वाणि हवा इमानि भूतानि प्राणमेवाभिसंविशन्ति, प्राणमभ्युज्जिहते, सैषा देवता' इति प्राणवाक्यं विषयः। तत्रस्थप्राणशब्दमुख्यतात्पर्यविषयः किं मुख्यप्राणः, अथवा परं ब्रह्मेत्युभयत्र प्राणशब्दप्रयोगदर्शनात् संशयः। मुख्यप्राणे प्राणशब्दप्रयोगस्तावत् प्रसिद्धः। 'प्राणबन्धनं हि सौम्य मनः' 'प्राणस्य प्राणम्' इत्यादौ च ब्रह्मण्यपि प्रयोगो दृश्यते। तत्र प्राणशब्दतात्पर्यविषयस्तावत् मुख्यप्राण इति युक्तम्। विना बाधकं रूढित्यागायोगात्। नच वाक्यशेषगतानन्यथासिद्ध-निखिलजगत्-कारणत्वादिलिङ्गात् तत्याग आवश्यक इति वाच्यम्। अभ्यस्यमानानुपसञ्जातविरोधि-प्राणश्रुत्यनुसारेण वाक्यशेषस्यान्यथा नेयत्वात्।'

'नच भूयोऽनुग्रहन्यायेन वाक्यशेषगतानेकलिङ्गानुसारेणैकस्याः प्राणश्रुतेरन्यथा नयनं युक्तमिति वाच्यम्। मुख्यप्राणस्यापि भूतसंवेशनोद्गमनाधिकरणत्वस्य श्रुति-प्रत्यक्षसिद्धत्वात्। श्रुतिस्तावत् 'यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति, प्राणं चक्षुः, श्रोत्रं मनः। स यदा प्रबुध्यते प्राणादेवाधि पुनर्जायन्ते' इत्यादिस्वापकाले प्राणवृत्तौ अपरिलुप्यमानायामिन्द्रियवृत्तीनां विपरिलोपः, प्रबोधकाले प्रादुर्भाव इति सार्वजनीनं प्रत्यक्षमितीन्द्रियसारत्वाच्च भूतानामविरुद्धो भूतसंवेशनोद्गमनादिवाक्यशेष इति। तथाचात्र सर्वपदमिन्द्रियादिषु सङ्कुचितवृत्त्यैव वाच्यमिति वायुविकार एव प्राण इति पूर्वपक्षे सिद्धान्तः 'अत एव प्राणः'

इति । उक्तप्राणाब्दिंतं ब्रह्मैव, सर्वभूतसंवेशनोद्गमनाश्रयत्वादिरूप-ब्रह्मलिङ्गात्' इत्यादिना यदुक्तं परेण तत्रोच्यते- तत्र तावत् संशयपूर्वपक्षौ अनुपपन्नौ। वायुविकारे जडे देवताशब्दस्य, मन्त्राधिष्ठातृत्वस्य, [१]प्रस्ताव-मन्वायत्तत्वस्य चासम्भावितत्या 'सैषा देवता प्रस्तावमन्वायत्ता' इत्यत्र तच्छब्दपरामृष्टप्राणे देवतात्व-मन्त्राधिष्ठातृत्व-रूपचेतनधर्मबोधनेन प्राणे जडत्वाभावरूपविपरीतकोटिनिश्चयस्य प्राप्त्या 'प्राणः वायुविकारः जडो वोत परं ब्रह्म' इति संशयानवतारात् । भूतानां संवेशनमुद्गमनं च कर्म पारमेश्वरमेवात्र प्रतीयते, नाकाशाधिकरण इव अन्यदीयमिति परमेश्वर-ग्रहणस्यैव न्यायतः प्राप्ततया पूर्वपकक्षस्याप्यनवकाशात् ।

नन्व सर्वभूतसंवेशनादीनां परमेश्वरधर्मत्वमनिर्णीतमिति वाच्यम्। 'यतो वा इमानि भूतानि' इत्यत्राभिसंविशन्तीत्यनेन सर्वभूतसंवेशनादीनां श्रुत्यन्तर ईश्वरधर्मतया निर्णीतत्वात् । 'सता सौम्यैतेन सम्पन्नो भवति' इत्यत्र स्वापकालेऽपि भूतसंवेशनस्य परमेश्वरधर्मतया निश्चितत्वात् । न च 'यदा ह वै पुरुषः स्वपिति, प्राणं तर्हि वागप्येति, प्राणं चक्षुः' इत्यादि-श्रुतौ भूतसंवेशनादीनां प्राणधर्मतयापि प्रतीतत्वमस्तीति वाच्यम् । तथा सति समबलतया संशय एव स्यान्न पूर्वपक्षस्यावकाश इति ।

किञ्च 'यदा वै पुरुषः' इति श्रुतिरपि मुख्यप्राणविषया, इति कुतो निश्चितम् । स्वापकाले प्राणवृत्तौ अपरिलुप्यमानायामिन्द्रियवृत्तयः परिलुप्यन्ते, प्रबोधकाले च प्रादुर्भवन्तीति प्रत्यक्षानुगुण्यान्मुख्यप्राण-विषयत्वं प्राबल्यं च निर्णीतमिति तु न सम्भवति । इन्द्रियाणामतीन्द्रि-

१. 'सैषा देवता प्रस्तावमन्वायत्ता' इत्युपनिषत्

याणां मुख्यप्राणे संवेशनोद्गमनयोरप्रत्यक्षत्वात्। नच तयोरप्रत्यक्षत्वेऽपि भूतसंवेशनोद्गमनवत्तया 'यदा वै पुरुषः स्वपिति' इत्यादिश्रुतिप्रतिपाद्य-प्राणः, मुख्यप्राण एव, सकलेन्द्रियवृत्त्युपरमावच्छेदकालावच्छिन्नानु-परमविशिष्टवृत्तिशालित्वात्, इत्यनुमानेनास्याः श्रुतेर्मुख्यप्राणविषयत्वं निश्चीयत इति वाच्यम्। परमात्मव्यापाराणां स्वापकालेऽप्यनुपरत-तयाऽस्याः श्रुतेर्मुख्यप्राणविषयत्वावधारणानुपपत्तेः। किञ्चेन्द्रियाणां मुख्यप्राणे संवेशनोद्गमनयोः श्रुत्यनुमानसिद्धत्वेऽपि किमागतं सर्वभूत-सम्बन्धिनोः संवेशनोद्गमनयोः ?

नच भूतेष्विन्द्रियाणां सारतया भूतसाराणामिन्द्रियाणां मुख्यप्राणे संवेशने सिद्धे 'यो यत्सारसंवेशवान् सः तत्सर्वसंवेशनवान्' इति व्याप्त्या भूतसारेन्द्रियसंवेशनेन मुख्यप्राणे सर्वभूतसंवेशनमपि सिद्ध्यतीति वाच्यम्। सर्वज्ञानेषु सारभगवद्विषयकज्ञानसंवेशनस्य विरक्ते सत्त्वेऽपि तत्र शृङ्गारादिज्ञानसंवेशनस्यादृष्टतया तत्र सर्वज्ञानसंवेशनाभावात् 'यो यत्सारसंवेशनवान् स तत्सर्वसंवेशनवान्' इति व्याप्तेरसिद्धतयोक्त-व्याप्तिबलेन मुख्यप्राणे भूतसारेन्द्रियसंवेशेन सर्वभूतसंवेशनसिद्ध्य-सम्भवात्। नचोक्तव्याप्तिमूलकस्यानुमानस्य व्याप्त्यसिद्ध्याऽसम्भवेऽपि मुख्यप्राणस्य सर्वेन्द्रियसंवेशनवत्त्वे सर्वभूतसंवेशनं सम्भावितमिति सम्भावनामात्रं सम्भवतीति वाच्यम्। सम्भावनामात्रेण पूर्वपक्षायोगात्।

तस्मात् पूर्वपक्षसंशययोरसम्भवात् सति पूर्वपक्षे सिद्धान्तस्याव-काशः पूर्वपक्षस्यैवासम्भवे सिद्धान्तस्याप्यनवकाशाच्च नेदमुदाहरणं परमते युक्तम्। किन्त्वनन्तवेदविद्भिः श्रीसर्वज्ञश्रीमच्चरणैरुपात्तमेवातिरम-णीयमिति।

यदत्रोक्तं परेण 'प्रस्तावमन्वायत्ता' इत्यस्य प्रस्तावानुगतत्यर्थकतासम्भवात् सुधोक्तस्य प्रस्तावाधिष्ठातृत्वस्य 'प्रस्तावमन्वायत्ता' इत्यत अलाभात्, (शां.पा.भू. पु. ५४७) इति तन्न । 'प्रस्तावमन्वायत्ता' इत्यतः प्रस्तावमनुगतेत्यस्याप्यर्थस्यालाभात् ।

किञ्च, छान्दोग्ये उद्गीथाध्याये धनाशया कस्यचिद्राज्ञो यज्ञशालायां प्रविष्टेन चक्रायणेन स्वज्ञानख्यापनाय तत्रार्त्विज्यं कुर्वतां ज्ञानपरीक्षणाय च कृतस्य 'प्रस्तोतरि या देवता प्रस्तावमन्वायत्ता तां ब्रूहि' इत्येवं प्रश्नस्य प्रस्तावमन्त्राधिष्ठातृदेवताभिप्रायकस्य उत्तररूपवाक्ये 'सैषा देवता प्रस्तावमन्वायत्ता' इत्यत्रान्वायत्ता इत्यस्यानुगतेत्यर्थस्वीकारे उत्तरस्य प्रश्नानानुगुण्यात् । नचान्वयत्तेति क्रियाधिष्ठातृत्वरूपार्थलाभासम्भव इति वाच्यम् । धातूनां सम्भवदनेकार्थकतया तथाविधक्रिययैवाधिष्ठातृत्वरूपार्थलाभसम्भवात् ।

यत्तु, देवताशब्दवाच्यत्वं जडस्याप्यस्तीति तत्तु त्वदनुभवैकवेद्यत्वेनोपेक्षणीयमेव ।

'किञ्चात्र भूतानां संवेशनमुद्गमनं च पारमेश्वरं कर्म प्रतीयत इति तद्ग्रहणमेव युक्तमिति कुतः पूर्वपक्षावकाशः ?' इति सुधोक्तमनूद्य, तदप्ययुक्तमिति प्रजल्प्य, यदुक्तम् 'तस्य मुख्यप्राणसाधारण्यस्योपपादितत्वात्' (शां.पा.भू. पु.५४७) इत्यनेन तदसत् । इन्द्रियाणां मुख्यप्राणे संवेशनोद्गमनयोः श्रुत्यनुमानसिद्धत्वेऽपि किमायातं सर्वभूतसंवेशनोद्गमनयोरित्यादिना सर्वभूतसंवेशनोद्गमनयोः मुख्यप्राणसाधारण्याभावस्योपपादितत्वात् ।

यच्चोक्तम् 'तदापि संशयः स्यात् न पूर्वपक्षः, इति तदपि न' इत्यभिधाय यदुक्तम् 'प्राणश्रुतिमादाय पूर्वपक्षसम्भवात्' (शां.पा.भू. पु.५४७) इत्यनेन तदपि न। प्राणश्रुतेः विष्णवावकाशस्योक्तत्वात्। 'श्रुतिबाधया पूर्वपक्ष इत्युक्तिस्तु' इति सुधोक्तमनूद्य, न युक्तेति आभासमूलत्वमभिधाय यदुक्तम् 'देवताश्रुत्यबाधेनैव पूर्वपक्षप्रवृत्तेरुपपादितत्वात्' (शां.पा.भू. पु. ५४७) इत्यनेन तदपि न। वायुविकारजडासम्भावितायाः विष्णुवाचकत्वेन प्रमितायाः देवताश्रुतेः श्रुत्यनुमानाभासमूलसम्भावनामात्रेण बाधमङ्गीकृत्यैव पूर्वपक्षप्रवृत्तेस्त्वया वक्तव्यतया देवताश्रुत्यबाधेनेति तु वाङ्मात्रमेवेति न किञ्चिदेतत्।

(स्वमते पूर्वपक्षसमर्थनम्)

ननु भवन्मतेऽपि पूर्वपक्षस्यानवकाश एव। तथाहि। प्राणशब्दस्य लोकवेदयोः मुख्यप्राणप्रयोगप्राचुर्यात् 'प्राणन्त्यनेन' इति निरुक्तिसम्भवाच्च 'तद्वै त्वं प्राणोऽभवः' इति विषयवाक्यप्राणशब्दमुख्यवाच्यो मुख्यप्राण एव, न परमात्मेति पूर्वपक्षस्त्वानेयः। स तु न सम्भवति। इन्द्रादिशब्दप्रवृत्तिनिमित्तैश्वर्यादीनामाकाशशब्दप्रवृत्तिनिमित्तानां च परमात्मन्येव निरुपचरिततया, अन्येषु विद्यमानानां तेषां परमात्माधीनतया चेन्द्रादिशब्दानां मुख्यतः परमात्मवाचकत्वमिति पूर्वोक्तन्यायेनात्रापि परमात्मन एव प्राणशब्दमुख्यवाच्यत्वनिश्चयप्राप्त्या मुख्यप्राणपूर्वपक्षासम्भवात्। तस्यैवासम्भवे यन्निरासार्थमधिकरणारम्भः स्यादतः सोऽप्यनुपपन्न एवेति चेन्न। अभ्यधिकाशङ्कयाऽस्मन्मते पूर्वपक्षोत्थानेनाधिकरणारम्भसम्भवात्। तथाहि। इन्द्रादिश्रुतेराकाशश्रुतेर्वा परमात्मा मुख्यवाच्य इत्युपपद्यते। प्रवृत्तिनिमित्तस्यान्यत्र मुख्यस्यासम्भवात्।

नचैवं प्रकृते। शरीरे मुख्यप्राणे सति जीवचेष्टादिकम्, नासति इत्यन्वय-व्यतिरेकाभ्यां मुख्यप्राण एव प्राणशब्दप्रवृत्तिनिमित्तस्य जीवनचेष्टादि-हेतुत्वस्य च दृष्टेः न परमात्मनि। अतो युक्तिसंवादात् मुख्यप्राणविषय-मेवेदं वाक्यमिति पूर्वपक्षे प्राप्ते परमात्मैवात्र प्राणशब्दमुख्यवाच्यः। अत एव 'सन्निहितवाक्ये मनसाऽप्यन्यत्राशक्यचिन्तन-श्रीपतित्व-लक्ष्मी-पतित्वादिरूपबलवद्वैष्णवलिङ्गादेव' इति सिद्धान्तितम् 'अत एव प्राणः' इति सूत्रेणेति सर्वमवदातम् ॥

अथ ज्योतिरधिकरणम्

।। ॐ ज्योतिश्चरणाभिधानात् ॐ ।।

यदत्र परेणोक्तम् ''इदमाम्नायते- 'अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्टेषु अनुत्तमेषु उत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिः' इति । तत्र, दिवः परं ज्योतिरादित्यादिः, उत परं ब्रह्मेति उभयत्र ज्योतिःशब्दप्रयोगात् संशयः । पूर्वपक्षस्तु- इदं ज्योतिरादित्यादिकमेव ज्योतिःशब्दस्य चक्षुरनुग्राहक-तमःप्रतिद्वन्द्विन्येव प्रयोगात् । दीप्यत इत्यनुभूतभास्वररूपवत्त्वस्य ज्वलनकर्तृत्वस्य वा श्रवणाच्च ।

किञ्च 'इदं वाव तद्यदिदमस्मिन् पुरुषे ज्योतिः' इति कौक्षेयकज्योतिषि परञ्ज्योतिरध्यस्यमानं दृश्यते । अध्यासश्च प्रायः अत्यन्तसादृश्यनिमित्तः । तच्चाचेतनयोः ज्योतिषोरतितरामुपपद्यते । न चेदमपि ज्योतिः ब्रह्मेति शक्यते वक्तुं 'तदेतद् दृष्टं च श्रुतं चेत्युपासीत । चक्षुष्यः श्रुतो भवति' इति च तादृशज्योतिरुपासनया दर्शनीयरूपवत्त्व-कीर्तिमत्त्वरूपाल्पफलश्रवणाच्च । नहि परमपुरुषोपासनमल्पफलायेति वक्तुं युक्तम् । तस्मात् 'दिवः परं ज्योतिः आदित्यादिकमेवेति पूर्वपक्षे सिद्धान्तः- 'ज्योतिश्चरणाभिधानात्' इति । दिवः परञ्ज्योतिरिह ब्रह्मैव । पूर्ववाक्यद्युसम्बन्धितया ब्रह्मचरणाभिधानादिति ।

'पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि' इति मन्त्रस्यायमर्थः- सर्वाणि भूतान्यस्य= ब्रह्मणः, पादः= एकदेशः । यथा चतुष्पादयुक्तात् पदार्थात् तदेकदेशपरिमितं वस्तु तस्मादल्पं तद्वत् प्रपञ्चोऽप्यल्प इति द्योतयितुं पादत्वकल्पनम् । अस्य= परमात्मनः, दिवि= सत्यलोकोपरि

भागे, त्रिपात्= ब्रह्म-विष्णु-शिवात्मनाऽभिव्यक्तं स्वरूपममृतात्ममस्ति, इत्यादिना'' (शां.पा.भू. पु. ५५६) तत्रोच्यते । पूर्वपक्षस्तावदनुपपन्नः। तथाहि, दिवः परञ्ज्योतिरादित्यादिकमेवेत्यत्रादित्यपदेनादित्यजीवः विवक्षितः, उतादित्यमण्डलम् । नाद्यः । 'इदं वाव तदिदमस्मिन् पुरुषे ज्योतिः' इति कौक्षेयज्योतिषि परञ्ज्योतिषः अध्यासमङ्गीकृतवता त्वयाऽध्यासस्य प्रायः अत्यन्तसादृश्यनिमित्तकत्वेन कौक्षेयज्योतिषः अचेतनत्वेन तत्राध्यस्यमानपरञ्ज्योतिषः चेतनत्वाङ्गीकारे अत्यन्तसादृश्याभावेनाध्यासानुपपत्त्या परञ्ज्योतिष अचेतनत्वाङ्गीकारात् । न द्वितीयः । तदुपासानायाः दर्शनीयरूपवत्त्व-कीर्तिमत्त्वरूपफलश्रवणात् । नह्यचेतनोपासनया फलप्राप्तिः सम्भावितेति परञ्ज्योतिष्यचेतनत्वस्याप्यङ्गीकर्तुम् अशक्यत्वात् ।

यदुक्तम्, कौक्षेयके ज्योतिषि परञ्ज्योतिरध्यस्यमानं दृश्यत इति तन्न । परञ्ज्योतिष अध्यस्यमानत्वे तस्य मिथ्यात्वप्राप्त्या तदुपासनायाः मिथ्योपासनात्वेन तस्याः फलप्रापकत्वाभावापातेन फलश्रवणाच्चेत्यस्यासङ्गत्यापत्तेः ।

त्रिपादस्यामृतं दिवीति मन्त्रस्य, दिवि= सत्यलोकोपरितनभागे, त्रिपात्= ब्रह्मविष्णुशिवात्मनाभिव्यक्तं स्वरूपममृतात्मकमस्तीत्युपवर्ण्य दिवः परञ्ज्योतिरिह ब्रह्मैव, द्युसम्बन्धितया ब्रह्मचरणाभिधानादिति सिद्धान्तोऽप्यसङ्गत एव । तथाहि । पूर्वं जन्माधिकरणे जगत्कारणत्वस्य ब्रह्मतटस्थलक्षणत्वव्यवस्थापनावसरे ब्रह्मणोऽपि सर्गकारणीभूताः शक्तयः सन्तीत्यभिधाय, कास्ताः शक्तय इत्यपेक्षायां कूर्मपुराण उत्तरभागे,

सर्वासामेव शक्तीनां ब्रह्मविष्णुशिवात्मकाः ।
प्रधानाः संस्मृताः देवाः शक्तयः परमात्मनः ।
आभ्यः परस्तात् भगवान् परमात्मा सनातनः ।। इति

शिवपुराणेऽपि,

सृष्टेः प्रवर्तको ब्रह्मा स्थितेर्विष्णुर्विमोहतः ।
संहारस्य ततो रुद्रस्तयोर्नित्यं नियामकः ।
तस्मात् त्रयस्ते कथ्यन्ते जगतः कारणं त्रयम् ।
कारणत्रयहेतुश्च शिवः परमकारणम् ।। इति ।

स्कान्देऽपि,

ब्रह्मा विष्णुश्च रुद्रश्च परतत्वविभूतयः ।
एषां त्रयाणामधिकः सर्वकारणमीश्वरः ।।

इत्यादिप्रमाणैः शक्तिरूपविशिष्टब्रह्मात्मकब्रह्मविष्णुरुद्राणामुपहित-ब्रह्माभेदेन विशिष्टब्रह्मात्मकशक्तिनिष्ठस्य जगत्कारणत्वस्य शुद्धब्रह्म-स्वरूपैक्याभावेन तटस्थलक्षणत्वमविरुद्धमित्युपपादितवता त्वया ब्रह्म-विष्णुरुद्राणां शुद्धबह्मस्वरूपत्वस्यानङ्गीकृततयेदानीं तेषां शुद्धब्रह्मस्व-रूपत्वाभ्युपगमेन सूत्रार्थोपवर्णने त्वदीयपूर्वोत्तरग्रन्थयोरसङ्गत्यापत्तेः ।

'यत्तु चन्द्रिकायाम्- चरणाभिधानादित्यस्य पादाभिधानादित्यर्थ-विवक्षायां लाघवार्थं श्रुत्यनुगमार्थं च पादाभिधानादिति सूत्रांशः स्यात्' इत्यादिना चन्द्रिकोक्तदूषणमुद्भाव्य तदसदित्यभिधाय यदुक्तम्- 'पादाभिधानादित्युक्ते भूतात्मकपादप्रतिपादकत्वप्रतीतिः स्यात् । तच्च प्रकृतेऽविवक्षितम् । किन्तु भूतादिव्यतिरिक्तं यत् त्रिपादस्यामृतमित्युक्तं

तदत्राभिमतमिति सूचनाय शब्दभेदानुसरणसाफल्यात् । अनुसृते च शब्दभेदे- श्रुत्यनुगमं परित्यज्य शब्दभेदानुसरणं किमर्थमिति फलजिज्ञासायां फलान्तरानुपलम्भात् पादशब्दसमानाधिकरणतया श्रुतादतिरिक्त एवार्थो विवक्षित इति बुद्धिरुपत्पद्यत इति न कश्चिद्विरोधः । नचैवं त्रिपादाभिधानादित्येव सूत्रांशः कुतो न कृत इति वाच्यम् । गायत्र्यास्त्रिपदात्वेनातिप्रसिद्धतया तद्बुद्धिर्मा भूदिति चरणपदोक्तिसामञ्जस्यात्' इत्यादिना तदसत् । तथाहि । शब्दानां मुख्यार्थाप्रतिपादकत्वे सति बाधकेऽमुख्यार्थप्रतिपादकत्वमिति हि स्थितिः । प्रकृते भिन्नभूतात्मकपादापेक्षया स्वरूपांशपादस्य मुख्यतया पादशब्देन स्वरूपांशपादप्रतिपादनस्य न्यायतः प्राप्ततया पादाभिधानादित्यभिहिते मुख्यस्वरूपांशपादप्रतिपादकत्वप्रतीतिरेव स्यान्नामुख्यार्थभिन्नभूतात्मकपादप्रतिपादकत्वप्रतीतिरिति पादाभिधानादित्युक्ते भूतात्मकपादप्रतिपादकत्वप्रतीतिः स्यादित्यस्यासङ्गतत्वात् ।

किञ्चास्तु वा भिन्नभूतात्मकपादप्रतिपादकत्वप्रतीतिः । तावतापि न तव हानिः । 'पादोऽस्येति, सर्वाणि भूतान्यस्य= ब्रह्मणः, पादः= एकदेशः । यथा चतुष्पादयुक्तात् पदार्थात् तदेकदेशपरिमितं वस्तु तस्मादल्पम् । तद्वत् प्रपञ्चोऽप्यल्प इति द्योतयितुं पादत्वकल्पनम्' इति त्वयाङ्गीकारेण ब्रह्मापेक्षया सर्वप्रपञ्चस्याल्पताबोधे सति सर्वप्रपञ्चात् वैलक्षण्येन पूर्णताबोधप्राप्त्या तेनैव ज्योतिषः प्रपञ्चान्तर्गततानिरासेन ब्रह्मतासिद्धान्तसम्भवात् ।

यदुक्तम् 'शब्दभेदे त्वनुसृते ..... न कश्चिद्विरोधः' इत्यन्तेन तन्न । सर्वज्ञानां सूत्रकृतां विवक्षाया आधुनिकाल्पज्ञैः शब्दभेदानुसरणस्या-

यमेवार्थो विवक्षित इति निश्चेतुमशक्यत्वात्। नचार्थान्तरासम्भवेऽयमेवार्थ इति निश्चयः सम्भवतीति वाच्यम्। श्रीमदानन्दतीर्थश्रीमच्चरणैः चरणशब्दस्यार्थान्तरस्योपवर्णिततया अबाधितस्यार्थान्तरस्य प्राप्त्या 'शब्दभेदानुसरणस्यायमेवार्थः भूतात्मकपादरूपः' इति निश्चयासम्भवात्। नचैवमित्यारभ्य सामञ्जस्यादित्यन्तेन यदुक्तं तदपि न। गायत्र्याः चरणवत्त्वेनापि प्रसिद्धेः सत्त्वात् चरणाभिधानादित्युक्तेऽपि गायत्र्या अनिवारणात्।

किञ्चात्र द्युसम्बन्धितयाऽमृतस्वरूपत्रितयस्य ब्रह्मलिङ्गतया तथाविध-लिङ्गबलेन गायत्रीबुद्धेर्निवारणसम्भवात्।

किञ्च चरणाभिधानादित्यस्य पादाभिधानादित्यर्थविवक्षायां चतुःसूत्रात्मकमेवेदं ज्योतिरधिकरणमिति वदतस्तव भूतादिसूत्रस्य ज्योतिःसूत्रेण पौनरुक्त्यं च स्यात्। नच 'तावानस्य' इति मन्त्रस्य ब्रह्मपरतां सिद्धवत्कृत्य तत्परामर्शकि-यच्छब्दस्वारस्येन 'यदतः परो दिवो ज्योतिर्दीप्यते' इति ज्योतिर्वाक्यस्य ब्रह्मपरताया आद्यसूत्रप्रमेयत्वात्। तादृशवाक्यस्य ब्रह्मपरतैवासिद्धेति भूतपादत्वादिभिर्गायत्रीवाक्यस्यापि ब्रह्मपरत्वमित्यस्य भूतादिसूत्रप्रमेयतया प्रमेयभेदेन पौनरुक्त्यानवकाशादिति वाच्यम्। तथासति पूर्वस्मिन् वाक्ये 'तावानस्य महिमा' इति ब्रह्मनिर्दिष्टम्, तत्र यच्च ब्रह्मणः त्रिपादस्यामृतं दिवीति द्युसम्बन्धिरूपं निर्दिष्टं तदेवेह द्युसम्बन्धात् प्रत्यभिज्ञायत इत्यङ्गीकृत्य प्रकृतप्रत्यभिज्ञानं ज्योतिषः ब्रह्मत्वे हेतुरित्युक्तं स्यात्। तथाच ज्योतिःप्रत्यभिज्ञानादिति सूत्रविन्यासे लाघवे, स्पष्टार्थत्वे च सम्भवति सति गुरोः ज्योतिश्चरणाभि-धानादिति सूत्रविन्यासस्यानौचित्यापत्तेः।

'यत्तु चन्द्रिकायाम्- उक्ताक्षेपे 'ज्योतिः हृदय अहितं यत्' इत्यग्नि-सूक्तस्थस्यैव ज्योतिषः छान्दोग्येऽपि ज्योतिःश्रुत्या 'योयमन्तर्हृदये' इति हृदयनिहितत्वधर्मेण प्रत्यभिज्ञायमानत्वेनैक्यान्नोक्तसूत्रासङ्गतिरिति समाधानमुक्तम्'' इति चन्द्रिकामुपपाद्य तदसदिति प्रजल्प्य यदुक्तम् 'दिवः परत्र विश्वोत्तीर्णप्रदेशवृत्तित्वेन छान्दोग्ये श्रुतस्य ज्योतिषः हृदयनिहितत्वेनाग्निसूक्तोक्तज्योतिषः भिन्नत्वेन ज्योतिर्द्वयस्यैक्य-कल्पनायोगात्' (शां.पा.भू.पु. ५७६) इत्यादिना। तदसत्। छान्दोग्य-वाक्योक्ताग्निसूक्तोक्तज्योतिषोः भिन्नत्वकल्पनायां मानाभावः। नच दिवः परत्र विश्वोत्तीर्णप्रदेशवृत्तित्वहृदयगुहानिहितयोर्विरुद्धतयैकत्र समावेशासम्भवेन 'पूर्वोक्तज्योतिषी परस्परं भिन्ने। तथाविध-विरुद्धधर्माधिकरणत्वात्' इत्यनेन तथाविधज्योतिषोः परस्परं भेदः सिद्ध्यतीति वाच्यम्। एकस्यैव वस्तुनः कालभेदेन भिन्नप्रदेशवृत्तित्व-सम्भवेन प्रकृतज्योतिषोऽप्येकस्वकालभेदेन विश्वोत्तीर्णप्रदेशवृत्तित्व-हृदयनिहितत्वयोः सम्भावितत्या विश्वोत्तीर्णप्रदेशवृत्तित्व-हृदय-निहितत्वयोर्विरोधस्यैवासम्भवात्।

नच तयोरेककालावच्छेदेन सामानाधिकरण्यस्यासम्भवेन [१]विश्वोत्तीर्णप्रदेशवृत्तिरूपधर्मविशिष्ठछान्दोग्यसूक्तोक्तवृत्त्यवच्छेदक-कालावच्छिन्नवृत्तिकहृदयनिहितत्वरूपधर्मवत्त्वेन भेदसाधनं सम्भवतीति वाच्यम्। श्रुतौ तयोरेककालावाच्छिन्नत्वज्ञापकाभावात्। नचोक्तधर्मयोः

---

१. छान्दोग्ये दिवःपरत्वं ज्योतिषः उक्तम्। अग्निसूक्ते हृदयस्थितत्वमुक्तम्। तत्र उभयत्र ज्योतिषः वृत्यवच्छेदकः कालः एकः। एककालावच्छेदेन च उभय-वृत्तित्वं न सम्भवति, इति भावः।

कालभेदेनाविरोधाङ्गीकारे कस्मिंश्चित् ज्योतिषि किञ्चित्कालमुक्त-धर्मयोर्मध्य एकस्याभावस्याङ्गीकर्तव्यतापत्त्या तदानीं प्रतिपाद्याभावेन श्रुतेरप्रामाण्यापत्तिरिति वाच्यम् । प्रामाण्यस्य कालघटितत्वाभावेन सामान्यतः विषयसत्त्वस्यैव प्रामाण्यप्रयोजकतया किञ्चित्कालं विषय-सत्त्वेन प्रामाण्यनिर्वाहात् । नचैवं तदभाववति तत्प्रकारकज्ञानजनकत्वस्य प्राप्त्या श्रुतेरप्रामाण्यापत्तिर्दुर्वार एवेति वाच्यम् । कपिसंयोगस्याप्य-व्याप्यवृत्तितया मूलावच्छेदेन कपिसंयोगाभावस्य सम्भवेन वृक्षः कपिसंयोगीति ज्ञानस्य कपिसंयोगाभाववति कपिसंयोगप्रकारकत्वेन तस्याप्रामाण्यापत्तेर्वारणाय तदभावे प्रतियागिवैय्यधिकरण्यं निवेश-नीयम् । अव्याप्यवृत्त्यवच्छिन्नप्रतियोगिकभेदस्य व्याप्यवृत्तित्वपक्षे तदभावस्थाने तदवच्छिन्नप्रतियोगिकभेदं वा निवेश्य तज्ज्ञानस्या-प्रमात्वस्यापत्तेः तज्जनकस्याप्रामाण्यापत्तेश्च वारणीयतया प्रकृतेऽपि तथैव वारणसम्भवात् ।

यदि, श्रुतेरन्यत्र तथासम्भवेऽपि श्रुतेस्तावत् स्वप्रतिपाद्यस्य कालिकाव्याप्यवृत्तित्वमादाय यदाकदाचित् विषयसत्त्वं स्वीकृत्य प्रामाण्यं निर्वहतीति वक्तुमशक्यम् । तथासति ब्रह्मणः जगज्जन्मादिकारणत्व-प्रतिपादकानां सार्वज्ञादिप्रतिपादकानां श्रुतीनां च यदाकदाचित् विषय-सत्त्वेनापि प्रामाण्यापत्त्या ब्रह्मणि किञ्चित्कालं जगत्कारणत्वाभावस्य सार्वज्ञाद्यभावस्य चापत्तेः । अतः श्रुत्या ब्रह्मणि मुख्यं सार्वकालीनं विषय-सत्त्वं प्रतिपाद्यमित्युपेत्यैव श्रुतेः प्रामाण्यमुपपादनीयं भविष्यतीति नोक्त-ज्योतिष्युक्तधर्मयोः कालभेदेन सामानाधिकरण्यमादाय प्रामाण्यनिर्वाह इति व्यक्तिभेदमादायैव प्रामाण्यस्य उपपाद्यतयोक्तधर्मवत्त्वेनोक्त-

ज्योतिषो भेदसाधनं सुलभमिति विभाव्यते । तर्हि तत्र वक्तव्यम्- हृदय-गुहानिहितत्वविश्वोत्तीर्णप्रदेशवृत्तित्वाभ्याम् अव्याकृताकाशस्यापि भेदापत्तिरिति । नचाकाशस्य व्याप्ततया तस्मिन्नेकस्मिन्नेव तादृशधर्म-समावेशः सम्भवतीति न ताभ्यां तथाविधधर्माभ्यामाकाशस्य भेद-प्रसक्तिरिति वाच्यम् । व्याप्तत्वस्य ब्रह्मण्यपि साम्येनोक्तधर्मयोर्ज्योतिषि भेदासाधकत्वात् । नच ज्योतिषः व्याप्तत्वे तस्य हृदयरूपाल्पौकस्त्वं कथं युज्यत इति वाच्यम् । व्योमवदुपपत्तेः । उक्तमपि बादरायणा-चार्येणार्भकौकस्त्वसूत्र इति सर्वमकलङ्कम् ।

'यच्चोक्ताक्षेपे आकारभेदेन तयोरविरोधोपपत्तिरिति चन्द्रिकायां समाधानमुक्तम्' इत्यनेन चन्द्रिकोक्तमुपपाद्य, तदप्यसदिति प्रजल्प्य, यदुक्तम् 'निश्चिते हि द्वयोर्ज्योतिषोरैक्ये आकारभेदेनाविरोधोपपत्ति-कल्पना। तत्कल्पनया चैक्यसिद्धिरित्यन्योन्याश्रयप्रसङ्गात्' (शां.पा.भू. पु. ८७७) इत्यनेन तदपि न सत् । अग्निसूक्तोक्तज्योतिषः कर्णादि-विदूरत्वब्रह्मलिङ्गेन ब्रह्मतासिद्धिः । छान्दोग्योक्तज्योतिषः गायत्रीशब्द-प्रवृत्तिनिमित्तेन गानत्राणकर्तृत्वरूपब्रह्मलिङ्गबलेन ब्रह्मतासिद्धिः । तथा चोक्तज्योतिषोः ब्रह्मता तु श्रुतौ ब्रह्मलिङ्गबलादेव सिद्धा, न तु ज्योतिषोः ब्रह्मतासिद्धिराकारभेदेन तयोरविरोधोपपत्तिकल्पनाधीना इत्यन्योन्या-श्रयानवकाशात् । तथाच ज्योतिश्चरणाभिधानादित्यस्य पादाभिधाना-दित्यर्थविवक्षायां तथैव वक्तव्ये चरणाभिधानादित्युक्तेरस्वारस्यात् । भूतादिसूत्रेण पौनरुक्त्यापाताच्च । श्रीमदानन्दतीर्थश्रीमच्चरणोपदर्शितं चरणाभिधानादित्यस्य कर्णादीनां विचरणाभिधानादित्यर्थमादृत्य कर्णादिविदूरत्वरूपवैष्णवलिङ्गबलात् ज्योतिर्विष्णुरेवेति सिद्धान्त एवातिरमणीय इति सर्वमनवद्यम् ।

ननु गायत्र्यधिकरणस्य ज्योतिरधिकरणबहिर्भावे तस्योत्थितिर्न सम्भवति। गायत्री ब्रह्म वा किं वर्णसमावेशलक्षणो मन्त्र इति संशयस्य मन्त्र एवेति पूर्वपक्षस्य पूर्वन्यायेनैव परिहृतत्वादिति चेन्न। अभ्यधिकाशङ्कया गायत्र्यधिकरणोत्थानसम्भवात्। तथाहि। भवेदाकाशादिशब्दानां परमात्मपरत्वम्। अन्यगतशब्दप्रवृत्तिनिमित्तस्येश्वरपरतन्त्रत्वेन तत्र मुख्यवृत्त्ययोगात्। यद्यप्याकाशशब्दप्रवृत्तिनिमित्तविवरत्वादिकं स्वरूपतोऽनागन्तुकमेव। तथा, धर्मिण एवाकाशादेरुत्पत्तिविनाशवतो जन्मस्थितिलयेष्वीश्वराधीनत्वे धर्मस्य तथाभावोऽवर्जनीयः। न चाकाशोऽनादिनित्य इति युक्तम्। 'आत्मन आकाशः सम्भूतः' इत्यादिश्रुतिविरोधात्। यस्तु 'अनादिर्वाऽयमाकाशः' इत्युक्तोऽव्याकृताकाशः। सोऽनादिनित्योऽपि न तत्र पूर्वपक्षिणः विवक्षा, भूतप्रकरणत्वात्। नचैवं प्रकृते सम्भवति। गायत्रीशब्दप्रवृत्तिनिमित्तं हि गानत्राणकर्तृत्वम्। तत्र गानकर्तृत्वमर्थप्रतिपादकत्वम्। त्राणकर्तृत्वमध्ययनकर्तॄणां पापाद्रक्षणशक्तिः। तदुभयं केन प्रकारेण हरेरधीनं स्यात्, न केनापि। धर्मिणस्तु नित्यत्वात्। अर्थप्रतिपादनादिशक्तेर्धर्मस्य तत्स्वभावत्वात्। तस्मान्न गायत्री विष्णुरिति प्राप्ते ईश्वरशक्तेर्नित्यानित्यस्वभावास्वभावविषयत्वेन नित्यस्यापि परमात्माधीनतया मुख्यगायत्रीशब्दवाच्यो विष्णुरेवेति सिद्धान्तितं छन्दोऽभिधानादिति सूत्रेणेति।

'अत एव प्राणः' इति सूत्रे प्राणशब्दवाच्यत्वस्य विष्णावुक्तत्वेऽपि चक्षुरादिभिः सहपाठस्तु प्रधानस्य ब्रह्मणः नोपपद्यत इति 'ता वा एताः शीर्षन्च्छ्रियश्छ्रिताश्चक्षुः श्रोत्रं मनो वाक् प्राणः' इत्यत्र प्राणशब्दवाच्यो विष्णोरन्य एवेत्यधिकाशङ्कया पूर्वपक्षे प्राप्ते ब्रह्मशब्दानुगमादत्रोक्त-

प्राणो विष्णुरेव । चक्षुरादिभिरपि सहपाठो तदन्तर्गतरूपविवक्षया सावकाशो भविष्यतीति सिद्धान्तितम् 'प्राणस्तथानुगमात्' इति सूत्रेणेति सर्वमवदाम् ॥

॥ इति प्रथमाध्यायस्य प्रथमः पादः ॥

॥ अथ द्वितीयाध्यायः ॥

अथ स्मृत्यधिकरणम्

सकलजगज्जन्मादिकारणे सार्वज्ञसर्वैश्वर्याद्यनन्तगुणपरिपूर्णेऽविद्यागन्धविधुरे परे ब्रह्मणि नारायणे स्वरवर्णपदवाक्यमहावाक्यरूपसमस्तशास्त्रस्य परममुख्यया वृत्त्या महातात्पर्येण समन्वयः प्रथमाध्याये समर्थितः। तमेव समन्वयं स्मृतिविरोधेनाक्षिप्य समादधत् सूत्रम्-

॥ ॐ स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॐ ॥

अस्यार्थः- यदुक्तम्, परस्य ब्रह्मणः विष्णोः सकलजगज्जन्मादिकारणत्वम्, सार्वज्ञादिसकलगुणपूर्णत्वम्, समस्तदोषदूरत्वं च तदयुक्तम्। पाशुपतसाङ्ख्यबौद्धार्हतादिस्मृतिविरुद्धत्वात्। ता हि शिवप्रभृतीनामेव जगत्कारणत्वादिकं प्रतिपादयन्ति। नच तासामन्योऽवकाशोऽस्ति। येन प्रतीतार्थे तात्पर्याभावं निश्चिनुमः। अन्यथा तासां स्मृतीनामनवकाशेनाप्रामाण्यलक्षणदोषप्रसङ्ग इति तन्न। परस्य ब्रह्मणः विष्णोरेव पञ्चरात्रादिस्मृतिभिः अखिलजगज्जन्मादिकारणत्वादेरुक्तत्वात्। अपरथा तासां पाशुपतादिभ्योऽन्यासां पञ्चरात्रादिस्मृतीनामवकाशान्तराभावेनाप्रमाण्याख्यदोषप्रसङ्गादिति।

(परोक्तापादोपाधिभेदानां परामर्शः)

यदत्रोक्तं परेण 'पूर्वाध्याये जगदुपादानत्वाद्युपलक्षितं प्रत्यगभिन्नाद्वितीयं ब्रह्म वेदान्तैः प्रतिपाद्यत इति वेदान्तानां तादृशब्रह्मपरत्वं सप्रपञ्चं निरूपितम्। तदिह स्मृत्यादिविरोधेनाक्षिप्यास्मिन्नध्याये समर्थ्यते' इति

तदयुक्तम् । कदाचित् तत्सम्बन्धवत एव तदुपलक्षिततया, कदापि निर्विकारस्य ब्रह्मणः जगदुपादानत्वाभावेन तस्य जगदुपादानत्वोपलक्षितत्वायोगात् । प्रत्यगभिन्नाद्वितीयं ब्रह्म वेदान्तैः प्रतिपाद्यत इत्यपि न सत् । तथासत्यहमिति प्रकाशमानजीवचैतन्याभिन्नब्रह्मबोधकत्वेनाधिगतार्थबोधकत्वस्यैव प्राप्त्याऽनधिगतार्थगन्तृत्वाभावेन तेषामप्रामाण्यापत्तेः पूर्वमुक्तत्वात् ।

'यत्तु चन्द्रिकायाम्- आद्यपादे स्वपक्षे साङ्ख्यादिस्मृतिभिस्तदुन्नीततर्कैश्च विरोधपरिहारः । द्वितीये साङ्ख्यादिमतानां दुष्टत्वोक्तिः । तृतीये पूर्वभागे महाभूतश्रुतीनामुत्तरभागे तु जीवश्रुतीनाम्, चतुर्थे पादे लिङ्गशरीरश्रुतीनां परस्परविरोधपरिहार इति पादार्थानाहुरिति निरुक्तपादोपाधिभेदमनूद्य तन्न । आद्ये तृतीये च पादे एकोपाध्यभावात्' (शां.पा.भू. पु. ६०६) इत्यादिना चन्द्रिकोक्तदूषणमुपपाद्य तत्रोच्यत इत्यभिधाय यदुक्तम् 'स्वपक्षसाक्षात् बाधकोद्धारः प्रथमपादोपाधिरनुगतः' (शां.पा.भू. पु. ६०८) इत्यादिना तदसत् । जगदुपादानत्वादिना प्रत्यगभिन्नब्रह्मैव वेदान्तैः प्रतिपाद्यत इति स्वपक्षं प्रति समयविरोधस्यापि साक्षात् बाधकतया तदुद्धारस्य स्वपक्षसाक्षात्बाधकोद्धाररूपतया स्वपक्षसाक्षात्बाधकोद्धारस्य द्वितीयपादसाधारण्येनायं प्रथमपादोपाधिरित्यस्यानुपपन्नत्वात् ।

यच्चोक्तम् 'तृतीयपादे पूर्वोत्तरभागयोर्महाभूतजीवविषयश्रुतिविरोधपरिहारेऽपि भौतिकेतरविषयश्रुतिविरोधपरिहाररूपस्तत्पादोपाधिरनुगत एव' इत्यनेन तदपि न । देहाद्यवच्छिन्नचैतन्यस्यैव तव जीवपदार्थतया विशेषणस्य देहादेर्भौतिकत्वे, विशेषणस्य यत् भवति विशिष्टस्यापि तद्भवतीति न्यायेन विशिष्टस्यापि भौतिकत्वप्राप्त्या जीवा-

विषयकश्रुतेः भौतिकेतरविषयत्वासम्भवात्। द्वितीये पादे साङ्ख्यादिमतानां दुष्टत्वोक्तिरपि न साधीयसी। आद्येऽपि 'इतरषां चानुपलब्धेः' 'एतेन योगः प्रत्युक्तः' 'स्वपक्षदोषाच्च' 'एतेन शिष्टापरिग्रहा अपि व्याख्याताः' इत्यादौ साङ्ख्यादिमतानां दुष्टत्वोक्तेस्त्वयापि स्वीकृतत्वात्। तथाच परकृतस्य पादोपाधिवर्णनस्यायुक्त्वेनाद्ये युक्तिविरोधपरिहारः, द्वितीये समयविरोधपरिहारः, तृतीये श्रुतिविरोधपरिहारः, चतुर्थे न्यायोपेतश्रुति-विरोधपरिहार इति पादोपाधिवर्णनमेव समीचीनम्।

यदत्रोक्तं परेण 'अलौकिकार्थगोचर-बहुजनपरिगृहीत-वाक्यसन्दर्भ-रूपसमयत्वस्य त्वदीयचन्द्रिकाकारोक्तस्मृतिसाधारणतया स्मृतीनां समयरूपताभिप्रायेणैव स्मृत्यधिकरणे समयविगानं सन्देहबीजमिति तत्वप्रकाशिकायां जयतीर्थोक्त्या च स्मृतीनां समयबहिर्भावायोगेन स्मृत्यविरोधस्य समयपाद एव सङ्गतिरित्यादिना' (शां.पा.भू. पु. ३१४) तन्न। समयत्वस्यालौकिकार्थगोचरबहुजनपरिगृहीतवाक्यसन्दर्भरूपत्वे श्रुतीनामपि समयतापत्तिः। अतः यावन्तो मतप्रवर्तकाः तावदन्यतमप्रणीत-शास्त्रत्वमेव समयत्वमिति वक्तव्यतया स्मृतीनां समयत्वाभावेन तासां समयबहिर्भावस्यैव प्राप्त्या स्मृत्यविरोधस्य समयपाद एव सङ्गतेरित्य-स्यानुपपन्नत्वात्।

ननु पञ्चरात्रादिस्मृतीनां पाशुपतादिस्मृतीनां समबलतया न विष्णोरेव जगत्कारणतानिश्चयः पञ्चरात्रादिस्मृतिभिरिति चेन्न। अपौरुषेयतया निश्चितप्रामाण्यकश्रुतिसंवादितया, नितरां सर्वज्ञैर्विष्ण्वादिभिः प्रणीततया च पाशुपतादिस्मृत्यपेक्षया पञ्चरात्रादिस्मृतीनामधिकबलतया पञ्च-रात्रादिस्मृतिविरोधेन पाशुपतादिस्मृत्यादीनामेव अप्रामाण्यप्राप्त्या ताभिः

रुद्रादीनां जगत्कारणतयाऽसिद्ध्या पञ्चरात्रादिस्मृतिभिर्विष्णोरेव जगत्कारणतासिद्धेः । प्रपञ्चितं चैतत् श्रीमन्न्यायसुधायां स्मृत्यधिकरणे जयतीर्थश्रीमच्चरणैः । विस्तरभयान्नेह विशेषतः लिख्यते । तदेवं पाशुपतादीनां स्मृत्याभासत्वात् न तद्विरोधेनोक्तार्थासम्भवः शङ्कनीय इति सर्वं सुस्थम् ॥

अथ न विलक्षणत्वाधिकरणम्

॥ ॐ न विलक्षणत्वादस्य तथात्वं च शब्दात् ॐ ॥

(ब्रह्मण उपादानत्वनिरासः)

यदत्रोक्तं परेण 'अत्रोक्तसमन्वयो न युक्त उत युक्त इति, तदर्थं ब्रह्मणः जगदुपादानत्वाभावसाधने विलक्षणत्वादिहेतवः दुष्टा उतादुष्टा इति संशये प्रधानमेव सुखदुःखमोहात्मकत्वात् तादृशजगदुपादानम्, न तु ब्रह्म, अतादृशत्वात् सजातीययोरेव प्रकृतिविकारभावात्मकोपादानोपादेयभावदर्शनात्। अत्र विशेषव्याप्तावविद्यादृष्टान्तः। यत् यद्विलक्षणं न तत् तत्प्रकृतिकमिति सामान्यव्याप्तौ यथा हिरण्यविलक्षणो घटो न हिरण्यप्रकृतिकः इति दृष्टान्तः, इति पूर्वपक्षः। तदिदमुक्तम् 'न विलक्षणत्वात्' इति। अस्य जगतः चेतनत्वादिना वैलक्षण्यात् साधर्म्याभावान्न ब्रह्मोपादानम्। तथात्वं च= वैलक्षणं च, शब्दात्= श्रुतेरिति सूत्रार्थः। श्रुतिश्च 'विज्ञानं चाविज्ञानं चाभवत्' इति चेतनाचेतनविभागेन ब्रह्मजगतोर्वैलक्षण्यं बोधयन्ती भाष्योदाहृता' इत्यनेन, तत्रोच्यते।

अनेनेदमुक्तं भवति। ब्रह्म जगदुपादानं न भवति जगद्विलक्षणत्वात्। यत्, यद्विलक्षणं तत् तदुपादानं न भवति। यत् यदुपादानं तत् तद्विलक्षणं नेति। तत्राविद्यायां ज्ञानविलक्षणत्वसत्त्वेन तत्र जगदन्तर्गतज्ञानोपादानत्वाभावरूपसाध्याभावात् व्यभिचारः। नच तत्र हेतुरेवासिद्ध इति वाच्यम्। आवरणत्वतदभावाभ्यामविद्याज्ञानयोर्वैलक्षण्यस्य सुप्रसिद्धत्वात्।

किञ्च, यत् यद्विलक्षणं तत् तदुपादानं नेति सामान्याव्याप्तावपि

घटवैलक्षण्येन प्रत्यक्षसिद्धमृदि घटोपादानत्वाभावरूपव्यापकाभावेन व्यभिचार एव । यत् यदुपादानं तत् तद्विलक्षणं नेति व्यतिरेकव्याप्तावपि घटोपादानमृदि घटविलक्षणत्वाभावाभावेन व्यभिचार एव । नच तद्विलक्षणत्वं नामानौपाधिकतद्भेदवत्त्वम् । अनौपाधिकत्वं च भेदे तदवृत्तिधर्मावच्छिन्नानुयोगिताकत्वम् । तथा तदवृत्तिधर्मावच्छिन्नानुयोगिताकतद्भेदवत्त्वं तद्विलक्षणत्वमिति पर्यवसितम् । परस्परावृत्तिधर्मवत्त्वं वा विलक्षणत्वम् । एवञ्च मृद्घटयोरौपाधिकभेधसत्त्वेऽपि तयोरनौपाधिकभेदासम्भवः । मृत्वस्य घटवृत्तितया, घटत्वस्य मृद्वृत्तितया च परस्परावृत्तिधर्मवत्त्वाभावेन मृदनुयोगिकघटप्रतियोगिकभेदस्य च स्वप्रतियोगिवृत्तिधर्मावच्छिन्नानुयोगिताकतया प्रतियोग्यवृत्तिधर्मावच्छिन्नानुयोगिताकभेदवत्त्वरूपस्य घटविलक्षणत्वस्य वा मृद्यसत्त्वेन न मृदि सामान्यव्याप्तिद्वयस्य व्यभिचारावकाशः । सामान्यव्याप्तावेवंरूपस्य वैलक्षण्यस्य प्रविष्टत्वादिति वाच्यम् । ज्ञानत्वाज्ञानत्वयोः परस्परं असमानाधिकरणतया परस्परावृत्तिधर्मवत्त्वरूपवैलक्षण्यस्य ज्ञानाज्ञानयोः सत्त्वेनाज्ञानत्वस्य ज्ञानावृत्तितयाऽज्ञानानुयोगिकज्ञानभेदस्य प्रतियोग्यवृत्तिधर्मावच्छिन्नानुयोगिताकतया तादृशभेदस्य, ज्ञानवैलक्षण्यस्य चाज्ञाने सत्त्वेन तत्राज्ञानोपादानत्वाभावरूपव्यापकाभावेन व्यभिचारस्य दुर्वारत्वात् ।

नच ज्ञानस्याज्ञानोपादानकत्वे विवदितव्यम् । अज्ञानस्य जगदुपादानतया ज्ञानस्य जगदन्तःपातितयाऽज्ञानस्य ज्ञानोपादानताया अवर्जनीयत्वात् । नच द्विविधव्याप्तावपि चेतनत्वनिवेशेन व्यभिचारवारणं सुशकमिति वाच्यम् । चेतनत्वरूपहेतुनैव ब्रह्मणि जगदुपादानत्वा-

भावरूपसाध्यसाधनसम्भवे हेतुशरीरे जगद्विलक्षणत्वरूपविशेषण-वैयर्थ्यात् ।

किञ्चास्मिन्नधिकरणे ब्रह्मणः जगदुपानात्वासम्भवपक्षोऽप्यनुपपन्न एव । जन्मादिसूत्र एव त्वया ब्रह्मणः जगदुपानादत्वे सति जगत्कर्तृतारूपकारणतायाः सिद्धान्तितया पुनश्च तदसम्भवपूर्वपक्षानुत्थितेः ।

किञ्च ब्रह्मजगती नोपादानोपादेयभाववती विलक्षणत्वात् । देवदत्त-घटपटवत् । अत्र वैलक्षण्यं च चेतनाचेतनत्वरूपम् । ईदृशवैलक्षण्यमङ्गी-कृत्य तथाविधानुमानेन ब्रह्मणः जगदुपानात्वाभावपूर्वपक्षसम्भवेऽपि 'दृश्यते' इत्यत्र सूत्रे यस्त्वया सिद्धान्तः कृतः स त्वनुपपन्न एव । तथाहि, लोके चेतनत्वेन प्रसिद्धेभ्यः पुरुषादिभ्य अचेतनत्वेन विलक्षणानां केश-नखादीनामुत्पत्तिः दृश्यते । तथाऽचेतनत्वेन प्रसिद्धेभ्यः गोमयादिभ्यः वृश्चिकादीनां चेतनानामुत्पत्तिश्च दृश्यते । यतः, अत अचेतनस्य चेतनो-पादानतायाः चेतनस्याचेतनोपादानतायाश्च प्राप्त्या प्रकृते चेतनाचेतन-भावरूपवैलक्षण्यवतोः ब्रह्मजगतोरप्युपादानोपादेयभावः सम्भवतीति ब्रह्मजगदुपादानं भवतीति हि तव सिद्धान्तः । स तु न युक्तः । केशनखादी-नामचेतनात् शरीरादेवोत्पत्तेः । अचेतनात् गोमयादचेतनस्य वृश्चिक-शरीरस्यैवोत्पत्तेः । अतो नैतद्दृष्टान्तेन ब्रह्मजगतोरुपादानोपादेयभाव-सिद्धान्तः सङ्गच्छत इति ।

यदत्रोक्तं 'तावतापि पुरुषशरीरनखलोमादीनां भोगायतनत्व-तदभावाभ्याम्, तथा वृश्चिकशरीरगोमयादीनां च ताभ्यां वैलक्षण्यस्य च सत्त्वेन विलक्षणयोरुपादानोपादेयभावविषयेऽयं दृष्टान्तः सङ्गच्छते'

इति तन्न । यथा कथञ्चित् वैलक्षण्यस्य पूर्वपक्षानुत्थापकत्वात् । चेतनाचेतनवैलक्षण्यस्यैव पूर्वपक्षोत्थापकतायाः वक्तव्यतया तथापूर्वपक्षे चेतनाचेतनवैलक्षण्येऽपि ब्रह्मजगतोरुपादानोपादेयभावः सम्भवतीति सिद्धान्तस्य वक्तव्यतया एतद्दृष्टान्तवैषम्यस्य दुर्वारत्वात् ।

किञ्च, जगत् ब्रह्मविकारो न भवति । ततोऽन्यत्वेनोपलभ्यमानत्वात् । यो यतोऽन्यत्वेनोपलभ्यते न स तद्विकारः । यथा घटः पटस्य । यश्च यद्विकारः नासौ ततोऽन्यत्वेनोपलभ्यते यथा दधि क्षीरादिति ।

अथवा, जगद्ब्रह्मणी नान्योन्यविकारविकारिणी । अन्योन्यमन्यत्वेनोपलभ्यमानत्वात् घटपटवदिति । नचास्य हेतोरसिद्धिः । 'यः सर्वज्ञः' इति ब्रह्मणः सर्वज्ञत्वश्रवणात् । जगति ज्ञानकार्यस्य सर्वथाऽप्यनुपलम्भेन तत्र ज्ञानाभावानुमानात् । विरुद्धधर्माधिकरणयोश्चान्योन्यम् अन्यत्वेनोपलम्भनियमात् इत्यादियुक्तिभिश्चापि ब्रह्मणो जगदुपादानत्वसिद्धान्तासम्भवः ।

ननु 'जगत् ब्रह्मणाभिन्नम्, सत्त्वात् ब्रह्मवत्' इत्यनुमानेन जगत्ब्रह्मणोरभेदोपलम्भात् ततोऽन्यत्वेनोपलभ्यमानत्वरूपहेतुः पक्षे जगत्यसिद्ध इति चेन्न । 'अयः स्वर्णेन अभिन्नं सत्त्वात् स्वर्णवत्' इत्याभाससमानयोगक्षेमत्वात् तादृशानुमानस्य । तथाच ब्रह्मणः जगतोऽन्यत्वोपलम्भादियुक्तिभिः निर्विकारत्वादिप्रतिपादकश्रुतिभिश्च तस्य जगदुपादानतासिद्धान्तासम्भव इति ।

ननु द्विरूपं ब्रह्माभ्युपगम्यते । अनन्तानन्दचिदात्मकं सदात्मकं चेति । तत्राद्येन रूपेण निमित्तम् । द्वितीयेन उपादानम् । अतो न

कश्चिद्दोषः। तथाहि, यत्तावदुक्तं निर्विकारत्वं तत् चिच्छक्तिविषयत्वात् श्रुत्यादेरपि न दूषणम्। प्रकृतप्रधानाद्यभिधानं सच्छक्तिकं ब्रह्म परिणमतीत्यङ्गीकारेण न युक्तिविरोधोऽपि। सदात्मकस्य जगदुपादानत्वात् चैतन्याद्यननुगमोऽपि न दोषः। सदनुगमस्य सत्त्वात्। अन्यत्वदर्शनं च न विरुद्ध्यते। यस्मादन्यत्वमुपलभ्यते सर्वज्ञात् तन्निमित्तमेव, नोपादानम्। यच्चोपादानं सद्रूपं न तस्माद्भेदेनोपलभ्यत इति चेन्न। ब्रह्मणः सद्भागेन परिणामाः, चिद्भागेन निर्विकारत्वं यद्यङ्गीक्रियते तदा वक्तव्यम्- तयोर्भागयेरभेदो वोत भेदभेदाभेदौ। न तावदभेदः। द्वयोरपि परिणामित्वप्राप्त्या भागद्वयकल्पनावैय्यर्थ्यात्। नापि भेदाभेदौ। अभेदेन पूर्वदोषानिवृत्तेः। भेदोऽभेदकार्यं निरुणद्धीति चेत्। किं तर्ह्यप्रयोजकेनाभेदेन। तस्मात् भागयोरत्यन्तभेदस्यैव स्वीकरणीयतया तत्रैकं निर्विकारं जगन्निमित्तम्। अपरं तु परिणामि-जगदुपादानमित्यङ्गीकारे केवलमीश्वरस्य निमित्तत्ववादिनां नास्माकं कश्चिद्विवादः। निर्विकारस्य जगन्निमित्तस्यास्माभिरीश्वरत्वेन, परिणामिनो जगदुपादानस्य प्रधानत्वेन स्वीकारात्। प्रपञ्चितं चैतत् श्रीमन्न्यायसुधायाम्-

'यो भागो न विकारी स्यात् स एवास्माकमीश्वरः ॥

इत्यनुव्याख्यानव्याख्यावसरे जयतीर्थश्रीमच्चरणैरिति नात्र विस्तरेण कृत्यम् ॥

अथ शिष्टापरिग्रहाधिकरणम्

॥ ॐ एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॐ ॥

यदत्रोक्तं परेण-'परिणामवाद्यभिमत-जगदुपादानत्वप्रतिकूलन्यायस्याविरोधमुपपाद्यारम्भवादिनामभिमततत्प्रतिकूलन्यायः अस्मिन्नधिकरणे निराक्रियते। अयमत्र पूर्वपक्षः- साङ्ख्ययोगवृद्धानां तर्काकुशलमतित्वाद् तदीयतर्केण ब्रह्मणो जगदुपादानत्वबाधो मा भूत्। वैशेषिकादीनां तर्ककुशलमतित्वप्रसिद्धेः तदीयन्यायस्याबाधितत्वात् तद्बाधितं ब्रह्मणो जगदुपादानत्वमिति। एवं किलारम्भवादी वैशेषिको मन्यते-कारणमहत्वस्य कार्ये स्वावधिकोक्तर्षशालिमहत्वारम्भकत्वदर्शनात् यदि महत्तमं ब्रह्म जगदुपादानं स्यात् तदा पृथ्वीपवनादिकार्यं ततो महत् स्यात्। यद्यत् द्रव्यं तत् न्यूनपरिणामद्रव्यारब्धम्, यथा तन्त्वारब्धः पटः, इति व्याप्तेर्नाप्रयोजकता। उत्कृष्टमहत्वं प्रत्याश्रयमहत्वस्य क्लृप्ता या कारणता तदुच्छेदप्रसङ्गस्य विपक्षे बाधकस्य सत्त्वात्।'

'नच विवर्तवादे एतद्दोषानवकाशात् नायमाक्षेप इति वाच्यम्। महारज्जौ अल्पपरिमाणभुजङ्गभ्रमादर्शनेन विभौ ब्रह्मणि मल्लिका-मशकाद्यारोपायोगात्' इत्यादिना पूर्वपक्षमुपपाद्य 'अयमत्र सिद्धान्ताभिप्रायः' इत्यारभ्य 'न तावत् विवर्तवादे प्राथमिको दोषः। उच्चतरगिरिशिखराद्यधिरूढपुरुषस्य न्यग्रोधभूरुहादौ अल्पतरदूर्वाप्रवालाद्यभेदारोपस्य दर्शनात्' (शां.पा.भू. पु. ६९५) इत्यादिना। तत्रोच्यते- यत्तावदुक्तं पूर्वपक्ष एवंकिलारम्भवादीत्यारभ्य, विपक्षे बाधकस्य सत्त्वादित्यन्तेन तदनुपपन्नम्। तथाहि, वैशेषिकमते कार्यद्रव्यस्य स्वन्यूनपरिणामद्रव्यारब्धत्वनियमेऽपि स नियमः मध्यमपरिमाणद्रव्यारब्धद्रव्यविषय एव।

एवञ्च तन्मते विभुद्रव्यस्य द्रव्यानारम्भकद्रव्यतया यदि परममहत्परिणामं ब्रह्म जगदुपादानं स्यात् तदा पृथिवीपवनादिकार्यं ततोऽपि महत् स्यादित्यापत्तेरनवकाशात् । नच वैशेषिकैस्तथाऽङ्गीकारेऽप्यद्वैतवादिनं प्रत्यापत्तिः क्रियत इति वाच्यम् । अद्वैतवादिना ब्रह्मणः जगत्भ्रमाधिष्ठानत्वस्याङ्गीकृततया तस्मिन् वैशेषिकपरिगृहीतस्य जगदारम्भकत्वस्यानङ्गीकारात् । अद्वैतवादिनं प्रति यदि महत्तमं ब्रह्म जगदारम्भकरूपजगदुपादानं स्यात् तदा पृथिव्यादिकार्यं ततोऽपि महत् स्यादित्यापत्तेः कर्तुमशक्यमेव । अद्वैतवादिनाऽऽपादकस्यैवानङ्गीकारात् ।

यच्चोक्तम् सिद्धान्ते, उच्चतरेत्यारभ्य दर्शनादित्यन्तेन तदप्यनुपपन्नम् । पुरुषस्योच्चस्थानस्थितत्वेन तत्रोच्चस्थानस्थितत्वरूपदोषविशेषेण तथा भ्रमसम्भवेऽपि महति ब्रह्मण्यल्पपरिमाणजगदारोपोत्पत्तौ बीजविशेषाभावः ।

किञ्चापरोक्षभ्रमस्य सत्यभूतारोप्यमाणात्यन्तसदृशाधिष्ठानप्रधानसापेक्षतया ब्रह्मणश्चेतनतया जगतस्त्वचेतनतया तयोरत्यन्तसादृश्याभावेन ब्रह्मणि जगदारोपासम्भवात् । नचारोप्यमाणाधिष्ठानसादृश्यं नारोपे प्रयोजकमिति त्वया वक्तुं शक्यम् । अन्तस्थाधिकरणे कौक्षेयकज्योतिष अचेतनत्वेन ब्रह्मात्मकज्योतिषः चेतनतया तयोरत्यन्तसादृश्याभावेन कौक्षेयकज्योतिषि ब्रह्मारोपासम्भवस्य त्वयाऽङ्गीकृतत्वात् । नचारोप्यमाणाधिष्ठानयोरत्यन्तसादृश्यस्य प्रायः अपेक्षायाम् अपि ब्रह्मणि जगदारोपे न तस्य प्रयोजकत्वम् । किन्त्वन्यत्रैव तथेत्यङ्गीक्रियते । अतो नानुपपत्तिरिति वाच्यम् । एवं कल्पनायाः त्वदनुभवैकवेद्यत्वेनानादरणीयत्वात् । किञ्चारोपे आरोप्यमाणसदृशसत्यप्रधाना-

पेक्षायाश्चापि सत्त्वेन ब्रह्मणि जगदारोपं वदता त्वया प्रधानभूतं सत्यं जगदङ्गीकर्तव्यं भविष्यति । तथाचैकस्य जगतः मिथ्यात्वेऽन्यत् जगत् सत्यमायातमिति तवापसिद्धान्तः प्राप्नोतीति ब्रह्मणि जगदारोपस्याङ्गीकर्तुमशक्यत्वात् ।

एतेन निर्विकारस्य ब्रह्मणः परिणामरूपस्य जगदुपादानत्वस्यासम्भवेऽपि जगदारोपाधिष्ठानत्वरूपजगदुपादानत्वं तस्य सम्भवतीति निरस्तम् । ब्रह्मणि जगदारोपासम्भवस्योक्तत्वदित्यलं विस्तरेण ॥

अथ भोक्त्रधिकरणम्

॥ ॐ भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत् ॐ ॥

(परोक्तपूर्वपक्षपरिशीलनम्)

यदत्रोक्तं परेण- ''अत्रोक्तसमन्वयेनावगम्यमानं 'तत्वमसि' 'सर्वं खल्विदं ब्रह्म' इति वाक्यप्रतिपाद्यमानमद्वैतं प्रत्यक्षसिद्धभोक्तृभोग्य-विभागलोपप्रसङ्गरूपतर्कबाध्यं नवेति सन्देहे पूर्वपक्षः- स्यादेव बाधः। 'तत्वमसि' 'सर्वमिदं ब्रह्म' इति वाक्यस्य स्वारसिकार्थाङ्गीकारे ब्रह्मा-भिन्नयोर्जीवजगतोः परस्परमभेदः स्यात् इत्युक्तविभागलोपप्रसङ्गस्य दुर्वारितया तादृशवाक्यस्यार्थान्तरपरताया आवश्यकतयाऽयुक्तमिदं ब्रह्मकारणतावधाणमिति।

ननूक्तन्यायेन जीवजगतोरभेदाभिधानस्यायुक्तत्वेऽपि ब्रह्मकारणता-वधारणस्य कथमयुक्ततेति चेत्- जीवजगतोः ब्रह्मोपादेयतया श्रुतत्वादुपा-दानोपादेययोश्च समवायं निराकुर्वता सिद्धान्तिना परिशेषात् तयोरभेद-स्यैवोपगन्तव्यतया अभेदासम्भवे उपादानोपादेयभावोऽपि न सम्भवती-त्यभिमानवतः पूर्वपक्षिणः तथोक्तिसम्भवात्।

वस्तुतस्तु पूर्वोक्तं जगदुपादानत्वम् उक्ततर्कविरोधादयुक्तमुत युक्तम् इत्यत्र चिन्त्यते। तत्र तावदयुक्तमिति पूर्वः पक्षः। उपादानोपादेययोर्न समवाय इति वदता तयोरभेद एव परिशेषात् वाच्य इति ब्रह्माभिन्नयोः भोक्तृभोग्ययोः परस्परात्मतापत्त्या विभागाभावापत्तेः'' इत्यनेन, तत्रो-च्यते। यदुक्तम्- 'तत्वमसि, सर्वं खल्दिं ब्रह्म इति वाक्यप्रतिपाद्य-मानमद्वैतम्' इति तदनुपपन्नम्। अद्वैतस्य तथाविधवाक्यप्रतिपाद्यतायाः

पूर्वं बहुधा खण्डितत्वात् । सन्देहपूर्वपक्षावप्यनुपपन्नौ । तथाहि, भोक्तृभोग्यविभागलोपप्रसङ्गरूपतर्कस्यावतारः कदा ? व्यवहारकाले, उत मुक्तिकाले। आद्येऽद्वैतस्य तादृशवाक्यप्रतिपाद्यत्वेऽपि व्यावहारिक-भेदमात्रेण भोक्तृभोग्यविभागोपपत्तेः तल्लोपप्रसङ्गरूपस्तर्कः नावतरति। द्वितीये भोक्तृभोग्यविभागलोपस्याङ्गीकृततया तल्लोपस्येष्टत्वादेव तल्लोप-प्रसङ्गरूपतर्कस्यानवतार एवेत्यतः उक्ततर्कस्यैवानवतारे अद्वैतं तथा-विधतर्कबाध्यं नवेति संशयस्य, बाध्यमेवेति पूर्वपक्षस्य चानवकाशात्।

'यत्तु चन्द्रिकायाम्, यदुक्तं परैः- ब्रह्मण उपादानत्वे भोक्तुः शरीरिणः भोग्यत्वापत्तेः, भोग्यस्य शब्दादेः भोक्तृत्वापत्तेस्तयोरविभागः स्यात्। द्वयोरपि परमकारणब्रह्मानन्यत्वादिति । मैवम् एकसमुद्रकार्याणां फेन-तरङ्गादीनामिव विभागोपपत्तेरिति सिद्धान्तः' इत्यनूद्य 'पूर्वपक्षे विवर्त-सिद्धान्ते नोक्तसाङ्कर्यसम्भवः । जगद्भ्रमहेत्वविद्याविषयतालक्षण-स्याधिष्ठानत्वस्य समवायतादात्म्यलक्षणसम्बन्धद्वयनिरपेक्षत्वादिति दूषणमुक्तम्' इत्यनेन चन्द्रिकोक्तदूषणमुपपाद्य तदसदिति प्रजल्प्य यदुक्तम् 'उक्ताधिष्ठानतामात्रं नोपादानता । किन्तु कार्यसमवायिकारणता, कार्याभिन्नकारणता वा। अन्यथा पारिभाषिकतापत्तेः एकविज्ञाने सर्व-विज्ञानोपपादनायोगाच्च । नच तदुभयमपि ब्रह्मणि युज्यते । समवाया-नभ्युपगमात् आद्यस्यासम्भवेन द्वितीयस्यैवाभ्युपगतव्यतयाऽविभागः स्यादिति शङ्कायाः निरपवादत्वात्' इत्यनेन तदसत् । तथाहि, यच्च समवायानभ्युपगमेन समवायिकारणताया उपादानतास्वरूपतां प्रदूष्य कार्याभिन्नकारणतायाश्चोपादानतास्वरूपत्वाङ्गीकरणं तन्न । समवा-यानङ्गीकारेऽपि समवायस्थाने स्वरूपसम्बन्धं निवेश्य यस्मिन् स्वरूप-

सम्बन्धेन विद्यमानं सत् यद्भावकार्यमुत्पद्यते तत्कार्यं प्रति तत्समवायिकारणमिति वक्तुं शक्यतया आद्यस्यासम्भवेन इत्यसङ्गतम्। उपादानताकार्याभिन्नकारणतेत्यपि वक्तुम् अशक्यम् अभेदे कार्यकारणभावानुपपत्तेः।

ननु भवद्भिरप्युपादानोपादेययोरैक्यमङ्गीकृतमिति भवन्मतेऽप्यभेदे कार्यकारणभावानुपपत्तिरित्यस्तीति चेन्न। अस्मन्मते तयोरभेदेऽपि भेदकार्यनिर्वाहकविशेषस्याङ्गीकृततया तेन तादृशानुपपत्तिपरिहारात्। नचैवं त्वया वक्तुं शक्यं त्वया विशेषानङ्गीकारात्।

किञ्च, कार्यजगदभेदे ब्रह्मणः जडत्वापत्तेश्च। किञ्च, कार्यस्य सर्वजगतः ब्रह्माभिन्नतया यद्यदभिन्नाभिन्नं तत् ततो नाभिन्नमिति न्यायेन दण्डस्य घटाभिन्नब्रह्माभिन्नतया तस्य घटाभिन्नत्वस्य घटकारणत्वस्य च प्राप्त्या दण्डस्य घटोपादानतापत्तेश्च।

किञ्च, निर्विकारस्य ब्रह्मणः कार्यात्मना परिणामासम्भवेन कार्याभेदानुपपत्तेश्च। तस्मात् जगद्भ्रमहेत्वविद्याविषयतालक्षणाधिष्ठानत्वरूपं जगदुपादानत्वं ब्रह्मण इत्यवश्यमङ्गीकर्तव्यम्। नचैवं सत्युपादानतायाः पारिभाषिकतापत्तिरिति वाच्यम्। उपादानतायाः कार्याभिन्नकारणतारूपत्वेऽपि तस्याः पारिभाषिकत्वापत्तेरवारणात्। नच, 'उपादीयते कार्यं स्वस्वरूपतयाऽनेन' इत्युपादानमिति व्युत्पत्त्या उपादानशब्देन कार्याभिन्नत्वलाभेन नास्मन्मत उपादानतायाः पारिभाषिकत्वापत्तिरिति वाच्यम्। व्युत्पत्तिलभ्यस्यार्थस्य सति बाधके पारिभाषिकार्थस्यावश्यं ग्राह्यत्वात्। अथवा उपादीयते स्वीक्रियते कार्यं स्वाविद्याजन्यभ्रमविषयतयानेनेति व्युत्पत्त्योपादानशब्देन जगद्भ्रमहेत्वविद्याविषयता-

लक्षणाधिष्ठानत्वस्य लाभसम्भवेन, अस्मिन् पक्षेऽप्युपादानतायाः पारिभाषिकत्वस्याभावात्। एवञ्च ब्रह्मणः कार्याभिन्नकारणत्वरूपोपादानत्वासम्भवेन जगद्भ्रमहेत्वविद्याविषयतालक्षणस्यैवोपादानत्वस्य अवश्यम् अङ्गीकर्तव्यतया अविभागः स्यादिति शङ्काया असम्भवेन विवर्तसिद्धान्ते पूर्वपक्षे नोक्तसाङ्कर्याशङ्कासम्भव इति चन्द्रिकोक्तं सूक्तम्।

अथैवं ब्रह्मणः कार्याभिन्नकारणतारूपोपादानत्वानङ्गीकारे ब्रह्मविज्ञानेन सर्वविज्ञानोपपादनं न युज्यत इति वाच्यम्। 'प्रधानपुरुषज्ञानात् ग्रामो ज्ञातः' इतिवत् ब्रह्मणः प्राधान्येन निमित्तेन येन ब्रह्मविज्ञातं स पुरुषः सर्वविद्वानित्युच्यते। अतः ब्रह्मविज्ञानेन सर्वविज्ञानोपपादनस्य युक्तत्वात्।

'यदपि चन्द्रिकायां पूर्वपक्षे- किञ्च पूर्वपक्षिणा किं कार्याणां चेतनत्वेन विभागो न स्यादित्यापाद्यते ? किं वा येन केनचिद्रूपेण ? नाद्यः। चेतनस्यानादित्वेन कार्ये तद्विभागाभावे इष्टापत्तेः। ननु चेतनस्यानादित्वेऽपि ब्रह्माभेदात् ब्रह्मकार्यत्वेन ब्रह्माभिन्नं यज्जडं तद्रूपतापत्तिरिति चेन्न। 'दृश्यते तु' इति सूत्रेणैव जडोपादानत्वेऽपि ब्रह्मणश्चेतनत्वाहानेरुक्तत्वात् ब्रह्माभेदेन जीवस्य जडत्वाप्राप्तेः। नान्त्यः। एकस्वर्णकार्याणां कटकमुकुटाद्यवस्थानां भेदस्यैव दर्शनेन ब्रह्मकार्याणाम् अप्याकाशवाय्वादीनां भेदसम्भवात्। सुवर्णपिण्डः सावयवः। ब्रह्म तु निरवयवमिति चेत्। त्वन्मतेऽपि कृत्स्नप्रसक्तिरिति सूत्रे इव निरवयवस्य ब्रह्मणः युगपदेनेकद्रव्योपादानत्वं न युक्तमित्येव पूर्वपक्षयितव्यम्। न तु कार्याणां विभागो न युक्त इति। तस्मान्न पूर्वपक्षोदयः, इति दूषणमुक्तम्' इत्यनेन चन्द्रिकोक्तं दूषणमुपपाद्य, तदप्यकाण्डताण्डवमिति प्रजल्प्य

यदुक्तम् 'भेदाभेदयोर्विरोधात् भेदमात्रोपगमे समवायानभ्युपगमाद् उपादानत्वानुपपत्तिः । अभेदस्यैवोपगमे भोक्त्रादिविभागानुपपत्तिरिति रीत्याऽस्मदभिमतपूर्वपक्षे उक्तविकल्पाप्रसरात्' (शां.पा.भू.पु. ७०१) इत्यादिना तन्न। तथाहि, समानसत्ताकयोर्भेदाभेदयोर्विरोधेऽपि व्यावहारिभेदस्याभेदस्य च पारमार्थिकस्याङ्गीकारे न विरोधः । तथैव त्वयाऽङ्गीकारात्। अतः भेदाभेदयोर्विरोधादित्यसङ्गतम्। भेदमात्रोपगमे समवायानभ्युपगमाद् उपादानत्वानुपपत्तिरित्यप्यसङ्गतम्। समवायस्थाने स्वरूपसम्बन्धं निवेश्योपादानतायाः पूर्वमुक्तत्वात्। अभेदस्यैवोपगमे भोक्त्रादिविभागाननुपपत्तिरित्यप्यसङ्गतम् । व्यवहारकाले व्यावहारिकस्य भेदस्य ब्रह्मजगतोस्त्वयाऽङ्गकृततया तेनैव भोक्तृभोग्याविभागपूर्वपक्षानवकाशात् । तथाचैवं स्वयमकाण्डताण्डवं प्रजल्प्य चन्द्रिकोक्तस्याकाण्डताण्डवत्वजल्पनमुन्मत्तजल्पनमेवेति ज्ञेयम् ।

ननु जीवब्रह्मणोः स्वरूपैक्येऽपि तयोरौपाधिकभेदाभ्युपगमेन भोक्तृभोग्यविभागोपपत्तिरिति तु सिद्धान्ते वक्ष्यमाणा युक्तिः । इदानीं तामाच्छाद्यैव पूर्वपक्षप्रवृत्तिरिति वक्तव्यं भविष्यतीति कथं पूर्वपक्षस्यानवकाश इति चेन्न। औपाधिकभेदस्य त्वया पूर्वं बहुधा भाषितत्वेन तस्यातिप्रसिद्धतया तदाच्छादनायोगात् ।

किञ्चौपाधिकभेदस्याप्याच्छादने पूर्वपक्षावकाश एव नास्ति । पूर्वपक्षिसिद्धान्तिनोः पृथक् सत्त्वे पूर्वपक्षस्य सिद्धान्तस्य अवकाशः । तयोरेवाभावे कुतः पूर्वपक्षसिद्धान्तयोरवकाश इति ।

वस्तुतस्त्वयमत्र चन्द्रिकाचार्याणामाशयः। चेतनस्य भोक्तृत्वमचेतनस्य

भोग्यत्वमिति हि स्थितिः। चेतनाचेतनयोस्त्वभेदः नह्यङ्गीकृतः। चिन्मात्रे ब्रह्मण्यचेतनं जगदध्यस्तमिति तवाभ्युपगमः। नह्यारोप्यमाणाधिष्ठानयोरभेदं कश्चन वादी मन्यते। एवञ्च भोक्तृभोग्ययोरभेदप्रसक्तेरेवाभावेन तयोरविभागेन पूर्वपक्षानवकाशः। उपादानोपादेययोरभेदेन ब्रह्मणः जगदुपादानतया जगद्ब्रह्मणोरभेदप्रसक्तिरिति च वक्तुमशक्यम्। मायाशब्दिताज्ञानगतं जगदुपादानत्वं ब्रह्मण्युपचर्यत इति त्वयाभ्युपगततया तस्यापि ब्रह्मण्यभावात्। प्रतिपादितं चैवमेव जन्माधिकरणे जगत्कारणत्वस्य ब्रह्मतटस्थलक्षणत्वकथनावसरे त्वयेति।

एकसमुद्रकार्याणां फेनतरङ्गादीनामिव विभागोपपत्तिरिति 'लोकवत्' (सूत्रखण्डः) इत्यनेन सिद्धान्तोऽप्यसङ्गत एव। समुद्रस्य फेनतरङ्गात्मना विकाररूपपरिणामसम्भवेन तद्विकाराणां फेनतरङ्गादीनां समुद्रात् स्वरूपाभेदेऽप्यौपाधिकभेदमात्रेण तथा विभागोपपत्तिरिति वक्तुं शक्यतया तत्र सम्भवेऽपि चेतनस्याचेतनात्मना परिणामस्य क्वाप्यदृष्टतया ब्रह्मणः जगदात्मना परिणामासम्भवेन प्रकृते तथा वक्तुमशक्यत्वात्।

किञ्च, चेतनाचेतनयोरैक्येन भोक्तृभोग्यविभागानुपपत्त्याक्षेपे जीवब्रह्मणोः स्वरूपैक्येऽपि तयोरौपाधिकभेदाभ्युपगमेन तादृशविभागोपपत्तिरित्यस्यासङ्गतत्वाच्च।

किञ्च, भोक्त्रापत्तेरित्यस्य भोग्यस्य भोक्तृत्वापत्तेरिति व्याख्यानं सूत्रकारस्याभिमतं स्यात् यदि तर्हि कुतो हरिः सूत्रकृत् भोक्त्रापत्तेरित्याह? भोक्तृत्वापत्तेरित्येव ब्रूयात्। नचैवमब्रवीत्। ततो नायमभिप्रायः सूत्रकारस्येति। ननु भावप्रधाननिर्देशास्तत्र तत्र 'मुक्तोपसृप्यव्यपदेशात्'

इत्यादौ बहुलमुपलभ्यन्त इति तद्वदत्रापि भावप्रधाननिर्देशेन विवक्षितार्थलाभसम्भवे कथमयं दोषोऽभिधीयत इति चेन्न। प्रतिपाद्ये व्यवस्थिते तद्बलात् शाब्दी गौणता कथञ्चिदनुसर्तव्या। नचास्य सूत्रस्येदं प्रतिपाद्यं व्यवस्थितम्। अतः निर्निमित्तः शाब्ददोषो नानुसरणार्ह इति। तस्मात् भोक्तुः= जीवस्य, मोक्षे ब्रह्मतादात्म्यश्रवणात्तयोरविभागः= भेदाभावः। ततश्च न ब्रह्मणः जगत्कारणत्वं युक्तम्, इत्याक्षेपे भवेदेतदखिलं यदि मुक्तस्य ब्रह्मणाऽभेद एव प्रामाणिकः स्यात्। नचैतदस्ति। श्रौतस्त्वेकीभावप्रयोगः 'स्याल्लोकवत्'। यथा लोके उदके उदकस्यैकीभावव्यवहारः स्थानैक्यनिबन्धनः। तद्वदत्रापि, इति सूत्रार्थ-वर्णनमेव समीचीनमिति सर्वमवदाम्॥

अथ तदनन्यत्वाधिकरणम्

॥ ॐ तदनन्यत्वमारम्भणशब्दादिभ्यः ॐ ॥

यदत्रोक्तं परेण- ''भोक्तृभोग्यविभागाभावप्रसङ्गपूर्वपक्षे स्याल्लोकवदिति परिणामवादमाश्रित्य समाधानमुक्त्वा तत्रैव विवर्तवादमाश्रित्य मुख्यसमाधानार्थम् इदं सूत्रम्। अत्र ब्रह्मणः जगदुपादानत्वं निर्विकारत्वभङ्गापत्तिरूपतर्कविरुद्धं नवेति संशये भवत्येव तर्कविरुद्धम्। ब्रह्मणः निर्विकारत्वस्य सिद्धान्तिनोऽप्यनुमततयेष्टापत्त्यनवकाशात्। मूलशैथिल्याभावाच्चेति पूर्वपक्षे नोक्ततर्कविरोधः। धर्मिसमानसत्ताक-विकारशून्यत्वरूपसिद्धान्त्यभिमतनिर्विकारत्वस्य ब्रह्मगतोपादानताऽविरोधात्। विकारस्य मिथ्यात्वात्, ब्रह्मणश्च सत्यत्वात्, स्वीकृतेऽप्युपादानत्वे निर्विकारत्वभङ्गाभावात्। मिथ्यात्वं चानिर्वचनीयत्वम्। नात्यन्तासत्त्वमिति सिद्धान्तमाह सूत्रकारः- **तदनन्यत्वमिति॥** कार्यस्य विकारजातस्य, तदनन्यत्वं=कारणानन्यत्वं मिथ्यात्वमिति यावत्। कुतः? **'आरम्भणशब्दादिभ्यः'**। आरम्भणशब्दस्तावत् एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय दृष्टान्तापेक्षायामुच्यते 'यथा सौम्य एकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्, वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इत्येवंरूपा। आदिपदात् 'ऐतदात्म्यमिदं सर्वम्' 'तत्सत्यं स आत्मा तत्त्वमसि' 'इदं सर्वं यदयमात्मा' 'ब्रह्मैवेदं सर्वम्' 'आत्मैवेदं सर्वम्' 'नेह नानास्ति किञ्चन' इत्येवमादिश्रुतिजातम्। विश्वं मिथ्या दृश्यत्वात् परिच्छिन्नत्वादित्याद्यनुमानं भाष्याद्युपदर्शितं ग्राह्यमत्र। वाचारम्भणशब्दादिभ्य इति सूत्रांशेन वाचारम्भरणम् इत्यादिश्रुतेः हेतूकारणात्, तस्याश्च प्रपञ्चमिथ्यात्वकथन एव स्वारस्यात् अनन्यत्वपदेन

साध्यतया मिथ्यात्वमेव प्रतीयत इति ध्येयम्'' इत्यादिना, तत्रोच्यते। पूर्वपक्षे, स्याल्लोकवदिति परिणामवादमाश्रित्य समाधानमुक्त्वेत्यनुपपन्नम्। ब्रह्मपरिणामवादं साङ्ख्यसिद्धान्तमवलम्ब्य समाधानाभिधानेन जगतः ब्रह्मोपादानकतां ब्रह्मानन्यतामङ्गीकर्त्रा साङ्ख्यातिरिक्तेन पूर्वपक्षिणा भाव्यम्। नच वैशेषिकास्तथा। तैर्जगतः ब्रह्मोपादानत्वानङ्गीकारात्। अतस्तान् प्रति न तदन्यत्वोक्तेरवसरोऽस्ति। नच ब्रह्मोपादानत्वमप्यत्र साध्यत इति वाच्यम्। तथासति प्रकृत्यधिकरणवैय्यर्थ्यापत्तेः।

ननु प्रकृत्यधिकरणन्यायेनोपपादितब्रह्मोपादानतामभ्युपेत्यापि तदन्यतां मन्यमानोऽत्र पूर्वपक्षीति चेत् न। किमिदं ब्रह्मोपादानत्वम्? ब्रह्मसमवायिकारणकत्वं वा ब्रह्मपरिणामत्वं वा। नाद्यः। तस्यानन्यत्वविरोधात्। समवायिकारणेन साकं कार्यस्य तैरभेदानङ्गीकारात्। समवायस्य निराकरिष्यमाणत्वाच्च। द्वितीये प्रयत्नवैय्यर्थ्यमेव। नहि कोऽपि परिणामवादमङ्गीकृत्य कार्यकारणयोरत्यन्तभेदमङ्गीकुरुते। यं प्रतीदं समाधानमुपपन्नं भवेदिति।

तत्रैव विवर्तवादे मुख्यसमाधानार्थमिदं सूत्रमित्यनुपपन्नमेव। पूर्वं स्याल्लोकवदिति परिहारस्तु व्यावहारिकं भोक्तृभोग्यलक्षणं विभागमादायैवाभिहितः। न त्वयं विभागः परमार्थतोऽस्तीत्येव तव मुख्यं समाधानम्। तथासति ब्रह्मणः जडत्वमपरिहार्यमेव।

किञ्च, यद्यत्र कार्यमात्रप्रपञ्चस्यानृतत्वं सूत्रकृत अभिमतं स्यात् तदाऽनृतत्वमित्येवं ब्रूयात्। तदनन्यत्वमिति कथमुक्तवान्? नहि ब्रह्मानन्यत्वशब्दः अनृतत्ववाची। तथासति ब्रह्मणोऽप्यनृतत्वप्रसङ्गात्।

(मिथ्याभिप्रायकत्वे सूत्राक्षरानानुगुण्योपपादनम्)

यदत्रोक्तं परेण- 'तदनन्यत्वपदेन कथं मिथ्यात्वप्रतीतिः ? तत्र तस्य शक्त्यादिग्राहकप्रमाणाभावात्। आधुनिकलक्षणाभ्युपगमे च सूत्राक्षरास्वारस्यम्। 'मिथ्यात्वमारम्भणशब्दादिभ्यः' इति विन्यासापेक्षायां निर्बीजता चेति चेदत्रोच्यते- तदनन्यत्वमिति सूत्रे तत्वत इति पदम् अध्याह्रीयते। अनन्यत्वपदं चावर्तनीयम्। तथाच तदनन्यत्वपदं तत्वतस्तदनन्यत्वपरम्, तादात्म्यपरं च। तत्त्वतस्तदनन्यत्वं च तदन्यस्वीय-तात्विकरूपशून्यत्वम्। तथाच विशेषनिषेधस्य शेषाभ्यनुज्ञानार्थत्वात् ब्रह्मान्यजगद्रूपस्यातात्विकता मिथ्यात्वापरपर्याया लभ्यत इति नोक्तदोषः। नच तत्वतस्तदनन्यत्वसाधनमात्रेण जगतः मिथ्यात्वसिद्ध्योक्तपूर्वपक्षनिराससम्भवे तादात्म्यसाधनं व्यर्थमिति शङ्क्यम्। तुच्छसाधारणेन ब्रह्मव्यतिरिक्ततात्विकरूपशून्यत्वेन जगतः मिथ्यात्वे तुच्छत्वापत्त्या तदुपादानत्वं ब्रह्मणो दुर्घटितमिति शङ्कानिरासाय तादात्म्यस्यापि तत्र वक्तव्यत्वात्' (शां.पा.भू. पु.७१४) इत्यनेन तदसत्। तथाहि।

यदुक्तम्, सूत्रे तत्वत इति पदमध्याह्रीयत इति तन्न। यत्र वाक्ये यत्पदाध्याहारं विनाऽर्थान्तरस्याघटना तस्मिन् वाक्ये तत्पदमध्याहृतं भवेदिति सतां न्यायः। प्रकृते तत्वत इति पदाध्याहाराभावेऽपि समञ्जससूत्रार्थवर्णनसम्भवेन तत्वत इति पदाध्याहारस्याप्रयोजनत्वात्। सम्भवप्रकारस्तु,

'स्वतन्त्रकारणान्यत्वं तेन ह्यत्र निषिध्यते'

इत्यनुव्याख्यानव्याख्यावसरे सुधायां जयतीर्थश्रीमच्चरणैरतिविशदमुपपादित एवेति ।

किञ्च, तत्वत इति पदमध्याहृत्य तदनन्यत्वपदस्य ब्रह्मान्यस्वीयतात्विकरूपशून्यत्वे सति ब्रह्मतादात्म्यरूपार्थवर्णनेऽपि तस्यार्थस्य जगति मिथ्यात्वलाभाप्रयोजकत्वम् । तथाविधार्थस्य जगति मिथ्यात्वलाभप्रयोजकत्वे ब्रह्मण्यपि ब्रह्मव्यतिरिक्ततात्विकरूपशून्यत्वे सति ब्रह्मतादात्म्यस्य सत्त्वेन ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गः ।

किञ्च, मिथ्याभूतस्य जगतः ब्रह्मतादात्म्ये ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गश्च । किञ्च पूर्वं परिणामवादमाश्रित्य समाधानमुक्त्वा तत्रैव विवर्तवादे मुख्यसमाधानार्थमिदं सूत्रमित्यनुपपन्नं स्यात् । ब्रह्मणः जगत्तादात्म्याङ्गीकारे परिणामवादाश्रयणस्यैव प्राप्तेः ।

किञ्चैवमतिक्लेशेन मिथ्यात्वबोधकतदनन्यत्वपदघटितसूत्रविन्यासापेक्षया 'मिथ्यात्वमारम्भणशब्दादिभ्यः' इति सूत्रविन्यासस्यौचित्ये तथा विन्यासस्य निर्बीजतादुर्वाराच्च ।

(तदन्यत्वशब्दार्थविमर्शः)

किञ्च, तदनन्यत्वशब्दः किं साक्षान्मिथ्यात्वं बोधयत्युतार्थात् । नाद्यः। तदनन्यस्वीयतात्विकरूपशून्यत्वे सति तत्तादात्म्यस्य साक्षात्तदर्थतयोपवर्णितत्वात् । नच तदेव मिथ्यात्वम् । तस्य ब्रह्मसाधारण्यस्योक्तत्वात् । अत एव न द्वितीयः । 'जगत् मिथ्या, ब्रह्मान्यस्वीयतात्विकरूपशून्यत्वे सति तत्तादात्म्यात्' इति ह्यर्थात् मिथ्यात्वलाभप्रकारः । स तु न सम्भवति । उक्तहेतोः मिथ्यात्वाभाववति ब्रह्मणि विद्यामानतया व्यभिचारात् ।

किञ्च, साक्षान्मिथ्यात्वबोधकपदं परित्यज्य परम्परया तद्बोधकपद-घटितसूत्रोपन्यासाङ्गीकारे सूत्राक्षरास्वारस्य दुर्वारता च ।

किञ्च, तदनन्यत्वपदस्य तदन्य-स्वीय-तात्विकरूपशून्यत्वे सति तत्तादात्म्यरूपार्थोपवर्णनम् असम्भवदुक्तिकमपि । अप्रामाणिक-प्रतियोगिकाभावानङ्गीकारपक्षे ब्रह्मान्यस्वीयतात्विकरूपात्मकप्रति-योग्यप्रसिद्ध्या तच्छून्यत्वस्याप्रसिद्धेः । नच ब्रह्मान्यस्वीयरूपनिष्ठ-तात्विकत्वावच्छिन्नप्रतियोगिताकाभावनिवेशान्नैष दोषः । तात्विकत्वस्य ब्रह्मान्यस्वीयरूपनिष्ठप्रतियोगिताव्यधिकरणतया तदवच्छिन्नतथा-विधरूपनिष्ठप्रतियोगिताकाभावसम्भवादिति वाच्यम् । व्यधिकरणधर्माव-च्छिन्नाभावानभ्युपगमपक्षे तथाविधाभावस्योपपादयितुमशक्यत्वात् ।

नच द्वैतवादिवेदान्तिनामस्मत्प्रतिवादितया तैरप्रामाणिकप्रति-योगिकाभावस्याङ्गीकृततया तान् प्रति ब्रह्मान्यस्वीयतात्विकरूपशून्यत्वं यथाश्रुतमेव बोधयितुं सुखेन शक्यमिति वाच्यम् । द्वैतवादिनां सर्वेषां त्वत्प्रतिवादितया नैय्यायिकानामपि द्वैतवादित्वेन प्रतिवादितया तेषामपि बोद्धव्यतया प्रसक्तत्वेन तान् प्रति बोधयितुमशक्यत्वात् ।

(उपादानत्वे ब्रह्मणः विकारित्वप्रसङ्गः)

यच्चोक्तम्- 'धर्मिसमानसत्ताक-विकारशून्यत्वरूप-सिद्धान्त्यभिमत-निर्विकारत्वस्य ब्रह्मगतोपादानतयाऽविरोधात् । विकारस्य मिथ्यात्वात् ब्रह्मणश्च सत्यत्वात् । स्वीकृतेऽप्युपादानत्वे निर्विकारत्वभङ्गाभावात्' इत्यनेन । तत्रोच्यते- ब्रह्मगतोपादानत्वं धर्मिसमानसत्ताकमुत मिथ्या । आद्ये तथाविधोपादानत्वेन प्राप्तस्य विकारस्यापि तादृशस्यैव प्राप्त्या 'निर्विकारत्वभङ्गाभावात्' इति रिक्तं वचः स्यात् । द्वितीये जगदुपा-

दानताप्रतिपादकानां श्रुतिस्मृतीनामप्रामाण्यापत्तिः । ब्रह्मणः जगदुपादानत्वस्य मिथ्यात्वेन तासां मिथ्याभूतार्थप्रतिपादकत्वात् ।

नच ब्रह्मणि जगदुपादानत्वस्य व्यावहारिकतया ब्रह्मणस्तत्प्रतिपादकानां वाक्यानां व्यावहारिकविषयकत्वलक्षणं प्रामाण्यं सम्भवतीति वाच्यम् । व्यावहारिकपदेन परमार्थसत् गीयत उतापरमार्थम् । आद्ये पूर्वोक्तरीत्या निर्विकारत्वभङ्गापत्तिरेव । द्वितीये श्रुतिस्मृतीनामप्रामाण्यापत्तेर्दुर्वारता । नच व्यावहारिकपदने न परमार्थसत् गीयते, नापरमार्थम् । किन्त्वनिर्वाच्यमुच्यत इति वाच्यम् । सर्वस्यापि निर्वचनार्हत्वेनानिर्वाच्यस्याप्रसिद्धत्वात् ।

एतेन, मिथ्यात्वं चानिर्वाच्यत्वम्, नात्यन्तासत्त्वमित्यपि निरस्तम् । ब्रह्मणि जगदुपादानताप्रतिपादकश्रुतिस्मृतीनां मिथ्याभूतोपादानताप्रतिपादकत्वस्यैव प्राप्त्याऽप्रामाण्यापत्तेर्दुर्वारत्वात् ।

एतेन, न तावत् ब्रह्माभेदः तदनन्यत्वम् । अनृतस्य विश्वस्य ब्रह्माभेदायोगादनङ्गीकाराच्च । अज्ञानविशिष्टेनोपादानेनाभेदोऽस्तीति चेत् मुमुक्षुज्ञेयशुद्धब्रह्मज्ञानादेव सर्वविज्ञानार्थं शुद्धेनैवाभेदस्य वक्तव्यत्वात् । नापि 'न खल्वनन्यत्वमित्यभेदं ब्रूमः । किन्तु भेदं व्यासेधाम' इति कल्पतरूक्तरीत्या ततो भेदभावमात्रं तदनन्यत्वम् । भेदाभावेऽभेदध्रौव्यात् । भेदाभावे सत्यानृतत्वव्यवस्थाऽयोगाच्च । अभेदाभावेन व्यवस्थायां तेनैवैकविज्ञानेन सर्वविज्ञानाभावोऽपि स्यात् । यदि चैकविज्ञानेन सर्वविज्ञानानुपपत्त्या भेदाभावः, सत्यानृतव्यवस्थानुपपत्त्या चाभेदाभावः कल्प्यते । तर्ह्युभयानुपपत्त्या लाघवाय तथा 'इदं सर्वं यदयमात्मा' 'नेति नेति' इत्यादि-

सामानाधिकरण्यश्रुतिभेदश्रुत्योः मृत्पिण्डादिदृष्टान्तस्य च स्वारस्याय भेदाभेदावेव किं न कल्प्येते। ब्रह्मणः एकरसत्वश्रुतिरप्यनेकरसात् प्रपञ्चात् भेदाभावेऽप्यभेदाभावमात्रेणैव भेदेऽप्यभेदेनैवोपपन्नास्तु । यथा च सत्यस्यानृताभेदो न युक्तः तथा ततो भेदाभावोऽपि ।

नापि ब्रह्मव्यतिरेकेणासत्त्वं तदनन्यत्वम् । विशेषनिषेधस्य शेषाभ्यनुज्ञानार्थत्वात् । आनन्दादिवत् जीवचैतन्यवच्च बह्मात्मकत्वापातात् । ब्रह्मण्यारोपितत्वं तु न तदनन्यत्वशब्दार्थः । शुक्त्यारोपिते तदनन्यशब्दाप्रयोगात् । प्रातिभासिकव्यावहारिकयोः व्यावहारिकपारमार्थिकाभ्यामन्यत्वाभावेऽनिर्वाच्यत्वासिद्धेश्च । एकविज्ञानेन सर्वविज्ञानायोगाच्च । मृत्पिण्डादि-दृष्टान्तानुपपत्तेश्च ।

'कथं हि ब्रह्मविज्ञानाद्विज्ञातं सकलं भवेदिति चन्द्रिकोक्तमनादरणीयमेव' (शां.पा.भू. पु. ७१६) इति प्रजल्प्य यदुक्तम् 'आरम्भणशब्दादिभ्य इति सूत्रांशेन वाचारम्भणमित्यादिश्रुतेः हेतूकरणात्, तस्याश्च प्रपञ्चमिथ्यात्वकथन एव स्वरसादुक्तरीत्या तादात्म्यघटितमिथ्यात्वस्य एतदनन्यत्वमित्यनेन विवक्षितार्थस्य प्रतीतेः 'यद्रजतम् अभात् सा शुक्तिः' इति सामानाधिकरण्यप्रतीतेः सर्वसम्मतत्वात् । आरोपितस्याधिष्ठानानन्यशब्दप्रयोगाविरोधात् । प्रातिभासिकव्यावहारिकयोरपि तत्वतः व्यावहारिकपारमार्थिकाभ्याम् अनन्यत्वाभावेन अनिर्वाच्यतायाः निष्प्रत्यूहं सिद्धेश्च, उक्तचन्द्रिकाकारोक्तस्य कस्यापि दोषस्यानवकाशात्' (शां.पा.भू. पु. ७१६) इत्यादिना तन्न । तथा हि । यदुक्तम् 'आरम्भणशब्दादिभ्यः' इति सूत्रांशेन वाचारम्भणमित्यादिश्रुतेः हेतूकरणात्तस्याश्च प्रपञ्चमिथ्यात्वकथन एव स्वरसादिति तन्न । तादृशश्रुतेः

संस्कृतनाम्नां नित्यस्वरूपसत्यत्वप्रतिपादनमुखेन तेषां प्राधान्यकथन एव स्वारस्य-सत्त्वात् 'तस्याश्च प्रपञ्चमिथ्यात्वकथन एव स्वरसात्' इत्यसङ्गतम् । तादात्म्यघटितमिथ्यात्वस्य बहुधा निराकृततया तथाविधमिथ्यात्वस्य तदनन्यत्वशब्दार्थत्वाभावेन उक्तरीत्येत्यारभ्य विवक्षितार्थप्रतीतेरित्यन्तमसङ्गतम् ।

यद्रजतमभादित्यत्रापि 'यत् रजततया प्रतिभातं सा शुक्तिः' इत्यारोपाधिष्ठानस्य शुक्तिकाया साकमभेद एव प्रतीयते, नारोप्यमाणाधिष्ठानयोरिति बालेनापि सुबोधमिदम् । अतः यद्रजतमभादित्यारभ्याविरोधादित्यन्तमप्यसङ्गतमेव । प्रातिभासिकव्यावहारिकयोः तत्वतः व्यावहारिकपारमार्थिकाभ्यामन्यत्वाभावे प्रातिभासिकव्यावहारिकयोः व्यावहारिकपारमार्थिकाभ्यां साकमभेदस्यैव पारमार्थिकस्य प्राप्त्या शुक्तिरजतादिकं प्रातिभासिकम्, जगत् व्यावहारिकमिति व्यवस्था न स्यात् ।

किञ्चैवं पारमार्थिकस्य ब्रह्मणः व्यावहारिकात् तत्वतो भेदाभावेऽभेदस्यैव पारमार्थिकस्य तयोः प्राप्त्या ब्रह्मप्रतिपादकानां 'सत्यं ज्ञानम् अनन्तम्' इत्यादिवाक्यानां व्यावहारिकविषयकत्वलक्षणामुख्यप्रामाण्यापत्तेः। व्यावहारिकविषयकत्वममुख्यं प्रामाण्यं पारमार्थसन्मात्रविषयकत्वलक्षणं प्रामाण्यं मुख्यप्रामाण्यमिति त्वयाऽभ्युपगमात् ।

किञ्च, जगद्विषयप्रमाणानां परमार्थसन्मात्रविषयकत्वेन तेषां मुख्यप्रामाण्यापत्तिः । नचेष्टापत्तिः । सत्यं ज्ञानमित्यादिवाक्यानां मुख्यं प्रामाण्यम्, जगद्विषयप्रमाणानाम् अमुख्यं प्रामाण्यमिति त्वदभ्युपगमात् ।

किञ्च, प्रातिभासिकव्यावहारिकयोस्तत्वतः भेदाभावे प्रातिभासिकविषयिण्याः उक्तद्विविधप्रामाण्यशून्यत्वेनाप्रामाण्यवत्तया त्वत्सम्मतया 'इदं रजतम्' इत्यादिप्रतीतेः व्यावहारिकविषयकत्वलक्षणप्रामाण्यापत्तेः। जगद्विषयप्रमाणानां प्रातिभासिकविषयत्वेनाप्रामाण्यापत्तेश्च।

किञ्च, ब्रह्मणः प्रातिभासिकाभिन्नव्यावहारिकाभिन्नतया प्रातिभासिकाभेदस्यापि प्राप्त्या ब्रह्मणः प्रातिभासिकत्वापत्तेः। तथा तद्विषयप्रमाणानां प्रातिभासिकविषयतया तेषां प्रामाण्यसामान्याभावापत्तेश्च।

किञ्च, प्रातिभासिकव्यावहारिकयोः व्यावहारिकपारमार्थिकयोश्च परस्परं तत्वतः भेदाभावे प्रातिभासिकव्यावहारिकयोरनिर्वचनीयत्वं दुर्घटं स्यात्। प्रातिभासिके व्यावहारिकपारमार्थिकविलक्षणत्वस्य, व्यावहारिके प्रातिभासिकपारमार्थिकविलक्षणत्वस्य चानिर्वाच्यत्वरूपत्वात् तयोस्तत्त्वाभावात्। तयोस्तत्वतो भेदाभावेऽपि मिथ्याभेदेनानिर्वाच्यत्वमुक्तरूपं सुघटमिति यदि मन्यते तदा तथाविधस्य मिथ्याभूतस्य व्यावहारिकपारमार्थिकवैलक्षण्यस्य ब्रह्मण्यपि सौलभ्येन ब्रह्मणोऽप्यनिर्वचनीयत्वापत्तिरित्यादीनामनेकेषां दोषाणामवकाशे सत्यपि कस्यापि दोषस्यानवकाशदिति जल्पनमुन्मत्तजल्पनमेवेति ज्ञेयम्।

(ब्रह्मविज्ञानेन सर्वविज्ञानानुपपत्तिः)

ब्रह्मविज्ञानेन सर्वविज्ञानमप्यनुपपन्नम्। त्वन्मते सर्वस्य जगतः ब्रह्मण्यध्यस्तत्वाङ्गीकारात्। अधिष्ठाने ज्ञाते अध्यस्तस्य ज्ञातत्वायोगात्। नहि शुक्तिस्वरूपविज्ञानात् रजतज्ञता। प्रत्युत शुक्तित्वापरिज्ञानात् यथैव रजतज्ञता ब्रह्मतत्वापरिज्ञानात् तथा सर्वज्ञतोचितेत्यापातात्।

मृत्पिण्डदृष्टान्तोऽप्यनुपपन्नः। नहि घटादिकं मृदादावारोपितमिति वक्तुं युक्तम्। मृत्तत्वे ज्ञातेऽपि घटानिवृत्तेः। तस्माद्विवर्तवादस्यायुक्तत्वात् जगत्सत्यत्ववाद एव युक्त इति।

'यत्तु चन्द्रिकायाम् रज्ज्वां ज्ञातायां भुजङ्गतत्त्वं ज्ञातं भवति। सा हि तस्य तत्वम्। एवञ्च ब्रह्मज्ञानात् सर्वं तत्वतो ज्ञातं भवतीति भामत्युक्तमनूद्य तन्न। एवं हि ब्रह्मज्ञाने ब्रह्मैव ज्ञातं भवतीत्यर्थः स्यात्। तच्चायुक्तम्। स्वस्य स्वहेतुत्वायोगात्' (शां.पा.भू. पु.७२६) इत्यनेन चन्द्रिकोक्तं दूषणमुपपाद्य तदपि मन्दमिति प्रजल्प्य यदुक्तम् 'ब्रह्मविज्ञानेन सर्वं तत्वतो विज्ञातं भवतीत्यत्र ब्रह्मज्ञानेनेत्यभेदे तृतीया। अभेदस्य च विज्ञातमित्यत्र विज्ञानेऽन्वयः। तथा च ब्रह्मज्ञानाभिन्नं यत् तत्वतो ज्ञानं तद्विषयस्वीयतत्वज्ञानाभिन्नज्ञानविषयकब्रह्मकं सर्वमिति पर्यवसितार्थे न स्वस्य स्वहेतुत्वापत्तिरिति दूषणावकाशः' (शां.पा.भू. पु. ७२७) इति तद् असत्। एवं सति सर्वज्ञानस्य ब्रह्मज्ञानजन्यत्वालाभेऽपि जगत्तत्वज्ञानब्रह्मज्ञानयोरैक्यलाभेन तस्य बाधिततया बाधितार्थप्रतिपादकतया तादृशवाक्याप्रामाण्यापत्तेः। ब्रह्मणः जगद्रूपत्वासम्भवेन जगतः ज्ञाने ब्रह्मज्ञानैक्यस्य बाधितत्वात्। अन्यथा ब्रह्मणः जडत्वापत्तिः। जगतो वा चेतनत्वापत्तिः। तथाचाभेदे तृतीयेत्यङ्गीकारे चोक्तरीत्या तादृशवाक्यस्याप्रामाण्यापत्तिः। करणे तृतीयेत्यङ्गीकारे स्वस्य स्वहेतुत्वापत्तिरित्युभयतः पाशारज्जुरिति।

किञ्चासाधारणस्वरूपं धर्मो वा तत्वमित्युच्यते। नतु भ्रमाधिष्ठानम्। तथा सत्यानन्दो ब्रह्मणः, रज्जुत्वं च रज्जोस्तत्वं न स्यात्। नच रज्जुः रज्जुज्ञाननिवृत्तस्य सर्पस्य स्वरूपं धर्मो वा। नच परस्परभिन्नाने-

काकारोऽप्यनुगतमधिष्ठानमेकैकस्यारोपितस्यासाधारणम् । नचारोपितमित्येतावता ततोऽन्यस्य तत्वं भवति । स्वीकृतं च त्वयापि सर्पस्य रज्जुव्यतिरेकेणासत्त्वेन ततोऽन्यत्वाभावेऽपि रज्जोः सर्पव्यतिरेकेण सत्त्वेन ततोऽन्यत्वम् ।

यदत्रोक्तं परेण 'असाधारणस्वरूपस्य धर्मस्य वा न तत्वरूपता । अपि त्वनारोपितस्यैव तत्वस्वरूपत्वेनोक्तदूषणानवकाशात्' (शां.पा.भू. पु.७३१) इति । तन्मन्दम् आरोपितरजतस्य शुक्तिः अनारोपितस्वरूपमित्यङ्गीकारे आरोपितं रजतमनारोपितमित्युक्तं स्यात् । तच्चायुक्तम् । आरोपितस्यानारोपितत्वायोगात् ।

''यदपि- वाचारम्भणशब्दस्य समासतया 'वाचारम्भणशब्दादिभ्यः' इत्येव सूत्रणीयम् । विशिष्टपदग्रहणौचित्यात् । पदैकदेशग्रहणं त्वनुचितम् इति चन्द्रिकोक्तं दूषणम्'' इत्यनेन चन्द्रिकोक्तदूषणमुपपाद्य तदपि न साध्विति प्रजल्प्य यदुक्तम् 'वाचैव केवलमस्तीत्यारभ्यते घटः शरावः उदंचनं चेति भाष्ये व्यस्तस्यैव वाचेत्यस्योपादानात्' (शां.पा.भू.पु.७३५) इत्यादिना तन्मन्दम् । वाचारम्भणश्रुतेः अस्य विषयवाक्यत्वे श्रुत्यनुसारित्वाय वाचारम्भणशब्दस्य समासतया तथैव ग्रहणं कुतो न कृतमित्याक्षेपस्यास्मदीयभाष्ये व्यासेनाभिधानं तस्यास्तीत्येतत् समाधानं भविष्यतीति न प्राज्ञसम्मतम् ।

(सौत्रादिपदार्थचिन्तनम्)

''यदपि चन्द्रिकायाम्- त्वन्मते सौत्रादिशब्दार्थस्य 'इदं सर्वं यदयमात्मा' इत्यादेरपि शब्दरूपत्वात् सूत्रे 'वाचारम्भणादिशब्देभ्यः'

इत्येव विन्यासः स्यात्' इति चन्द्रिकोक्तदूषणमनूद्य तदपि मन्दमिति प्रजल्प्य यदुक्तम् 'आदिशब्दात् युक्तिभिश्चेति त्वदीयभाष्येऽपि युक्तीनामिवास्मदीयभाष्येण दृश्यत्वपरिच्छिन्नत्वादियुक्तीनामप्यादिशब्दार्थताप्रदर्शनायोपन्यस्तत्वे शब्दमात्रस्यैवादिशब्दार्थत्वोक्तेः भ्रान्तिमूलत्वात्' (शां.पा.भू. पु.७३५) इति तन्मन्दम् । विशेष्यवाचकपदसमभिव्याहृत आदिपदे पूर्वपदार्थतावच्छेदकानाक्रान्तस्यैव बोधकतायाः व्युत्पत्तिसिद्धतया प्रकृते आदिपदसमभिव्याहृतपूर्वपदार्थतावच्छेदकं यत् शब्दत्वं तदनाक्रान्तबोधकत्वस्यैव प्राप्त्याऽऽदिपदेन युक्तीनामेव ग्रहणं भवेत्, नतु शब्दस्येति । तथाचादिपदेनोभयग्रहणासम्भवेन 'युक्तीनाम् अप्यादिशब्दार्थताप्रदर्शनाय' इत्यसङ्गतम् । एवञ्च प्रकृते आदिपदस्योक्तव्युत्पत्त्या शब्दबोधकत्वस्याप्राप्त्याऽऽदिपदेन शब्दबोधमभिलषतस्तवादिपदेन युक्तिग्रहणांशं परित्यज्यारम्भणादिशब्देभ्य इत्येव सूत्रविन्यासः स्यादिति दूषणं दुर्वारमेव ।

अस्तु वा तेषां वाक्यानां कथञ्चिदादिपदोपात्तता । तथापि नैतेभ्यस्तदनन्यता सिद्ध्यति । उपपत्तिविरुद्धत्वात् । तथाहि, या सूत्रकृता प्रतिज्ञाता, श्रुतिभिश्च प्रतिपादिता जगतस्तदनन्यता किंप्रकारा? किं 'पिकः कोकिलः' इतिवदेकत्वलक्षणा, किं वा 'मृद् घटः' इतिवत् विकारविकारिभावलक्षणा । नाद्यः । ब्रह्मणस्त्वविकारत्वस्य श्रुतियुक्तिसिद्धतया जगतस्तु विकारात्मकत्वेन प्रत्यक्षादिप्रमाणप्रमिततया ब्रह्मजगतोर्विरुद्धधर्माधिकरणत्वेन भेदस्यैव सिद्ध्या न तयोरैक्यं सिद्ध्यति । ब्रह्मणस्त्वविकारत्वादेव द्वितीयोऽपि परास्तः ।

नन्वेवमप्युपपत्तिविरुद्धापि जगतः ब्रह्मानन्यताऽङ्गीकार्या । अन्यथा

'ऐतदात्म्यम् इदं सर्वम्' इत्यादिश्रुतीनामप्रामाण्यप्रसङ्ग इति चेन्न। तदधीनत्वादौ श्रुत्यर्थे उक्तयुक्तया साधिते सति कथं तदनन्यतायाः अङ्गीकर्तुं शक्यावकाशः। श्रुतिप्रतीतोऽप्यर्थः निरवकाशोपपत्तिविरोधात् त्याज्य एव। प्रपञ्चितं चैतत् श्रीमन्न्यायसुधायां जयतीर्थश्रीमच्चरणैः- 'कथं च तदनन्यता' इत्यनुव्याख्यानव्याख्यावसर इति। तस्मादेवं परमते सूत्रस्यानुपपन्नार्थतया श्रीमदानन्दतीर्थश्रीमच्चरणैः-

'स्वतन्त्रकारणान्यत्वं तेन ह्यत्र निषिध्यते'

इत्यादिना प्रदर्शित एव सूत्रार्थस्त्वतिरमणीय इति सर्वमवदाम्॥

॥ श्रीमदानन्दतीर्थहृत्कमलनिवासिने श्रीबादरायणाचार्याय मङ्गलम्॥

वायीबालार्यसूरीणां शमादिगुणसम्पदाम्।
शिष्येण श्रीनिवासेन रचितं द्वैतभूषणम्॥ १॥
दुर्वादिदूषणपरं समाप्तं मोदवत्सरे।
फाल्गुने सितपञ्चम्यां पूर्वाचार्यप्रसादतः॥ २॥
नोपेक्षयन्त्विदं प्राज्ञाः मन्दधीकृतमित्यतः।
पूर्वाचार्योक्तयुक्तीश्च सङ्गृह्य रचितं यतः॥ ३॥
विदुषः प्रार्थये सम्यगिदं संशोध्य यत्नतः।
उपादेयं यथा च स्यात् तथा कर्तव्यमित्यपि॥ ४॥

॥ श्रीमद्विष्णवङ्घ्रिनिष्ठातिगुणगुरुतम-श्रीमदानन्दतीर्थ-त्रैलोक्याचार्य-श्रीमच्चरणातिरमणीय-शास्त्रप्रवचननिरतत्वाद्यनेकगुणगणमण्डित-श्रीमद्वायीबालार्यवर्याणां शिष्येण सोरटूर श्रीनिवासाचार्येण रचितं परकृतशङ्करपादभूषणदूषणपरं द्वैतभूषणं समाप्तम्॥

PUBLICATIONS OF
POORNAPRAJNA SAMSHODHANA MANDIRAM

BOOKS	Rate
UPANISHADBHASHYAM (Four Upanishads)	200/-
GEETABHASHYAM (Chapters (1-2)	125/-
TATVODYOTA PRAKARANAM	75/-
VISHNUTATVAVINIRNAYA Part -1	250/-
VISHNUTATVAVINIRNAYA Part -2	250/-
SHRIMAD BHAGAVATHAM	150/-
BHARATIYA DARSHANESHU PRATHYAKSHA SWAROOPAM	50/-
PANCHALAKSHANI	75/-
SARVAMULA SHABDA NIGHANTU	250/-
SUBHASHITANI	20/-
PRAMANA SANGRAHA OF NARAHARI ACHARYA	30/-
LAGHURAMAYANAM	20/-
KAVYANAVANITA & KAVYALAKSHANA SANGRAHA	20/-
ALANKARSUTRABHASHYAM -CHAMATKARA CHAMIKARAM	20/-
SHRUTISIDDHANTASANGRAHA	140/-
BRAHMA SUTRA BHASHYAM	121/-
GEETA BHASHYAM (Chapters 3-4)	200/-
MUKTITATVAM	40/-
BHEDATARANGINI	50/-
CHANDOGYOPANISHADBHASHYAM	250/-
CHANDOGYOPANISAT	125/-
YAJNEEYOPANISHATPRABHA	20/-
PADAVRITTISVARUPAVICHARA	60/-
SAMAVAYAVIMARSHA	80/-
PRAJNA-2005	60/-
BRIHADARANYAKOPANISHAT	160/-
SMRITI MANIKYA SANGRAHA	80/-
'ANANDATIRTHA' A CD-ROM	250/-